नमस्वद्भूतयेइतिपाठेवायुवदसंगायेत्यर्थः ४७

भा०८प्र०टी० किंबहुना द्रव्यंभूतपंचकं वयः कालः कर्म जीवादृष्टं गुणाः सत्वादीन् विशेषं ब्रह्मांडं तदुपलक्षितंकार्य्यवर्गंच यस्ययोगमायया ईश्वरोत्म
कसंकल्पेन विहितान्वदंति द्रव्यादिकारणात्मकं विशेषरूपं कार्यात्मकंच सर्व्वं वस्तुयत्संकल्पविहितं वदंतीत्यर्थः अतएवयद्यस्वरू
पंचेतनाचेतनसजातीयत्वेन चिंतयितुमशक्यं अबुधावबोध्यं प्रकृष्टविद्वद्बोध्यं समहाविभूतिः प्रसीदतां ४३ एवंकार्य्यावस्थप्रपंच
शरीरकं वैराजपुरुषंप्रसाद्यकारणावस्थंनमस्करोति नमइति उपशांतशक्तयेसर्गाद्यनभिमुखचिदचिच्छक्तये कालादिशक्तये स्वराट् स्वतंत्रं स्वरूपं
तस्यभावोयाथात्म्यं स्वाराज्यंतस्यलाभेनस्वानेहानुभवेनेत्यर्थः तेनप्रतिपूरितः आत्मास्वरूपंयस्य तस्मैस्वतंत्रानवधिकानंदस्वरूप
मर्द स्वरूपानुभवपूर्णाय समस्तकामायेत्यर्थः मायया रचितेषु गुणेषु नसज्जमानाय लीलारसविमुखाय स्वभूतये स्वा
भाविकैश्वर्य्याय तस्मैनमोनमः ४४ एवंप्रकृतिपुरुषविलक्षणं विभूतिद्वयाधिपं सर्वकारणं भगवंतं प्रसाद्य नमस्कृत्य स्वाभिप्रेतं

1 द्रव्यं वयः कर्म गुणान् विशेषं यद्योगमायाविहितान्वदंति यद्दुर्विभाव्यं प्रबुधावबोध्यं प्रसीदतां नः समहाविभूतिः ४३ न
मोस्तुतस्माउपशांतशक्तये स्वाराज्यलाभप्रतिपूरितात्मने गुणेषुमायारचितेषुवृत्तिभिर्नसज्जमानायनभःस्वभूतये
मर ४४ सत्वंनोदर्शयात्मानमस्मत्करणगोचरं प्रपन्नानांदिदृक्षूणां सस्मितं तेमुखांबुजं ४५ तैस्तैःस्वेच्छाभूतैरूपैःका
लेकालेस्वयंविभो कर्म्मदुर्विषहंयन्नोभगवांस्तत्करोतिहि ४६ क्लेशभूर्य्यल्पसाराणि कर्म्माणिविफलानिच देहिनांविषया
र्तानांनतथैवार्पितंत्वयि ४७

विज्ञापयितुं तावत्तद्दर्शनंप्रार्थयति सत्वमिति उक्तविधस्त्वमात्मानं दिव्यमंगलविग्रहं दिदृक्षूणां प्रपन्नानांनोस्माकम
स्मच्चक्षुरादिगोचरं यथातथा सस्मितं तेमुखांबुजं दर्शय ४५ ननुनचक्षुषापश्यतिकश्चनैनमितिश्रुत्युक्तविधयाचक्षुराद्य
गोचरं कथंत्वच्चक्षुरादिकरणविषयःस्यामित्यत्राह तैरिति हेविभोकालेकाले यदायदाहिधर्मस्यग्लानिर्भव
रीत्या४ तिभारत अभ्युत्थानमधर्मस्येत्युक्तकाले स्वेच्छाधृतैर्नतुपुण्यपापात्मककर्म्मधृतैरूपैरवतारैर्भगवान्नोस्माकंदुर्विषहं
दुरासदंदुष्करं कर्म्म करोति अघटितघटनात्मकक्रियाशक्तेस्तस्यविग्रहदर्शयितुंनदुर्घटमितिभावः ४६ सोहमात्मानंसत्कृ
त्यतिकर्मणाहेतुना कथं दर्शयेयं इत्यत्राह क्लेशेति विषयार्तानामननुकूलविषयालाभदुःखपीडितानांदेहिनांक्ले
शोभूरियेषुअल्पसारःसुखंयेषु तत्कर्मधारयः तानिकर्म्माणियथाविफलानिभवंति तथात्वय्यर्पितंकर्मनविफलंभवतिहि ४७

तथा यस्य प्राणाद्वायुरभूत् प्राणाद्वायुरजायतेति श्रुतेः स महाविभूतिः प्रसीदतां कथंभूतो वायुश्चराचराणां भूतानां सहआदिः जनयिता तत्र सहो मनसो बलं ओजः इन्द्रियाणां बलं देहिकं प्राणाः पञ्चवृत्तिमान् यं पञ्चवृत्तिं प्राणं वयं बुद्ध्याद्यधिष्ठातृदेवताः सम्राजं सार्वभौमं भृत्या इवान्वास्म अनुवर्तिनः स एवंभूतो वायुर्यस्य प्राणादभूत् स प्रसीदतां ३७ तथा यस्य श्रोत्राद्दिशो जज्ञिरे दिशः श्रोत्रादिति श्रुतेः श्रवणादिखानि देहस्य तच्छिद्राणि हृदो जज्ञिरे हृदयाद्बभूवुः पुरुषस्य वैराजस्य नाभ्याः खमेतदन्तरिक्षं जज्ञे नाभ्या आसीदन्तरिक्षमिति श्रुतेः प्राणशब्दः कर्मेन्द्रियपरः इन्द्रियशब्दो ज्ञानेन्द्रियपरः आत्मा मन असुशब्दः पञ्चवृत्तिप्राणो वायुपरः शरीरं चैतेषां
नंदि केतनं यं यस्य नाभ्या जज्ञे स प्रसीदताम् ३८ यस्य बलान्महेन्द्रो जज्ञे प्रसादात्त्रिदशा जज्ञिरे मन्योः क्रोधाद्गिरीशो रुद्रः

प्राणादभूद्यस्य चराचराणां प्राणः सहो बलमोजश्च वायुः अन्वास्म सम्राजमिवानुगा वयं प्रसीदतां नः स महाविभूतिः
३७ श्रोत्राद्दिशो यस्य हृदश्च खानि प्रजज्ञिरे खं पुरुषस्य नाभ्याः प्राणेन्द्रियात्मासुशरीरकेतः प्रसीदतां नः स महाविभूतिः ३८
बलान्महेन्द्रस्त्रिदशाः प्रसादान्मन्योर्गिरीशो धिषणाद्विरिञ्चः खेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः प्रसीदतां नः स महाविभूतिः ३९
श्रीर्वक्षसः पितरश्छाययासन् धर्मः स्तनादितरः पृष्ठतोऽभूत् द्यौर्यस्य शीर्ष्णोऽप्सरसो विहारात् प्रसीदतां नः स महाविभूतिः ४०
विप्रो मुखाद्ब्रह्म च यस्य गुह्यं राजन्य आसीद्भुजयोर्बलं च ऊर्वोर्विडोजोऽङ्घ्रिरवेदशूद्रः प्रसीदतां नः स महाविभूतिः ४१
लोभोऽधरात्प्रीतिरुपर्यभूद्द्युतिर्नस्तः पशव्यः स्पर्शेन कामः भ्रुवोर्यमः पक्ष्मभवस्तु कालः प्रसीदतां नः स महाविभूतिः ४२

बुद्धेर्विरिञ्चो ब्रह्मा खेभ्यः छन्दांसि गायत्र्यादीनि छन्दांसि जज्ञिरे तस्मादिति श्रुतेः ऋषयश्च खेभ्यः विवरेभ्यः जज्ञिरे मेढ्रात्कः प्रजापतिर्मेढ्राधिष्ठाता ३९ तथा यस्य वक्षसः श्रीः संपन्ना छायया छायातः पितर आसन् स्तनाद्धर्मः पृष्ठतः इतरोऽधर्मः शीर्ष्णः शिरसो द्यौः शीर्ष्णो द्यौः समवर्ततेति श्रुतेः विहाराद्प्सरसः ४० तथा यस्य मुखाद्विप्रो कुलं गुह्यमतीन्द्रियावबोधि ब्रह्म वेदश्चासीत् ऋचः सामानि जज्ञिरे ब्राह्मणोऽस्य मुखमासीदिति श्रुतेः भुजयोर्बाहुभ्यां राजन्यो बलं चासीत् बाहू राजन्यः कृत इति श्रुतेः ऊर्वोर्विट् वैश्यः अङ्घ्रेः शूद्रश्चाभवत् ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायतेति श्रुतेः ४१ अधराद्धरोष्ठाल्लोभः उपर्युत्तरोष्ठात् प्रीतिरभूत् नस्तः नासिकातः द्युतिः कान्तिः पशव्यः पशुभ्यो हितः कामः स्पर्शान्नाभूत् भ्रुवोर्यमः कालः पक्ष्मभवः पक्ष्मणो जातः प्रसीदताम् ४२ विप्रः

तप्तहेमवदवदातेन शुद्धेन पिशंगेन चंचलसता कौशेयवाससा युक्तामिति शेषः प्रसन्नानि चारूणि सर्वाण्यंगानि यस्याः सुंदरं मु
खं यस्याः सुंदरे भ्रुवौ यस्यास्तां ४ महांतो मणयो यस्मिन् तेन किरीटेन केयूराभ्यां चालंकृतां कर्णाभरणे कुंडले ताभ्यां नि
तरां भातौ कपोलौ ताभ्यां श्रीशोभा मुखांबुजे यस्यास्तां ५ कांचीकलापादिभिः शोभितां कौस्तुभ आभरणं कंठे यस्यास्तां
लक्ष्मीं वक्षसि बिभ्रतीं वनमाला अस्यामस्तीति तथा तां ६ मूर्तिमद्भिः पुरुषाकृतिभिः स्वकीयैः सर्वैः सुदर्शनादिभिरस्त्रै
रुपासितां सेव्यमानां सशर्वः रुद्रेण सहितः देवप्रवरो ब्रह्मा सर्वगीरवनीभिर्गिरां गतैः प्राप्तैः मुक्तैर्देवैः साष्टांगं प्रणतैः सह
परं पुरुषं तुष्टाव ७ तावत् स्तोत्रं प्रक्रांतः कर्माधीनजन्मादिरहितं निरस्तनिखिलदोषं ज्ञानानंदादिकल्याणगुणोदधिं सर्वात्मान

२ तप्तहेमावदातेन लसत्कौशेयवाससा प्रसन्नचारुसर्वांगीं सुमुखीं सुंदरभ्रुवं ४ महामणिकिरीटेन केयूराभ्यां च भूषितां
कर्णाभरणनिर्भातकपोलश्रीमुखांबुजां ५ कांचीकलापवलयहारनूपुरशोभितां कौस्तुभाभरणां लक्ष्मीं बिभ्रतीं
वनमालिनीं ६ सुदर्शनादिभिः स्वास्त्रैर्मूर्तिमद्भिरुपासितां तुष्टाव देवप्रवरः सशर्वः पुरुषं परं सर्वामरगणैः सा
कं सर्वांगैरवनीं गतैः ७ ब्रह्मोवाच अजातजन्मस्थितिसंयमायागुणाय निर्वाणसुखार्णवाय अणोरणिम्ने
ऽपरिगण्यधाम्ने महानुभावाय नमो नमस्ते ८ रूपं तवैतत्पुरुषर्षभेज्यं श्रेयोर्थिभिर्वैदिकतांत्रिकेण यो
गेन धातः सह नस्त्रिलोकान् पश्याम्यमुष्मिन्नु ह विश्वमूर्तौ ९

मपरिच्छिन्नस्वरूपं महाप्रभावं नमस्करोति अजातेति न जाता जन्मादयः कर्माधीना यस्य तत्र हेतुः अगुणाय सत्त्वादिप्राकृतगुणवश्यत्व
प्रतिभटाय निर्वाणसुखार्णवाय निर्दुःखानंदमहोदधये अणोर्जीवादप्यणिम्ने तत्रास्ततपातदेतः प्रवेशयोग्यायापरिच्छिन्नस्वरूपा
यमहाप्रभावाय तुभ्यं नमो नमः ८ अजातजन्मस्थितिसंयमायेत्यनेन प्रकृतस्य दृष्टिगतरूपस्य कर्माधीनत्वे संस्थिते तदेव रू
पं विशिंषन् स्तौति रूपमिति हे पुरुषर्षभ तवैतद्रूपं श्रेयोर्थिभिः कर्तृभिः वैदिकतांत्रिकेण वेदपंचरात्राभ्यामवबोधिते
न योगेन इज्यमाराधनीयं तस्मिन् रूपे विशिष्टसाक्षात्कारः हे धातः अमुष्मिन्नु अस्मिन्नु हि रूपे महः त्रिलोकान् त्रिलोकैः
सह नोऽस्मान् पश्यामि आश्चर्यं सहयोगेपि तत्तीमामा अभावः त्रिलोकानिलत्र कर्माधीनत्वदर्शने हेतुर्यद्यत्र रूपे विशिष्टानदृष्टि विश्व
ता मूर्तौ विश्वाश्रयमूर्तौ विश्वमूर्तेरिति पाठांतरं तदा हे विश्वमूर्ते इति संबोधनम् ९

कर्मकल्पोऽपि कर्माभासोऽप्यवमः लौकिक आपारस्त्वय्यर्पितश्चेद्विफलाय न कल्प्यते न विफलो भवतीति हि यस्मात्स एवेश्वरः पुरुषस्यात्मा त
एवं दयितः प्रियः हितश्चात्मनि दयिते हिते चार्पितं कर्म निःफलं स्यादित्यर्थः ४८ ईश्वरार्पितस्वल्पस्यापि कर्मणोऽनल्पफलत्वमा
ह यथाहि तरोर्मूलावसेचनं मूले जलसेचनं स्कन्धानां शाखानां चापि भवति एवं परमात्मनो विष्णोराराधनं सर्वेषां हि सर्वपुरुषार्थानां साधनंभ
वतीत्यर्थः ४९ स्तुतिनमस्कारादिकर्मणो विना नान्यस्त्वत्तोषहेतुरस्तीत्यभिप्रायवानाह नमः इति दुर्वितर्क्याणीतरसजातीयत्वे
नविभावितुमशक्यान्यात्मकर्माणि स्वचेष्टितानि यस्य तस्मै अनन्ताय त्रिविधपरिच्छेदरहिताय निर्गुणाय हेयगुणरहिताय सत्त्वा
दिगुणानां नियन्त्रे सत्त्वस्थाय सत्त्वगुणोऽस्मेव निमित्तं कर्मानुगुणमधुना प्रवर्तमानाय तुभ्यं नमः साम्प्रतं मम नमस्कार ए
व युज्यते ईदृशं त्वां प्रसादयितुं नम एव युज्यते नान्य एवोपाय इत्यर्थः यद्वा गुणत्रयोऽस्मेव निमित्तं कर्मानुगुणे

नावमः कर्मकल्पोऽपि विफलायेश्वरार्पितः कल्पते पुरुषस्यैव स ह्यात्मा दयितो हितः ४८ यथा हि स्कन्धशाखानां तरोर्मूला
वसेचनं एवमाराधनं विष्णोः सर्वेषामात्मनश्च हि ४९ नमस्तुभ्यमनन्ताय दुर्वितर्क्यात्मकर्मणे निर्गुणाय गुणेशा
य सत्त्वस्थाय च साम्प्रतं ५० इति श्रीमद्भागवते महापुराणेऽष्टमस्कन्धे पञ्चमोऽध्यायः ५ श्रु उ च एवं स्तुतः सुरग
णैर्भगवान्हरिरीश्वरः तेषामाविरभूद्राजन्सहस्रार्कोदयद्युतिः १ तेनैव सहसा सर्वे देवाः प्रतिहतेक्षणाः
नापश्यन्खं दिशः क्षोणीमात्मानं च कुतो विभुम् २ विरिञ्चो भगवान्दृष्ट्वा सह शर्वेण तां तनुं स्वच्छां मरकतश्यामां
कञ्जगर्भारुणेक्षणाम् ३

प्रवर्तमानायापि साम्प्रतमधुना सत्त्वस्थायेत्यन्वयः ५० ३ श्री भा वं दी पि या ष्ट पं मः ५ एवं संस्तुतो भगवानावि
र्बभूवेत्याह मुनिः एवमिति हे राजन्नित्थं संस्तुतः सम्यक् स्तुतः हरिरीश्वरो भगवान्सहस्राणामर्काणां सूर्याणा
मुदये द्युतिरिव द्युतिर्यस्य सः अभूतोपमेयम् तेषां ब्रह्मादीनां पुरः इति शेषः आविर्बभूव प्रकटोऽभूत् १ तेन
महसा तेजसा प्रतिहतानीक्षणानि येषां ते सर्वे देवाः क्षोणीमेव नापश्यन् कुतो विभुमाविर्भूतं पश्येयुरि
त्यर्थः २ भगवान्विरिञ्चो ब्रह्मा शर्वेण रुद्रेण सहतां भगवतस्तनुं दृष्ट्वा तुष्टावेति पञ्चमेनान्वयः तनुं वि
शिनष्टि निर्मलामिन्द्रनीलवच्छ्यामां कञ्जगर्भवदरुणे ईक्षणे यस्यास्ताम् ३ ७७७ ७७७

भा०स्कं०टी
२०

मनसा पश्यन्तीत्यत्र दृष्टान्तैः सकलमेवार्थं उपपादयति काष्ठादिष्वग्न्यादीन्यथा योगैरुपायैः तत्र यथाग्निमेधसि काष्ठे मथनेनोपायेन यथा
चामृतं क्षीरं गोषु दोहनेन यथा भुव्यन्नं कृष्याद्युपायेन यथा वा वृत्तिं जीवनभूतमम्बु जलं उद्खननेनोपायेन पश्यन्ति उद्यमनेनेति
पाठे स एवार्थः तथा विपश्चितो मनीषिणो मनुष्याः बुद्ध्या योगविस्तरेण या गुणेषु गुणपरिणामात्मकेषु सत्स्वेतेषु पदार्थेषु त्वाम
विक्रियमेकमधियन्ति इक् स्मरणे इति धातुः विदन्ति साक्षात्कुर्वन्तीत्यर्थः १२ तद्दर्शनेनात्मनो नितरां सुखित्वं वदन्तस्तत्प्रयोजनं कु
र्विति प्रार्थयते तमिति द्वाभ्यां हे नाथ सरोजनाभ अतिचिरेप्सितमर्थं पुरुषार्थस्वरूपमुज्जिहानमाविर्भवन्तं उक्तविधं त्वां दृष्ट्वा स
र्वे वयं निर्वृतिमानन्दं गताः प्राप्ताः यथा दवार्ताः दवाग्निपीडिताः गजा गाङ्गं जलं प्राप्य तृप्यन्ति तथा १३ स उक्तविधः त्वं हे खि
ललोकपाल यदर्थाः यत्प्रयोजनाः यत्कामयमाना वयं तव पादमूलं समागताः शरणं गताः तत्प्रयोजनं विधत्स्व कुरु यद्विधे
यं तत्कथयेत्यत्राह हे बहिरन्तरात्मन् बहिरन्तश्च व्यापिन् अशेषसाक्षिणः सर्वं युगपत्साक्षात्कुर्वतः तव सर्वज्ञस्य

३

यथाग्निमेधस्यमृतं च गोषु भुव्यन्नमम्बूद्यमनेन वृत्तिं योगैर्मनुष्या अधियन्ति हि त्वां गुणेषु बुद्ध्या कवयो वदन्ति
१२ तं त्वां वयं नाथ समुज्जिहानं सरोजनाभातिचिरेप्सितार्थं दृष्ट्वा गता निर्वृतिमद्य सर्वे गजा दवार्ता
इव गाङ्गमम्भः १३ स त्वं विधत्स्वाखिललोकपाल वयं यदर्थास्तव पादमूलं समागतास्ते बहिरन्तरात्म
न् किं वान्यविज्ञाप्यमशेषसाक्षिणः १४ अहं गिरित्रश्च सुरादयो ये दक्षादयो अग्नेरिव केतवस्ते किं वा वि
दामेश पृथग्विभाता विधत्स्व शं नो द्विजदेवमन्त्रम् १५ श्रीशुक उवाच एवं विरिञ्चादिभिरीडितस्तद्विज्ञाय तेषां हृदयं
यथैव जगाद जीमूतगभीरया गिरा बद्धाञ्जलीन्संवृतसर्वकारकान् १६

त्यर्थः विज्ञाप्यं किं वास्ति न किमपीत्यर्थः १४ तर्हि यूयं तत्र किंचित्कुरुतेत्यत्राह अहमिति अहं ब्रह्मा गिरित्रो रुद्रः ये च सुरादयो द
-क्षादयश्च प्रजापतयश्च ते सर्वे वयमग्नेः केतवः विस्फुलिङ्गा इव त्वत्तः पृथग्भाताः सन्तः आत्मनः स्वानां सुखं किं विद्मः न किम
प्यात्मसुखसाधनं विद्म इत्यर्थः अतस्त्वमेव हे ईश द्विजानां देवानां च मन्त्रं सुखकारिणीमालोचनां विधत्स्वेदं कुरु तत्सुपायमुपदि
शेत्यर्थः १५ एवं स्तुतो विरिञ्चिप्रभृतिभिस्तानाह भगवानित्याह मुनिः एवमित्थं ब्रह्मादिभिरीडितः स्तुतो भगवांस्तेषां विरिञ्चादीनां
हृदयमभिप्रायं यथावद्विज्ञाय मेघनिर्ह्राद इव गम्भीरया गिरा बद्धाञ्जलयो यैः संवृतानि नियमितानि सर्वकारकाणीन्द्रिया
णि यैस्तान्विरिञ्चादीन् जगाद १६

विश्वमूर्त्तिस्त्वमेव प्रपंचयति त्वयीति इदं विश्वमग्रे मध्येंते च त्वय्येवाश्रयभूते तरात्मन्यासीदविनाभूतमासीत् अत एवाद्यन्तमध्यवस्थं विश्वं
त्वमेव यद्येवमस्य यदपृथक्सिद्धं तत्ततो भिन्नमिति भावः अनेन जगदुपादानत्वमुक्तम् उपादानोपादेययोरभेदे दृष्टांतमाह घटस्ये
वादे यस्य मृदुपादानभूता यथा न तस्माद्भिन्ना तथेत्यर्थः उपादानत्वप्रयुक्तं विकारित्वं वारयति परः परस्मादिति परस्मात्स्वरूपा
न्यथाभाववदचेतनाद्यः परो विलक्षणो जीवः तस्मादपि स्वभावान्यथाभाववतः परो विलक्षणः स्वस्वभावतोऽपि विकाररहि
त इत्यर्थः उपादानत्वेऽपि तस्य सद्द्वारकत्वान्निर्विकारित्वमिति भावः एवं विश्वोपादानत्वात्त्वं विश्वमूर्त्तिरित्युक्तम् अथ विश्वा
तरात्मत्वादपि त्वं विश्वमूर्त्तिरिति वक्तुं विश्वस्य सृष्टत्वे तदंतरात्मतयानुप्रवेशं चाह त्वमिति आत्माश्रयमात्माश्रया पृथक्सि
द्धया स्वनियाम्यया मायये दं जगन्निर्माय सृष्ट्वा तदनुप्रविष्टः तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुत्यर्थोऽत्रानुसंधेयः अनुप्र
विष्टमप्यनुप्रवेश्यगतदोषास्पृष्टं सत्संचान्तं तेच सत्यमभवदिति श्रुत्यर्थं याथात्म्यविदः पश्यंतीत्याह पश्यंतीति

त्वय्यग्र आसीत्त्वयि मध्य आसीत्त्वय्यंत आसीदिदमात्मतंत्रे त्वमादिरंतो भुवनस्य मध्यं घटस्य
मृत्स्नेव परः परस्मात् १० त्वं माययात्माश्रययास्वयेदं निर्माय विश्वं तदनुप्रविष्टः पश्यं
ति युक्ता मनसा मनीषिणो गुणव्यवायेऽप्यगुणं विपश्चितः ११

गुणव्यवायेऽपि गुणानां व्यवायः अन्यथाभावः परिणाम इति यावत् गुणानां परिणामेऽपि त्वां तत्रानुप्रविष्टं त्वामगुणं चे
तनाचेतनगत हेयगुणरहितं विपश्चितः सत्यं चानृतं च सत्यमभवदित्यादिशास्त्रार्थयाथात्म्यविदः मनीषिणः
तत्प्रतिपाद्यार्थयाथात्म्योपासनपराः युक्ताः समाहितचित्ताः मनसा योगपरिशुद्धेन मनसा साधनेन पश्यंति साक्षा
त्कुर्वंतीति सत्यं चेत्यादिश्रुतेरयमर्थः परमात्मनश्चिदचिद्विग्रहात्जगत्प्रकारपरिणामे च परमात्मशरीरभूते द्वे भागगताः सर्वएवाऽरु
सार्थाः तथाचिदंशगताः सर्वे विकाराः परमात्मनि कार्यत्वं तदवस्थयोस्तयोर्नियंतृत्वेनात्मत्वं परमात्माचेतयोः
स्वशरीरभूतयोर्नियंतृतयात्मतत्त्वभूतः तत्र जीवपुरुषार्थैर्विकारैश्च न स्पृश्यते अपरिच्छिन्न [illegible] खिलदोषगंधसम
ज्ञानानंदमयः सर्वथैकरूप एव जगत्परिवर्त्तनलीलयाऽवतिष्ठते विचित्रचिदचिद्रूपेण विक्रियमाणमपि
ब्रह्म सत्यमेवाभवन्निरस्तनिखिलदोषगंधमपरिच्छिन्नज्ञानानंदमेकरूपमेवाभवदित्यर्थः ११

भा·अ·
वी·रा·
२१

दि२

वलिभिः सहकारिभिः साध्यास्तदनुसरणं विना न सेत्स्यतीति सामादिकमुपदिशति द्वाभ्यां यूयमिति हे सुराः यदसुरा इच्छंति तदेव यूयम
नुमोदध्वं सांत्वया साधु मार्जनेन सर्वे ऽर्था यथा सिध्यंति तथा संरंभेणाविरोधेन न सिध्यंतीत्यर्थः २४ किंच जलधिसंभवात्कालकूटाख्या
द्विषान्न भेतव्यं नीलकंठो रुद्रो ग्रसिष्यतीति भावः तथा वस्तुषु मथनादुत्पन्नेषु लोभः कामः जातु कदाचिदपि रोषश्च न कार्यः २५ इतीत्
थं देवान्समादिश्य तान्भगवान्पुरुषोत्तमः अजितः तेषां ब्रह्मादीनां पश्यतामेवान्तर्हितो भवः हे राजन्नंतर्दधे तिरोहितवान् यतः स्वछं
दगतिः येच्छा व्यापार ईश्वरः २६ अथ भगवदंतर्धानानंतरं तस्मै तिरोहिताय भगवते नमस्कृत्य पिता महो ब्रह्मा भवो रुद्रश्च स्वे स्वे
स्थाने जग्मतुः सुरा इन्द्रादयस्तु बलिं वैरोचनिं तत्समीपं जग्मुः २७ अरीन् शत्रून् अप्यसंयतान् युद्धायानुद्यतान् देवान् द्दृ

4

यूयं तदनुमोदध्वं यदिच्छंत्यसुराः सुराः न संरंभेण सिध्यंति सर्वेऽर्थाः सांत्वया यथा २४ न भेतव्यं कालकूटाद्वि
षाज्जलधिसंभवात् लोभः कार्यो न वो जातु रोषः कामस्तु वस्तुषु २५ श्रु उ च इति देवान्समादिश्य भगवान्पुरुषोत्त
मः तेषामंतर्दधे राजन्स्वच्छंदगतिरीश्वरः २६ अथ तस्मै भगवते नमस्कृत्य पितामहः भवश्च जग्मतुः स्वं स्वं
धामोपेयुर्बलिं सुराः २७ दृष्ट्वारीनप्यसंयत्तान् जातक्षोभान्स्वनायकान् न्यषेधद्दैत्यराट् श्लोक्यः संधिवि
ग्रहकालवित् २८ ते वैरोचनिमासीनं गुप्तं चासुरयूथपैः श्रिया परमया जुष्टं जिताशेषमुपागमन् २९ महेंद्रः
श्लक्ष्णया वाचा सांत्वयित्वा महामतिः अभ्यभाषत तत्सर्वं शिक्षितं पुरुषोत्तमात् ३० तदरोचत दैत्यस्य तत्रान्ये
येऽसुराधिपाः शंबरोऽरिष्टनेमिश्च ये च त्रिपुरवासिनः ३१ ततो देवासुराः कृत्वा संविदं कृतसौहृदाः उद्यमं परमं चक्रुरमृ
तार्थे परंतप ३२

दृष्ट्वा श्लोक्यः स्तुत्यः दैत्यराट् बलिर्जातक्षोभान्सुरान् हंतुमुद्यतान्स्वनायकानसुरसेनामुख्यान्न्यषेधन्न्यवीरयत् यतः संधिविग्रहयोः
संधिवैरयोः कालमुचितं वेत्तीति तथा २८ ते देवा असुरयूथपैर्गुप्तमासीनं परमया श्रिया संपदा जुष्टं युक्तं जिताशेषं
तं वैरोचनिं बलिं उपागमन् समीपमुपविविशुः २९ तत इन्द्रो महामतिः श्लक्ष्णया मधुरया वाचा सांत्वयित्वा सामोपायेन
पुरुषोत्तमाद्भगवतः शिक्षितं तत्सर्वं ममृतोत्पादनप्रयत्नरूपमकथयत् ३० तदिन्द्रोक्तं दैत्यस्य बलेर्ये च शंबरादयोऽसुराधिपाः
ये च त्रिपुरवासिनः तेषां चारोचत रुचिकरमभूत् ३१ ततो देवाश्चासुराश्च ते सर्वे संविदं समयं संकेतं कृत्वा परस्परं कृतसौहृदं मैत्री
हे परंतप अमृतार्थं परममुद्यमं यत्नं चक्रुः ३२

सुरेशो भगवानेक एव स्वयं सुराणां कार्ये ईश्वरः कर्त्तुं समर्थोपि समुद्रोन्मथनादिभिर्विहर्त्तुकामः विहर्त्तुमिच्छुस्तानाह १७ उक्तमेवाह हंते
ति दुर्लभस्य प्रसादलाभप्रयुक्तमाश्चर्यं द्योतयति हे ब्रह्मन् हे शंभो हे देवा हे सुराः अवांतरभेदाभिप्रायेण सुरा देवाश्चेति संबो
धनद्वयं अस्यांगत्वविदम् यश्च सर्वे यूयं वो युष्माकं यथा श्रेयः स्यात्तथा मद्भिभावितमवहितचित्ताः सन्तः शृणुत अमरा
इति पाठांतरे तदा श्रेयो दर्शयति यथा मरा मृत्युरहिताः स्युरिति १८ यूयं सर्वे यात गच्छध्वं केन सह तावद्दानवैर्दैतेयैश्च
संधिर्विधीयतां सख्यं क्रियतां कीदृशैः कालेनानुगृहीतैः कालवशादनुकूलतां प्राप्तैः ननु ते संधिं यास्यंतीति शंका न कार्येति
तैरसुरैर्वो युष्माकं मात्मनः स्वस्य एव यावद्भवो वृद्धिः स्यात्तावत्संधिर्विधीयतामित्यर्थः १९ कार्य्यार्थिनः कुतो गर्व इत्यभिप्रायेणा
रयोपि संधेया इत्याह अरयोपीति कर्तव्यप्रयोजनस्य गौरवे भूयस्त्वे सति तदर्थमरयः शत्रवोपि संधेयाः एवं हि हे देवा अ

एक एवेश्वरस्तस्मिन् सुरकार्ये सुरेश्वरः विहर्तुकामस्तानाह समुद्रोन्मथनादिभिः १७ भ वा वा हंत ब्रह्मन्नहो शंभो
हे देवा मम भाषितं शृणुतावहिताः सर्वे श्रेयो वः स्याद्यथा सुराः १८ यात दानवदैतेयैस्तावत्संधिर्विधीयतां का
लेनानुगृहीतैस्तैर्यावद्वो भव आत्मनः १९ अरयोपि हि संधेयाः सति कार्यार्थगौरवे अहिमूषकवद्देवा ह्यर्थस्य प
दवीं गतैः २० अमृतोत्पादने यत्नः क्रियतामविलंबितं यस्य पीतस्य वै जंतुर्मृत्युग्रस्तोमरो भवेत् २१ क्षिप्त्वा क्षीरो
दधौ सर्वा वीरुत्तृणलतौषधीः मंथानं मंदरं कृत्वा नेत्रं कृत्वा तु वासुकिं २२ सहायेन मया देवा निर्मंथध्वमतंद्रिताः क्ले
शभाजो भविष्यंति दैत्या यूयं फलग्रहाः २३

र्थस्य प्रयोजनस्य पदवीं प्राप्तैः पश्चात् हि मूषकवद्ध्यघातुकभावेन वर्तितव्यं इति शेषः यद्वा पेटिकायां निरुद्धो हि येयानिर्गमद्वारवि
धानार्थं मूषकेण सह संधिं विधत्ते पश्चात्तमेव भक्षयति तथार्थपदवीं प्राप्तैः प्रथमं संधेया इत्यर्थः २० ततः तैः सह यत्कार्यं
तदाह अमृतेति सार्द्धेनार्थः अमृतं विद्यते नास्ति मृत्युर्यस्मात्तस्य पीतस्य सतः मृत्युग्रस्तोप्यमरो मृत्युरहितो भवेत् यस्य पान
स्येति संबंधमात्रे षष्ठी येन पीतेनामृतेन मृत्युग्रस्तोऽमरो भवेदित्यर्थः २१ अमृतोत्पादनप्रकारं विवृणोति क्षिप्त्वेति
वीरुधः गुल्माश्च तृणानि लता ओषधयश्च द्रुमाः सर्वाः क्षीरोदधौ क्षिप्त्वा मंदरं पर्वतं मंथानं मंथनदंडं कृत्वा वासुकिं नेत्रं र
ज्जुं कृत्वा २२ मया सहायेन हे देवा अतंद्रिताः यूयं निर्मंथध्वं ननु ते अमृतपानेनामराः स्युस्तत्राह क्लेशभाज इति दैत्यास्तु केव
लं क्लेशभाजो भविष्यंति यूयमेव फलग्रहा अमृतपायिनो भविष्यथेत्यर्थः २३

स्वाध्यायश्रुतसंपन्ना वेदशास्त्राध्ययनसंपन्नाः जन्मभिः कर्मभिश्च प्रसिद्धा वयममंगलं निःश्रेयसं महे रंगं पुच्छं न स्तोमः सभिप्रायेणाशु
सीस्थितान्दैत्यान्विलोक्य भगवान्पुरुषोत्तमः स्मयमानो विसृज्याग्रं सहितः पुच्छं जग्राह ३४ एवं स्थानकृतो ग्रहणस्थानविभागो
येषां ते कश्यपनंदना देवासुराः परमायत्ता उद्यताः पयोनिधिममृतार्थं ममंथुः ५ अर्णवे पयोदधौ मथ्यमाने सत्यनाधारोद्रि
मंदरोऽपोविशदपामधोभागे प्रविष्टोभूत् हे कुरुनंदन वलिष्ठैर्देवासुरैर्ध्रियमाणोप्यद्रिगौरवान्मू पश्चादधोविशादिति
पूर्वेणान्वयः ६ ते देवासुरास्तु अतिवलीयसा दैवेन हेतुना स्वपौरुषे नष्टे सति निर्विण्णमनसः अतएव परिम्लानमुखश्रियो
वभूवुः ७ विघ्नेशस्य विघ्नाधिदेवतस्य विघ्नेशनस्य तत्सार्वदस्य वा कस्यचिद्विर दवक्रादेर्विघ्नं चरित्वं तद्विघ्नमपित

गा३
नगस्तोमो वयं पुच्छमहेरंगममंगलं स्वाध्यायश्रुतसंपन्नाः प्रख्याता जन्मकर्मभिः ३३ इति तूष्णीं स्थितान्दैत्यान्विलोक्य
5 पुरुषोत्तमः स्मयमानो विसृज्याग्रं पुच्छं जग्राह सामरः ४ कृतस्थानविभागास्त एवं कश्यपनंदनाः ममंथुः परमायत्ताः
अमृतार्थं पयोनिधिं ५ मथ्यमानेर्णवे सोद्रिरनाधारो ह्यपोविशत् ध्रियमाणोपि वलिभिर्गौरवात्पांडुनंदन ६
ते सुनिर्विण्णमनसः परिम्लानमुखश्रियः आसन्स्वपौरुषे नष्टे दैवेनातिवलीयसा ७ विलोक्य विघ्नेशविधिं तदे
श्वरो दुरंतवीर्योऽवितथाभिसंधिः कृत्वा वपुः काच्छपमद्भुतं महत्प्रविश्य तोयं गिरिमुज्जहार ८ तमुत्थितं वीक्ष्य कु
लाचलं पुनः समुत्थिता निर्मथितुं सुरासुराः दधार पृष्ठेन स लक्षयोजनप्रस्तारिणा द्वीप इवापरो महान् ९
सुरासुरेंद्रैर्भुजवीर्यवेपितं परिभ्रमंतं गिरिमंगपृष्ठतः विभ्रत्तदावर्तनमादिकच्छपो मेनेंगकंडूयनमप्रमेयः १०

था संकल्पो दुरंतवीर्यः अपारवलो भगवानीश्वरोऽजितः महदद्भुतं च काच्छपं वपुर्धृत्वा तोयं जलं प्रविश्य गिरिं मंदरमु
ज्जहार उद्धृतवानित्यर्थः ८ तमुत्थितं कुलाचलं मंदरं वीक्ष्य सुराश्चासुराश्च पुनर्निर्मथितुं उत्थिताः वभूवुः गिरिं
विभ्रते कूर्मरूपिणं वर्णयति दधारेति लक्षयोजनानि प्रस्तारो विस्तारोऽस्यास्तीति तथा तेन पृष्ठेन मंदरमिति शेषः
दधार कथंभूतः अपरो द्वीप इव जंब्वादिद्वीप इव महान्विपुलदेहः ९ सुरासुरश्रेष्ठैः कर्तृभिर्भुजानां वेगेन वलेन वेपि
तं कंपितं भ्रमंतं गिरिं शृंगे हस्ताजेन पृष्ठे विभ्रदप्रमेयोऽपरिच्छिन्नवलशक्त्यादियुक्त आदिकच्छपरूपस्तदावर्तनं गिरिभ्रम
णमंगकंडूयनं मेने १०

उद्यममेवाह ततस्ते देवासुरा दुर्मदाः परिघा इव बाहवो येषां ते मंदरं गिरिमोजसा बलेनोत्पाट्य नदंतः शक्त्याधारणशक्त्या क्षीरोद
धिं निन्युः प्रापयितुं प्राक्रान्ता बभूवुः ३३ पुरा के वैरोचनि प्रमुखास्तेषु तथाः सर्वे दूरं भारोद्वहनेन श्रान्ता अतएव मंदरं गिरिं वोढुमपारयंतो ऽशक्नुवं
तः विवशाः पथि गिरिं विजहुस्तत्यजुः न्यपतंश्च ३४ स च गिरिस्तत्र पात्यमानः बहून् अमरासुरांश्च चूर्णयामास यतः स गिरिर्महता
भारेण कनकाचलः मेरुतुल्यः ३५ तदा तान् सुरदानवान् भग्नमनसः भग्नोत्साहान् कांश्चिद्भग्ना बाहव ऊरवः कंधराश्च येषां
तान् विज्ञाय भगवान् गरुडध्वजो गरुडारूढः आविर्बभूव ३६ गिरिपातेन निष्पिष्टांश्चूर्णीकृतान् सुरान् दानवांश्च विलो
क्य ईक्षया ऽमृतदृष्ट्या निर्जरान् देवान् निर्व्रणान् यथा ऽवजीवयामास असुरांस्तु नाजीवयदिति भावः ३७ तत एकेनैव हस्तेन

ततस्ते मंदरं गिरिमोजसोत्पाट्य दुर्मदाः नदंतः उदधिं निन्युः शक्त्या परिघबाहवः ३३ दूरभारोद्वहश्रान्ताः शक्रवैरो
चनादयः अपारयंतस्तं वोढुं विवशाः विजहुः पथि ३४ निपतन् स गिरिस्तत्र बहूनमरदानवान् चूर्णयामास
महता भारेण कनकाचलः ३५ तांस्तथा भग्नमनसो भग्नबाहूरुकंधरान् विज्ञाय भगवांस्तत्र बभूव गरुडध्वजः ३६
गिरिपातविनिष्पिष्टान् विलोक्यामरदानवान् ईक्षया जीवयामास निर्जरान् निर्व्रणान् यथा ३७ गिरिं चारोप्य गरुडे हस्ते
सुरा५ नैकेन लीलया आरुह्य प्रययावब्धिं सुरगणैर्वृतः ३८ अवरोप्य गिरिं स्कंधात् सुपर्णः पततां वरः ययौ जलांत उत्सृ
ज्य हरिणा स विसर्जितः ३९ इ श्री द्भा ग म पु ए म धे छो पं ६ अ ३ चे तेनागराजमाभंत्र्य फल
भागेन वासुकिं परिवीय गिरौ तस्मिन् नेत्रमब्धिं मुदान्विताः १ आरेभिरे सुरायत्ता अमृतार्थे कुरूद्वह हरिः पुरस्ता
ज्जगृहे पूर्वं देवास्ततो ऽभवन् तन्नैच्छन् दैत्यपतयो महापुरुषचेष्टितम् २

सुरा२ लीलया गिरिमुद्धृत्य गरुडे आरोप्य स्वयमप्यारुह्य सुरगणैर्वृतः पयोधिं ययौ ३८ ततः पततां पक्षिणां वरः श्रेष्ठः सुपर्णो गरुडः
स्कंधाद् गिरिमवरोप्य जलांते जलसमीप उत्सृज्य निधाय हरिणा विसर्जितः प्रस्थापितः ययाविमासुपर्णे अस्थिते वासुके रागमनाशं
भवान्न दागमनाय विसर्जितो ययौ इति भावः ३९ इ छ ल ६ ते देवासुराः फलभागेन तत्र वा प्यमृतभागो भवि
ष्यतीत्येवं वासुकिमामंत्र्य संप्रार्थ्य नेत्रीभूतं गिरेरुपरि वीयपरिवेष्ट्य मुदा युक्ता अमृतार्थमब्धिं मथितुमारब्धाः १
हे कुरूद्वह वासुकेस्तु वृंमुखं देवायत्ता हर्षितुमेव पूर्वं हरिः पुरस्तान्मुखं जगृहे ततो देवा जगृहुः तन्मुखग्रहणरूपं म
हापुरुषस्य हरेश्चेष्टितं दैत्याधिपा नैच्छन् २

भाअ मथ्नन्तमजितं वर्णयति मेघइवश्यामः उपमानानि श्यामाद्यैर्वचनैरितिसमासः कनकपरिधानः पीतांबरः कर्णद्योतमानविद्युल्लि
टी. ष्टरत्नकुण्डलः विपल्याकाशे मूर्ध्नि किरीटेनाक्रमेण चलिता स्रक्वनमालां बिभर्तीति तथा रक्ते नेत्रे यस्य सः जगताम् अभयदैर्दोर्भि
२३ भुजैर्दंदशूकं सर्पं गृहीत्वा मथ्ना गिरिणाऽभिमथ्नन्नथो धृताद्रिरजितोऽपरो गिरिरिवाशोभत १७ एवं निर्मथ्यमानादुदधेः
प्रथमं उल्बणं दुःसहं हलाहलाख्यं विषमुदभूत् कथंभूतादुदधेः संभ्रांता मीना उन्मकरा दर्पाश्च यस्मिंस्तस्मात् तिम्यादि
भिर्मत्स्यविशेषैराकुलाच्च १८ विषविशिष्टं ततो भीतानां सदाशिवप्रपत्तिमाह तदिति समप्रति प्रतिक्रियाशून्यमप्रति
मं वा कुतः उग्रः वेगो यस्य तदेवाह दिशि शरणं दुद्रुवुरिति १९ त्रिलोक्या भवाय समृद्ध्यै भगवान्यासह देव्या केला

6 मेघश्यामः कनकपरिधिः कर्णविद्योतविद्युन्मूर्ध्नि भ्राजद्विलुलितकचः स्रग्धरो रक्तनेत्रः जैत्रैर्दोर्भिर्जगदभय
दैर्दंदशूकं गृहीत्वा मथ्नन्मथ्ना प्रतिगिरिरिवाशोभताथो धृताद्रिः १७ निर्मथ्यमानादुदधेरभूद्विषं महोल्बणं
हालहलाह्वमग्रतः संभ्रांतमीनोन्मकराहिकच्छपात्तिमिद्विपग्राहतिमिंगिलाकुलात् १८ तदुग्रवेगं दिशि दिश्युपर्य
दस्कं४ धो विसर्पदुत्सर्पदसह्यमप्रति भीताः प्रजा दुद्रुवुरंग सेश्वरा अरक्ष्यमाणाः शरणं सदाशिवं १९ विलोक्य तं देववरं त्रि
लोक्या भवाय देव्याभिमतं मुनीनां आसीनमद्रावपवर्गहेतोस्तपो जुषाणं स्तुतिभिः प्रणेमुः २० प्र प य ऊचुः देव
देव महादेव भूतात्मन्भूतभावन त्राहि नः शरणापन्नान् त्रैलोक्यदहनाद्विषात् २१ त्वमेकः सर्वजगत ईश्व
रो बंधमोक्षयोः तं त्वामर्चंति कुशलाः प्रपन्नार्तिहरं गुरुम् २२

सेश्रामीनमपवर्गहेतोस्तपोजुषाणं मुनीनामभिमतं देवदेवं सदाशिवं विलोक्य स्तुतिभिः प्रणेमुः तुष्टुवुः प्रणेमुश्च २० स्तुतिमेवाह
देवेत्यादिना व्यक्तकर्मणा रुद्रेतेन तत्परमकारणभूतभगवदसाधारणैर्धर्मैरारोपितैर्वा तैः स्तुतिः क्रियत इति सर्वमुपप
न्नं रुद्रत्वविशिष्टानां शास्त्रदृष्ट्या रुद्रशरीरकपरमात्मपर्यंतत्वेन वा रुद्रस्य परमात्मावेशावताररूपत्वाद्वा सर्वं घटते
देव२ हे देव देवानामपि देव हे सर्वभूतानामात्मन् भूतभावन भूतस्रष्टः शरणंगतानस्मान् त्रैलोक्यं दहतीति तस्मात् कर्तरि
स्तुः विषात्त्राहि २१ सर्वस्य जगतो बंधमोक्षयोस्त्वमेक एवेश्वरः तमेवंभूतं प्रपन्नदुःखहरं त्वामेव कुशलाः सुधियः सर्चंता
राधयेति मोक्षेश्वर त्वं उपायोपदेशद्वारकं इष्टमि प्रापयेणाविघ्नेन च गुरुमिति २२

एवं जलेकच्छपवपुषा गिरिं बिभ्रद्देवविष्णुः पुनरसुरानसुररूपेणाविशत् कथंभूतः तेषामसुराणां बलं वीर्यं च ईरयन्वर्धयमानः
तथा देवेन रूपेण देवगणान् बलवीर्यादिकमुज्जीवयन्नाविशत् नागेन्द्रं वासुकिमबोधरूपः निद्रारूपः प्राविशत् ११ अग्रे
द्रुमुपरि गिरिरूपयद्यपरो गिरिराडिव सहस्रबाहुरेकेन हस्तेन गिरिमाक्रम्य पुनर्दिव्यभितः स्तुवद्भिर्ब्रह्मादिभिः कर्तृभिः सुमनोभिः
पुष्पैः करतोरभिवृष्टः तस्थौ १२ गिरिरूपर्यधस्तात्तेजनेत्रयोर्गिरिनेत्रयोरात्मनि देवासुरेषु च प्राविशता परेण परमेण पर
मात्मनासमेधिताः समुपोद्बलिताः अत एव मदोत्कटा देवासुरास्तरसा बलेन महाद्रिणा मंदरेणाक्षोभितनक्राणां च
क्रसमूहो यस्मिंस्तमब्धिं ममंथुः १३ तथा दृशः नेत्राणि च मुखानि च श्वासाश्चाहीन्द्रस्य वासुकेः साहस्रमपरि

अथासुरानाविशदासुरेण रूपेण तेषां बलवीर्यमीरयन् उद्दीपयन्देवगणांश्च विष्णुर्दैवेन नागेन्द्रमबोधरूपः
११ उपर्यगेन्द्रं गिरिराडिवान्य आक्रम्य हस्तेन सहस्रबाहुः तस्थौ दिवि ब्रह्मभवेन्द्रमुख्यैरभिष्टुवद्भिः सुमनोभि
वृष्टः १२ उपर्यधश्चात्मनि नेत्रगोत्रयोः परेण ते प्राविशता समेधिताः ममंथुरब्धिं तरसा मदोत्कटा महाद्रिणा क्षो
भितनक्रचक्रम् १३ अहीन्द्रसाहस्रकठोरदृङ्मुखश्वासाग्निधूमाहतवर्चसोऽसुराः पौलोमकालेयबलील्वलाद
यो दावाग्निदग्धाः सरला इवाभवन् १४ देवांश्च तच्छ्वासशिखाहतप्रभान् धूम्राम्बरस्रग्वरकंचुकाननान्
समभ्यवर्षन्मघवद्वशा घना ववुः समुद्रोर्म्युपगूढवायवः १५ मथ्यमानात्तथा सिंधोर्देवासुरवरूथपैः यदा
सुधा न जायेत निर्ममंथाजितः स्वयम् १६

मिताः कठोराये दृगादयः तेभ्यो निर्गताभ्यामग्निधूमाभ्यां हतं वर्चो येषां ते सुराः पौलोमादयः दावाग्निदग्धाः सरलाः द्रु
मविशेषास्त इवाभवन् १४ देवांश्च मघववशा इन्द्राधीना घना मेघाः समभ्यवर्षन् कथंभूतान् तस्य वासुकेर्यः श्वासः
तस्य शिखया हता प्रभा येषां धूम्राणि निश्वासधूमाक्रान्तानि वराणि वस्त्राणि स्रग्वराणि कंचुकान्याननानि च
येषां तान् किंच समुद्रस्योर्मिभिस्तरंगैरुपगूढाः सेविता वायवः पवनाश्च ववुः प्रससृः १५ यदा देवासुरैर्म
थ्यमानादप्यब्धेरमृतं न जायेत तदा भगवानजितः स्वयमेव निर्ममंथ मथनं चकार १६

समुद्रास्तव कुक्षिः गिरयः पर्वतास्तवस्थिसमुदायाः सर्वा ओषधयो वीरुधश्च तव रोमाणि छंदांसि गायत्र्यादीनि साक्षात्तव सप्तधातवः
हे त्रयीमयात्मन् वेदप्रचुरमूर्ते सप्रसिद्धो वेदोदितो धर्मः तव हृदयं २८ हे ईश पंचोपनिषदः तत्पुरुषाघोरसद्योजातवामदेवेशा
नाख्याः पंचानुवाकाः तव मु... रवानि मुखव्यापारात्मकाः इत्यर्थः मुखानि विशिनष्टि यैर्मंत्रैस्त्रिंशद्युत्तरमंत्रवर्गः प्रबोध
रत्रिंशन्मंत्राणां वर्गस्तेषामेव मंत्राणां परिच्छेदेनाष्टोत्तरत्रिंशत्कलात्मका मंत्रा इत्यर्थः हे देव यत्तत्प्रकाशं शिवाख्यं प
तिविश्वस्मात्परेश्वरं शान्तं शिवमच्युतमिति प्रसिद्धं परमात्मतत्त्वं तत्तवावस्थितिः यस्यात्मनेपरमात्मशरीरत्वे तत्तद् पृथक् सिद्धतेना
वास्थितमस्तीति तात्पर्यं २९ अधर्मस्योर्मिषु दंभलोभादितव छायायाः प्रकाशः अधर्मोर्मयः तव छायाभूता इत्यर्थः ये २५
स्मत्वादिभिर्गुणो विसर्गः प्रपंचस्रष्टि स्तानि सत्वरजस्तमांसि तव नेत्रत्रयं हे देव छंदोमयः गायत्र्यादिछंदः प्रचुरः

कुक्षिः समुद्रा गिरयोस्थिसंघा रोमाणि सर्वौषधिवीरुधस्ते छंदांसि साक्षात्तव सप्तधातवस्त्रयीमयात्मन्
हृदयं सधर्मः २८ मुखानि पंचोपनिषदस्तवेश यैस्त्रिंशदष्टोत्तरमंत्रवर्गः यत्तच्छिवाख्यं परमार्थतत्वं दे
वस्वयंज्योतिरवस्थितिस्ते २९ छायात्वधर्मोर्मिषु यैर्विसर्गो नेत्रत्रयं सत्वरजस्तमांसि सांख्यात्मनः शास्त्रकृ
तस्तवेक्षा छंदोमयो देव ऋषिः पुराणः ३० न ते गिरित्राखिललोकपाल विरिंचिवैकुंठसुरेंद्रगम्यं ज्योतिः
परं यत्र रजस्तमश्च सत्वं न यद्ब्रह्म निरस्तभेदं ३१ कामाध्वरत्रिपुरकालगराद्यनेकभूतद्रुहः क्षपयतः
स्तुतये न तत्ते यस्त्वंतकाल इदमात्मकृतं स्वनेत्रवह्निस्फुलिंगशिखया भसितं न वेद ३२

ईश्वराः १ पुरातनः ऋषिर्वेदः सांख्यात्मनः सर्वज्ञस्यात्मनः शास्त्रप्रणेतुस्तवेक्षा ... ३० हे गिरि... हे अखिललोकपाल ते तव परं ज्योतिः स्वप्रका
शाख्यं विरिंच्यादिभिर्गम्यं न भवति वैकुंठ उपेंद्रः सुरेंद्रः समभिव्याप्तस्तस्याप्यगम्यत्वमिति स्तुतिः यत्कार्यप्रकरणस्य रुद्रशरीरक परमात्मस
तिपरत्वात्परमात्मस्वरूपस्यापरिच्छिन्नत्वेन ते नापीयत्तयावगंतुमशक्यत्वाद्वैकुंठानाप्यगम्यत्वं सुतेज्योतिर्विशिनष्टि यत्र ज्यो
तिषि रजश्चादयः प्राकृतगुणा न संति यद्ब्रह्म यच्च निरस्तदेवमनुष्यादिभेदं ३१ कामश्चाध्वरश्च ... अनेके भूतद्रुहस्ता
न् क्षपयतः संहरतः ते तव स्तुतये तत्कामादिक्षपणात्मकं कर्म न भवति असत्यमेतदित्यर्थः तदेव कं विशिनष्टि यो भवांस्तु अंतकाले तस्य स्वस्य छंदि
इदं जगत् अंतकाले स्वनेत्रवह्निस्फुलिंगस्य शिखया भासितं भस्मसात्कृतं न वेद न जानातीत्यर्थः ३२

गुणमय्या त्रिगुणमय्या त्रिगुणात्मिकया स्वशक्त्यास्य सर्गादीन् यया स्वजगतः सर्गादीन् विधत्से करोषि हे विभो हे स्वदृक् स्वप्रकाश हे भूमन् ब्रह्मविष्णुशिवाभिधां धत्से बिभर्षि २३ गुह्यमौपनिषदं सदसद्भावनं चिदचिद्रूपपदार्थभावनं परं ब्रह्म त्वमेव ब्रह्मदृष्टिः स्वरूपादिति न्यायेन वेदविधाङ्गीताः स्तुवंस्त एव ब्रह्मत्वेन स्तुम प्यात्मानमव्रतभूतं त्वा त्वां वक्ष्यति रुद्रः अहो वत भवान्मेतत्प्रजानां पश्य वैशसं पुंसः रूपयतो भद्रं सर्वात्मा प्रीयते हरिः प्रीते हरौ भगवतीति आपन्नानां ब्रह्मणो ब्रह्मत्वेन स्तुतिं पश्य ति भवान् स्वे शरीरे चित्ता वशं यम्भूत द्रव्याभगवान् सर्वान्तरात्मा परब्रह्मभूतः स्तुत्य इति तिवक्ष्यति तत्तस्मान्न रूद्रः परत्वभ्रमः कार्यः तस्माद्रुद्रशरीरके परमात्मगताः सर्वे चेतनाचेतनाः कर्मणोदिता धर्मा इत्यवगन्तव्यं भूयसां स्याद्बलीयस्त्वं इति न्यायेन भगवन्नारतम्य स्य प्राधान्यो स्मिन्पुराणे प्रतिपादनात् नानाश[...] किंभिव्यभातश्चिदचित्कालादिशक्ति विशिष्टतया भातः प्रपंच

गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान्विभो धत्से यदा स्वदृग्भूमन् ब्रह्मविष्णुशिवाभिधां २३ त्वं ब्रह्म परमं गुह्यं सदसद्भावभावनः नानाशक्तिभिराभातस्त्वमात्मा जगदीश्वरः २४ त्वं शब्दयोनिर्जगदादिरात्मा प्राणेन्द्रियद्रव्यगुणस्वभावः कालः क्रतुः सत्यमृतं च धर्मस्त्वय्यक्षरं यत्त्रिवृदामनन्ति २५ अग्निर्मुखं तेखिलदेवतात्मा क्षितिं विदुर्लोकभवांघ्रिपंकजं कालं गतिं तेखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशं २६ नाभिर्नभस्ते श्वसनं नभस्वान्सूर्यश्च चक्षूंषि जलं स्म रेतः परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवन् शिरस्ते २७

त्वमेव जगदीश्वरस्तदन्तरात्मा च २४ त्वमेव शब्दयोनिः प्रकृतिर्मूलपंचकं स्वभावो विशेषणे प्राणेन्द्रियद्रव्यगुणस्वभावः प्राणादिविशेषणवानित्यर्थः कालादिशरीरकस्त्वमेव त्वच्छरीरको यः परमात्मा स एव कालादिशरीर इति तात्पर्यं सत्यमृतं च तं सत्यं परं ब्रह्म त्वमेव निर्विकारं सर्वान्तरात्मभूतं ब्रह्म त्वमेवेत्यर्थः धर्मशरीरकस्त्वं धात्वां त्वमेव त्रिवृत्त्रयाणां वर्तते यस्मिंस्तत् अकारोकारमकारात्मकमक्षरं प्रणवं त्वामेवामनन्ति तद्विषयकमेवामनन्तीत्यर्थः २५ विराड्रूपं स्तुवन्ति अग्निरिति अखिलदेवतात्मा अग्निः सर्वदेवतामयत्वेन अत्रातो अग्निस्ते तव मुखं क्षितिं पृथिवीं हे लोकभव तवांघ्रिपंकजं पादपद्मं विदुः कालं त्वखिलदेवतात्मनस्तव गतिं विदुः तथा दिशस्तव कर्णौ विदुः जलेशं वरुणं तव रसनं जिह्वां विदुः २६ नभ आकाशस्तव नाभिः नभस्वान्वायुस्तव श्वसनं श्वासः सूर्यस्तव चक्षुंषि नेत्राणि जलं तव रेतः तवात्मा परावरस्वरूपात्मनो जीवास्तेषामाश्रयणमाश्रयः आधारः सोम श्चन्द्रस्तव मनः हे भगवन् द्यौः स्वर्लोकस्तव शिरः २७ रा२

शास्त्रयोनित्वादित्युक्तं शब्दप्रमाणकं शब्दैकसमधिगम्यं ब्रह्म

भा.अ.टी. प्राणपरीप्सूनां जिजीविषूणामासां प्रजानां मे मयाऽभयं विधेयं हि यस्मात्प्रभोः समर्थस्यार्थः कर्तव्यं प्रयोजनमेतावानेव कि
२५ मन्यद्दीनानां परिपालनं इत्येतावानेव ३८ तथाहि साधवः क्षणभंगुरैः हेतुगर्भमिदं सर्वैः स्वकीयैः प्राणैः प्राणिनः पान्ति र
क्षन्ति किं प्राणा रक्षणीयेत्यत्र आह आत्ममायया भगवन्मायया मोहितेष्वत एव परस्परं बद्धवैरेषु भूतेषु कृपयतः कृपां कुर्वतः
पुंसः हे भद्रे सर्वात्मा भगवान्प्रीयते ३९ किं तत्प्रीत्या तत्र आह प्रीत इति वाङ्मयपूर्तौ हरौ प्रीते सति सचराचरोऽहमपि
प्रीये नितरामानन्दयुक्तो भवामि तस्मादिदं गरं विषं भुंजे भोक्ष्ये मे मत्तः प्रजानां स्वस्तिरस्तु अयमनवार्थः स्वस्ति एदन्तः स्वुवा ५५
र्थकः अत एव प्रयोगात् ४० एवमित्यभवानी मामे आमन्त्र्य विश्वसुखकरो भगवान्रुद्रः तद्विषं जग्धुमत्तुमारेभे त

आसां प्राणपरीप्सूनां विधेयमभयं हि मे एतावान्हि प्रभोरर्थो यद्दीनपरिपालनं ३८ प्राणैः स्वैः प्राणिनः पान्ति सा
४ धवः क्षणभंगुरैः बद्धवैरेषु भूतेषु मोहितेष्वात्ममायया पुंसः कृपयतो भद्रे सर्वात्मा प्रीयते हरिः ३९ प्रीते ह
रौ भगवति प्रीयेऽहं सचराचरः तस्मादिदं गरं भुंजे प्रजानां स्वस्तिरस्तु मे ४ श्रु उ च एवमामंत्र्य भगवान् भवा
नीं विश्वभावनः तद्विषं जग्धुमारेभे प्रभावज्ञान्वमोदत ४१ ततः करतलीकृत्य व्यापि हालाहलं विषं अभ
क्षयन्महादेवः कृपया भूतभावनः ४२ तस्यापि दर्शयामास स्ववीर्यं जलकल्मषः यच्चकार गले नीलं
तच्च साधोर्विभूषणम् ४३ तप्यन्ते लोकतापेन साधवः प्रायशो जनाः परमाराधनं तद्धि पुरुषस्याखिलात्मनः
श्री ४४ निशम्य कर्म तच्छंभोर्देवदेवस्य मीढुषः प्रजा दाक्षायणी ब्रह्मा वैकुंठश्च शशंसिरे ४५

प्रभावज्ञा अन्वमोदत अनुमोदितवती ४१ ततस्त्वनुमोदनानन्तरं सर्वतो व्यापि हालाहलाख्यं विषं करतलीकृत्य करतलमात्र
परिमितं कृत्वा अभक्षयत् स भक्तकरो महादेवः कृपया अभक्षयत् ४२ जलकल्मषरूपं विषं स्ववीर्यं स्वबलं तस्यापि रुद्रस्यापि दर्शया
मास यस्मात् रुद्रगले नीलं चकार तच्च नैल्यं साधो रुद्रस्य विशेषेण भूषणमेवाभूत् ४३ कृपालूनामियं परिपाटीत्याह
तप्यन्त इति प्रायशः साधवः साधु कुर्वन्ति परकार्यमिति साधवः स्वार्थनिरपेक्षपरकार्यसाधनस्वभावाः जनाः प्राय
शो लोकतापेन स्वयमपि तप्यन्ते न तत्व्यर्थमपि तु अखिलात्मनः परमपुरुषस्याराधनं तोषहेतुः ४४ मीढुषः आश्रित
शीर्षदुःखस्य शंभोर्देवस्य तद्विषपानरूपं कर्म श्रुत्वा प्रजाः दाक्षायणी ब्रह्मा च वैकुंठो भवानी च शशंसिरे प्रशंसितवन्तः इत्य
र्थः ४५

एवंभूतं त्वां मेनिरे इति तेषुरवो इत्याह येन त्वां उमया भवान्यासह चरं तं नितरां कामिनं कल्पयन्ते प्रलपयंति तथा श्मशाने चरंतमुग्रं
रेपरूपं हि त्वं चकल्पते कथंभूतमात्मकामा अग्रेयगुरवो विश्वहितो परे सारस्ते हि दिचितितमंघ्रि ईदृशस्य तथाभूतमपि तमि
सामिन्नं तेन नूनं तवेहितमविदन्निति काकुः त्वदीहितं नैव विदुरित्यर्थः अत एव हा नलज्ञाः गतत्रपाः यानि कानि चित्
निंदावचनानि तेषां मलदुरते रात्मीये नेतर स्तुतौ नासर्थमिति भावः ३३ एवंभूतं त्वां ब्रह्मादयो वोढुमेव न प्रभवः किंपुनः
स्तोतुं वयं तु न सुतरां प्रभव इत्याहुः तत्र स्मादुक्तविधं त्वात्तव सदसतो अपि रक्षिते नः कार्यावस्थयो अपरस्य विलक्षणस्य भ
मः कुतः यत स्ते वासर्गसर्गविषयाः तस्य च स्तवा वयमित्यर्थः अतो यदेतत्तव स्तवं प्यस्म ढक्ति मात्रे शक्त्यनुसार मात्रे ला ग्रं.२८१
येत्वात्मरामगुरुभिर्हृदि चिंतितांघ्रिद्वंद्वं चरंतमुमया तपसाभितप्तं कथंतद उग्रपरुषं निरतं श्मशाने ते नूनमूतिमविदं
स्तवहा तलज्जाः ३३ तत्तस्य ते सदसतोः परतः परस्य नांजः स्वरूपगमने प्रभवंति भूम्नः ब्रह्मादयः किमुत सं
स्तवने वयं तु तत्सर्गसर्गविषया अपि शक्तिमात्रं ३४ एतत्परं अपदृष्यामोन परंते महेश्वर मृडनाय हि लोक
स्य व्यक्तिरस्त्व व्यक्त कर्मणः ३५ अ उ च नहीप्य व्यसन ता सां क्रपयाम्मृ पापीडितः सर्वभूतसुहृद्देव इदमाह सतीप्रि
याम ३६ म दे उ चं अहोवत भवान्येतत्प्रजानां पश्य वैशसं क्षीरोदमथनोद्भूतात्कालकूटादुपस्थितं ३७
कृतमित्यर्थः ३४ नन्वेते सर्वे धर्म्माः त्वदुक्ताः पदमात्मसाधारणाः हेतुपुण्येपचिताधिकारविशेषमात्र कृष्णजीवः इत्यत्राह
१२ एतदिति हे परमेश्वर नेत्वतः परमुत्कृष्टं मर्थमधर्मं च तत्त्वेन यथा वयं न जानीमः किंतु लोकस्य मृडनाय सुखापादनाय त
वा व्यक्त कर्मणो व्यक्तिरियं तत्तु जानीम इत्यर्थः नूनं भवान्यरमात्मा भवतु भावा सर्वस्यापि चिदचिदात्मकस्य जग
तस्त्वात्मकत्वात्तवायतनत्वादिमत्वेन तं विना स्वनिष्ठ स्वरूपस्वभाव घोर भावातद्दृश्या तद्धर्मे रेव सर्वैस्तुतः
इति ३५ एवमुक्तो देवः प्रियामाहेत्याह अथुकः देवोरुद्रः स्तासां प्रजानां तत्कालकूटादुपस्थितव्यसनं दुःखं वीक्ष्य सकृप
तमुक्तः प्रियां सतीं भवानीं इदं वक्ष्यमाणमाह ३६ प्रियपाने प्रवृत्तं सोऽइ प्रियाया ऽरपदिति शोकया तामत्तु व्यापयन्नाह
अहो इति सार्द्धैस्त्रिभिः हे भवानि अहो वत महत्कष्टं इदं तत्प्रजानां वैशसं दुःखं पश्य वैशसं विशंसीनाध्ये मर्यना महु
द्भूतं कालकूटं विषं तस्मात्समुपस्थितं संप्राप्तमित्यर्थः ३७
श्री

भा०अ०टी० २६

ततश्चाप्सरस उद्बभूवुः कथंभूताः स्वर्णाभरणविशेषकंठाः शोभनानि वासांसि यासां ताः स्वर्गिणां सुंदरगतिभिर्लीलावलोकनैश्च रमण्यः प्रियाः स्वर्गिणां रतिकर्त्र्य इत्यर्थः ६ ततः साक्षाच्छ्रीर्लक्ष्मीराविर्बभूव कथंभूता भगवत्परा भगवदेकनिष्ठा हीं कांत्या दिशो रंजयंती यथा सौदामिनी विद्युत्तद्वत्सुदामा नाम पर्वतस्तत्संबंधिनी सौदामिनी स्फटिकादिमयगिरिशृंगेष्वधिकं स्फुरंती विद्युदिवकांत्यादिशो रंजयंतीत्यर्थः ७ तस्यां रूपादिमहिम्ना क्षिप्तं चित्तं येषां ते सर्वे ससुरदानवाः स्पृहां चक्रुः ८ भगवद्वक्षःस्थितया श्रिया विलोकितानां देवादीनां यथा पूर्वं सर्वसंपत्प्राप्तिस्तथा सुराणां तद्विपर्ययं च वक्तुं तस्या अभिषेकादिमहोत्सवपूर्वकं वक्षःस्थलविहारेण भगवत्प्राप्तिप्रकारमाह तस्या इत्यादिना अध्यासीदित्यतः प्राक्तनेन ग्रंथेन तस्या रमाया उ

ततश्चाप्सरसो जाता निष्ककंठ्यः सुवाससः रमण्यः स्वर्गिणां वल्गुगतिलीलावलोकनैः ६ ततश्चावि
रभूत्साक्षाच्छ्रीरमा भगवत्परा रंजयंती दिशः कांत्या विद्युत्सौदामिनी यथा ७ तस्यां चक्रुः स्पृहां सर्वे ससुरासु
9 रमानवाः रूपौदार्यवयोवर्णमहिमाक्षिप्तचेतसः ८ तस्या आसनमानिन्ये महेंद्रो महदद्भुतं मूर्तिमत्यः सरिच्छ्रे
ष्ठा हेमकुंभैर्जलं शुचि ९ आभिषेचनिका भूमिराहरत्सकलौषधीः गावः पंचपवित्राणि वसंतो मधुमाधवौ १० ऋ
षयः कल्पयांचक्रुरभिषेकं यथाविधि जगुर्भद्राणि गंधर्वा नट्यश्च ननृतुर्जगुः ११ मेघा मृदंगपणवमुर
जानकगोमुखान् व्यनादयन् शंखवेणुवीणास्तुमलनिःस्वनान् १२ ततोभिषिषिचुर्देवीं श्रियं पद्मकरां
सतीं दिगिभाः पूर्णकलशैः सूक्तवाक्यैर्द्विजेरितैः १३ समुद्रः पीतकौशेयवाससी समुपाहरत् वरुणः स्र
जं वैजयंतीं मधुना मत्तषट्पदाम् १४

पवेशनार्थमद्भुतं महच्च सिंहासनं इंद्र आनीय समर्पितवान् गंगादयः सरिच्छ्रेष्ठाः देहयुक्ताः सत्यः हेमकुंभैः शुद्धं जलमानिन्यिरे ९ भूमिरपि मूर्तिमती सकलाभिषेचनिका अभिषेकोचिता औषधीः सकला आहरत् गावः पंचगव्यं पवित्राणि तथा वसंतो ऋतुर्मधुमाधवौ चैत्रवैशाखभवफलपुष्पाद्युपाहरदित्यनुषंगः पाठांतरे हे वैवस्वत एवार्थः मधुमासेभवं मधु वित्तिवा १० ततः ऋषयो अभिषेकं यथाविधि अभिषेकोचितविधिं यथावत्कल्पयांचक्रुः गंधर्वाः भद्राणि मंगलानि जगुः न ट्यः नर्तक्यः स्त्रियः ननृतुर्जगुश्च ११ मेघा मूर्तिमंतो मृदंगादीन् वाद्यविशेषान् शंखवेणुवीणाश्च व्यनादयन् तुमलो निःस्वनो येषां तान् मृदंगादीश्च १२ १३ १४

शंभोर्विषं पिबतः सतो यत्किंचित्प्रस्कन्नं गलितं तद्विषं तक्षकादयः प्राणोऽजगृहुः विषौषधयः कांतुककरवीरादयः दंदशूका
दशनस्वभावाः अन्ये तेन वः सर्पाणामुक्तत्वात् ५६ ३ पञ्चमः ७ इत्थं एव पाकेणास्ते एणाशरे विषे भक्षिते सति प्री
वा तास्ते सुरासुरा नैश्रेष्ठाः वैरोचनादय अतरसा बलेन सिंधुं ममंथुः ततः विषादनंतरं हविर्धानी सुरभिः कामधेनुरभ
वत् १ तां हविर्धानीमग्निहोत्रीं दधिघृतादि हविः प्रधानेनाग्निहोत्रादि वैदिककर्मनिष्पादिनीं ब्रह्मवादिनो ऋष
य आजगृहुः स्वीकृतवंतः किमर्थं हे नृप देवयानस्य देवा यान्ति यस्मिन्कर्मणि इति तथा तस्य यज्ञस्य संबंधि मेध्याय हविषे प
यआदिहविरर्थं २ ततो हरिश्चन्द्रवानं तरं चंद्रवत्पांडुरः अश्वोऽश्वः उच्चैःश्रवा इति प्रसिद्धः उद्भवत् तस्मिन्नुच्चैःश्रवस

प्रस्कन्नं पिबतः पाणेर्यत्किंचिज्जगृहुः स्म तत्। वृश्चिकाहिविषौषध्यो दंदशूकाश्च ये परे ५६ ३ श्री भा ग
स्के स मो यः ७ अथ वा पीते गरे वृषांकेण प्रीतास्ते मरदानवाः ममंथुस्तरसा सिंधुं हविर्धानी ततो
भवत् १ ताममग्निहोत्रीमृषयो जगृहुर्ब्रह्मवादिनः यज्ञस्य देवयानस्य मेध्याय हविषे नृप २ तत उच्चैःश्र
वा नाम हयो भूच्चन्द्रपांडुरः तस्मिन् बलिः स्पृहां चक्रे नेन्द्र ईश्वरशिक्षया ३ तत ऐरावतो नाम वारणे
न्द्रो विनिर्गतः दन्तैश्चतुर्भिः श्वेताद्रेर्हरन्भगवतो महिं ४ कौस्तुभाख्यमभूद्रत्नं पद्मरागो महोदधेः तस्मिन्म
णौ स्पृहां चक्रे वक्षोऽलंकरणे हरिः ५ ततोऽभवत्पारिजातः सुरलोकविभूषणं पूरयत्यर्थिनो योऽर्थैः शश्वद्भुवि यथा भवा
नु ६

ये ईश्वरशिक्षया लोभः कार्यो न वेति ज्ञात्वा रोषः कामस्तु वस्तुषु इत्याद्युक्तरीत्या शिक्षया इन्द्रः स्पृहां न चक्रे उच्चैःश्रवसस्तन्नाम
पि स्पृहामभिव्यक्तां न चक्रे किंतु मनस्येवाधादिति भावः बलिस्तु स्पृहां चक्रे प्रसिद्धा इत्यर्थः ३ तत उच्चैःश्रवस उदयानंतरं ऐ
रावतो नाम वारणेन्द्रः गजश्रेष्ठः विनिर्गतः कथंभूतः भगवतो रुद्रस्य श्वेताद्रेः कैलासस्य महिं महात्म्यं शोभां चतुर्भिर्दं
तैः शिखरतुल्यैर्हरन् चंद्रवत्पांडुर इत्यनुषंगः ४ ततोऽष्टौ दिग्गजा अभवन् अतो हि न्वष्ट अभ्रमुस्वादयोऽष्टौ करिण्योऽभवन्
ततो महोदधेः कौस्तुभाख्यं रत्नमभूत् तच्च पद्मरागो मणिः तस्मिन्महामणौ भगवान् हरिः वक्षसोऽलंकरणनिमित्ते स्पृ
हां चक्रे ५ ततः पारिजातो वृक्षः सुरलोकस्य विभूषणभूतोऽभवत् कथंभूतः यः शश्वत् यदर्थिनः प्र
र्थैः पूरयति पूरयन्नर्थान् पूरयन् भुवि भवानर्थान् पूरयत्यर्थिनामर्थैस्तथाभूत इत्यर्थः ६

कश्चिन्मार्कंडेयादिश्चिरायुरस्ति न तु शीलं मंगलं चास्ति अशिवधर्मशीलत्वादिति भावः कश्चित्तदप्यस्ति चेदायुषः स्थैर्यं न वेद्यं निश्चेयं कुत्रचिदु-
भयं चिरायुष्ट्वं शीलं चास्ति तथापि स रुद्रादिरमंगलः अमंगलवेषः भगवंतं लक्ष्मीः कल्याह्यस्य कालेन सद्गुणाश्रयं निरवद्यानि
रतिशयमंगलमूर्तिर्भगवान्स तु मां न हि कांक्षते स्वत एव पूर्णत्वादिति भावः २१ एवं स्थैर्यं विमृश्य परमा लक्ष्मी निरपेक्षमपि मु-
कुंदमेव परं पतिं वव्रे तत्र हेतुं वदन्मुकुंदं विशिनष्टि अव्यभिचारिभिरन्येतरसाधारणैर्मंगलगुणैर्निजैः स्वकीयैर्नि-
रुपाधिकैराश्रयत्वः आश्रयणादरे सर्वोत्कृष्टं अगुणाश्रयं सत्वादिप्राकृतगुणानाश्रयं च निजैकाश्रयतागुणाश्रयं इति पाठे
न्तरे तदा निजैरव्यभिचारिसद्गुणैराश्रयतया प्राकृतगुणानाश्रयं वरं उत्कृष्टं इत्यर्थः सर्वगुणैराश्रयणे सौकार्यं वैराग्य

२० कश्चिच्चिरायुर्नहि शीलमंगलं कश्चित्तदप्यस्ति न वेद्यमायुषः यत्रोभयं कुत्र च सोऽप्यमंगलः सुमंगलः कश्च न कांक्ष-
ते हि मां २१ एवं विमृश्याव्यभिचारिसद्गुणैर्वरं निजैकाश्रयतो गुणाश्रयं वव्रे वरं सर्वगुणैरपेक्षितं रमा मुकुंदं
श्रि निरपेक्षमी[illegible]तं २२ तस्यांसदेश उशतीं नवकंज[illegible]मालां माद्यन्मधुव्रतवरूथगिरोपघुष्टां तस्थौ निधाय निक-
टे तदुरः स्वधाम सव्रीडहासविकसन्नयनेन याता २३ तस्याः श्रियस्त्रिजगतो जनको जनन्या वक्षो निवासमक-
रोत्परमं विभूतेः श्रीः स्वाः प्रजाः सकरुणेन निरीक्षणेन यत्र स्थितैधयत साधिपतींस्त्रिलोकान् २४ शंखतू-
र्यमृदंगानां वादित्राणां [illegible]पृथुः स्वनः देवानुगानां सस्त्रीणां नृत्यतां गायतामभूत् २५

णीयत्वेनापेक्षितमत एवेप्सितमाप्तुमिच्छाविषयं मुकुंदं वरं वव्रे २२ उक्तं वरणप्रकारमेवाह तस्येति तस्य मुकुंदस्यांशदेशे स्कंधप्रदेशे काम-
नीयां नवकंजमालां निधाय तदुरो गृहं प्रतीक्षमाणा तूष्णीं तस्य निकटे तस्थौ कथंभूतां मालां माद्यतां मधुपानमत्तानां मधुव्र-
तानां भ्रमराणां वरूथस्य समुदायस्य गिरोपघुष्टां ध्वनितां कथंभूता लक्ष्मीः सव्रीडहासेन विकसन्नयनेन तेन तस्य भग-
वत उरो वक्षः स्वधाम स्वाश्रयं याता तद्वक्षः स्वाश्रयत्वेन प्रतीक्षमाणा सतीत्यर्थः २३ त्रिजगतो जनन्यास्तस्या अखिलभूता-
श्रयभूतायाः श्रियः त्रिजगज्जनको भगवान्स्वं वक्ष एव परं निवास[illegible]स्यानमकरोत् यत्र वक्षसि स्थिता श्रीः सकरुणेन निरीक्षणे-
न स्वाः प्रजाः साधिपतींस्त्रिलोकांश्चैधयता वर्धयत् २४ तदा शंखादीनां वाद्यानां सस्त्रीणां देवानुगानां गंधर्वादीनां
नृत्यतां गायतां पृथक्[illegible]पृथक् ध्वनिरभूत् २५

विश्वकर्मा प्रजापतिः भूषणानि सरस्वती हारमजो ब्रह्मा पद्मं नागाश्च कुंडले उपाहरन् १५ ततः कृतमंगलायनाया श्रीर्नदंतो द्वि
रेफा भ्रमरा यस्यां तां उत्पलस्रजं पाणिना परिगृह्य निरस्तनिखिलदोषस्य समस्तकल्याणगुणाकरस्य स्वाभिमतस्य पुंसः कंठे निधातुं परीक्ष्येति भावः चचाल
कथंभूता सती शोभनयोः कपोलयोः कुंडले प्रचलती यस्मिन् सव्रीडो हासः यस्मिंस्तत्सुशोभनमतिसुंदरं वक्त्रं दधती १६ तथा चंद
नकुंकुमाभ्यां उक्षितं सिक्तं समं निरंतरं स्तनद्वयं तच्च चारु सुंदरं कृशोदरं च दधती साध्वी नूपुराणां वल्गुभिर्मधुरैः शिंजितैरितस्ततः वि
सर्पती चलती हेमलतेव बभौ १७ तत आत्मनः स्वस्याः पदमाश्रयं ध्रुवं नित्यमव्यभिचारिणो नित्याः स्वाभाविकाः संतः कल्याणगुणा य
स्मिंस्तं निरवद्यं निरस्तहेयगुणं एवंभूतं पदं गंधर्वादिष्वविलोकयंती विचारयंती नान्वविंदत् नापश्यत् कोपि तादृशो नास्ति
नाविंदतेति भावः १८ तदेवाह नूनमिति यस्य रुद्रदुर्वासःप्रभृतेस्तपोऽस्ति तस्य मन्युनिग्रहस्तु नास्ति नूनमिति निश्चये यस्य तु

भूषणानि विचित्राणि विश्वकर्मा प्रजापतिः हारं सरस्वती पद्ममजो नागाश्च कुंडले १५ ततः कृतस्वस्त्ययनोत्पलस्र
जं नदद्द्विरेफां परिगृह्य पाणिना चचाल वक्त्रं सुकपोलकुंडलं सव्रीडहासं दधती सुशोभनं १६ स्तनद्वयं चातिकृशोदरी
समं निरंतरं चंदनकुंकुमोक्षितं ततस्ततो नूपुरवल्गुशिंजितैर्विसर्पती हेमलतेव सा बभौ १७ विलोकयंती निरवद्यमात्मनः
पदं ध्रुवं चाव्यभिचारिसद्गुणं गंधर्वयक्षासुरसिद्धचारणत्रैपिष्टपेयादिषु नान्वविंदत १८ नूनं तपो यस्य न मन्युनिर्जयो
ज्ञानं क्वचित्तच्च न संगवर्जितं कश्चिन्महांस्तस्य न कामनिर्जयः किमीश्वरो यः परतो व्यपाश्रयः १९ धर्मः क्वचित्तत्र न भूत
सौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणं वीर्यं न पुंसोस्त्यजवेगनिष्कृतं नहि द्वितीयो गुणसंगवर्जितः २०

गुरुशुकादेर्ज्ञानमस्ति न तस्य ज्ञानं संगवर्जितं किंतु फलसंगादियुक्तमेव कश्चिद्ब्रह्मादिर्महांस्तत्रापि न तस्य कामनिर्जयोस्ति इंद्रादेरेव पत्नीत्वेन गृहीत
तादिति भावः यः परतो व्यपाश्रयः परमपेक्षते स्वरक्षार्थमाश्रयः इंद्रादिः स किमीश्वरः अनीश्वर एवेति भावः १९ क्वचित्समादौ धर्मोस्ति
तथापि न भूतसौहृदमस्ति त्यागः क्वचिच्छिबिप्रभृतिष्वस्ति यस्त्यागः शिब्यादिगतः स न मुक्तिकारणं न मुक्तिहेतुः पुंसः कार्तवीर्यादेः
वीर्यमस्ति तथापि तदजवेगेन कालवेगेन निष्कृतं परिहृतं तु न भवति द्वितीयः भगवतोन्यः कश्चिदपि सनकादिरपि सत्वांश
केन गुणसंगवर्जितो न भवति न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः सत्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात्त्रिभिर्गुणैरिति स्मृ ८२
तेरित्यागुणत्रयनिर्मुक्तस्य भगवदन्यस्य कस्यापि जीवेरभावादिति भावः २०

वीर्यं प्राचीनत्वात्

अमृतभाजने तस्मिन्कलशे दैत्यैर्नीयमाने देवा विषण्णमनसः खिन्नचित्ताः हरिं शरणमाययुः ३५ इत्थं दैन्यमालो
कय भक्तानां काममिष्टं करोतीति तथा भगवान्मिथो दैत्यानां परस्परं कलहोत्पादनेन योगमायया मोहित्वा वो युष्माकं कामं साधयिष्या
मि ३६ इतीत्थमुक्तो देवान्सान्त्वयन्हरिस्तत्रैवान्तर्दधे मिथः कलहमेवाह मिथः तदर्थमृतनिमित्तेन तर्षः कामस्तद्युक्तानि चेतांसि ये
षां दैत्यानां परस्परं कलिः कलहः बभूव कलहप्रकारमेवाह अहमिति हे प्रभो राजन्नहं पूर्वमहमेव पूर्वं पास्यामि न त्वमित्ये
वं कलिरभूदित्यर्थः ३७ तत्र दुर्बलानां दैत्यानामाक्रोशप्रकारमाह देवा अपि स्वममृतभागमर्हन्ति कुतः यतो येऽपि देवाः
तुल्येनायासेन हेतवः साधकाः यथा सत्रयागे य एव याजकास्त एव ऋत्विज इति यजमाना भिन्नऋत्विक्कर्तृके बहुयजमानके

४१ नीयमानैः सुरैस्तस्मिन्कलशेऽमृतभाजने विषण्णमनसो देवा हरिं शरणमाययुः ३५ इति तद्दैन्यमालोक्य भगवान्भृत्यकामकृ
त् मा खिद्यत मिथोऽर्थं वः साधयिष्ये स्वमायया ३६ इत्युक्त्वा सान्त्वयन्देवांस्तत्रैवान्तर्दधे हरिः मिथः कलिरभूत्तेषां त
दर्थे तर्षचेतसां अहं पूर्वमहं पूर्वं न त्वं न त्वमिति प्रभो ३७ देवाः स्वं भागमर्हन्ति ये तुल्यायासहेतवः सत्रयाग इ
वैतस्मिन्नेष धर्मः सनातनः ३८ इति स्वान्प्रत्यषेधन्वै दैतेया जातमत्सराः दुर्बलाः प्रबलान्राजन्गृहीतकल
शान्मुहुः ३९ एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः योषिद्रूपमनिर्देश्यं दधार परमाद्भुतं ४० प्रेक्षणीयोत्पलश्यामं
सर्वावयवसुन्दरं समानकर्णाभरणं सुकपोलोन्नसाननम् ४१ नवयौवननिर्वृत्तस्तनभारकृशोदरं मुखामोदानुर
क्तालिझंकारोद्विग्नलोचनम् ४२ बिभ्रत्स्वकेशभारेण मालामुत्फुल्लमल्लिकां सुग्रीवकण्ठाभरणं सुभुजा
ङ्गदभूषितम् ४३

वत्सर्वेषां समं फलं तद्वदयमेव सनातनो धर्मः ३८ इतीत्थं हे राजन्स्वान्गृहीतकलशान्प्रबलान्दैत्यान् दुर्बला दैतेया जातमत्सराः सन्तो मु
हुर्मुहुः प्रत्यषेधयन्न्यवारयन् ३९ एतस्मिन्समये सर्वोपायविद्भगवानीश्वरो विष्णुः परमाद्भुतं केनाप्यदृष्टपूर्वमनिर्देश्यं देवादिस्त्रीसजा
तीयत्वेन निर्देष्टुमशक्यं योषिद्रूपं दधार ४० तद्रूपं वर्णयति पञ्चभिः प्रेक्षणीयमुत्पलमिव श्यामं सर्वेष्ववयवेषु सुन्दरं समानयोः क
र्णयोराभरणे यस्मिन् सुकपोलं चेतदुन्नतनासिकं चाननं यस्मिन् ४१ नवयौवनानिर्वृत्तयोः प्रवृत्तयोः स्तनयोर्भारेण कृशमुद
रं यस्मिन् मुखवास्यामोदेनानुरक्तानामलीनां झंकारेणोद्विग्ने चञ्चले लोचने यस्मिन् ४२ उत्फुल्लानि मल्लिकाकुसुमानि यस्यां तां मालां
स्वकेशभारेण बिभ्राणं शोभना ग्रीवा यस्मिन् तच्च — कण्ठे आभरणानि यस्य तत् शोभनयोर्भुजयोरङ्गदाभ्यां भूषितं ४३

तथा ब्रह्मादयः सर्वे विश्वस्य स्रष्टारः पुष्पाणि वर्षतः विभुं भगवंतं तल्लिंगैर्भगवद्गुणप्रतिपादकैरवितथैः सत्यैर्यथावस्थितार्थ
प्रतिपादकैर्नत्वारोपितगुणप्रतिपादकैरित्यर्थः मंत्रैरीडिरे नुष्टुवुः २६ देवाः सप्रजापतयः श्रियावलोकिताः शीलादिगुणसंपन्नाः
परां निर्वृतिमानंदं लेभिरे २७ दैत्यादानवाश्च यदा लक्ष्म्योपेक्षितास्तदैव हे राजन्निःसत्वा निर्बला अत एवानिरुद्योगा गतल
ज्जाः लोलुपा विमोहशीला बभूवुः २८ अथ श्रियः उद्गमनानंतरं वारुणी वरुणदैवत्यं यत्तन्मद्यं सुराधिदेवता कन्या कमले इ
व लोचने यस्याः सासीदुद्बभूव तां च हरेरनुज्ञयाऽसुरा जगृहुः २९ अथामृतार्थिभिः काश्यपैर्देवासुरैर्मथ्यमानादुद
धेः हे राजन् परमाद्भुतः पुरुष उदतिष्ठदुद्बभूव ३० तं विशिनष्टि दीर्घौ पीवरौ च यौ दोर्दंडौ यस्य कंबुवत्कंठे रेखवत्त्रिरेखा वल्लाच

ब्रह्मरुद्राङ्गिरोमुख्याः सर्वे विश्वसृजो विभुं ईडिरेऽवितथैर्मंत्रैस्तल्लिंगैः पुष्पवर्षिणः २६ श्रियावलोकि
तादेवाः सप्रजापतयः प्रजाः शीलादिगुणसंपन्ना लेभिरे निर्वृतिं परां २७ निःसत्वा लोलुपा राजन्निरुद्योगाः
गतत्रपाः यदा चोपेक्षिता लक्ष्म्या बभूवुर्दैत्यदानवाः २८ अथासीद्वारुणी देवी कन्या कमललोचना असु
रा जगृहुस्तां वै हरेरनुमतेन ते २९ अथोदधेर्मथ्यमानात्काश्यपैरमृतार्थिभिः उदतिष्ठन्महाराजपुरुषः प
रमाद्भुतः ३० दीर्घपीवरदोर्दंडः कंबुग्रीवोऽरुणेक्षणः श्यामलस्तरुणः स्रग्वी सर्वाभरणभूषितः ३१ पीत
वासा महोरस्कः सुमृष्टमणिकुंडलः स्निग्धकुंचितकेशांतः सुभगः सिंहविक्रमः ३२ अमृतापूर्णकलशं बिभ्रद्व
लयभूषितः ३२ स वै भगवतः साक्षाद्विष्णोरंशांशसंभवः धन्वंतरिरिति ख्यात आयुर्वेददृगिज्यभाक् ३३ तमा
लोक्यासुराः सर्वे कलशं चामृताभृतं लिप्संतः सर्ववस्तूनि कलशं तरसाहरन् ३४

ग्रीवा यस्य अरुणे ईक्षणे यस्य मेघवद्वपुः श्यामः तरुणो युवा स्रग्वी वनमाली सर्वैराभरणैरलंकृतः ३१ पीते वाससी यस्य महद्विपुलमुरो वक्षो
यस्य सुमृष्टे निर्मले मणिमये कुंडले यस्य नीलः कुंचितः कुटिलः केशानामंतो यस्य सः सुभगः सुकुमारः सर्वांगवस्तुरेखा सिं
हस्येव विक्रमः पादविन्यासो यस्य अमृतामृतेन पूर्णं कलशं बिभ्राणः वलयैरलंकृतः ३२ कोसावित्यत आह स वै साक्षाद्भगवतो हरेरंशांश
संभवो यस्य स तु धन्वंतरिरिति प्रसिद्धः आयुर्वेददृक् इज्यभाग् यागभागी च ३३ तममृतकलशं बिभ्रतं धन्वंतरिमालोक्य सर्वे सुराः
सर्ववस्तूनि मथनादुत्पन्नानि लिप्सन्तोऽमृतेनाम्ना पूर्णं कलशं तरसा बलेन [illegible] आहरन् हृतवंतः ३४

भा॰स्क॰टी॰ दैत्यैरित्युपामंत्रित इत्यादितो मायायोषिद्वपुरात्मीयसंकल्पोपात्तस्त्रीवपुर्हरिः प्रहस्य सुंदरैरपांगैरीक्षन्निदं वक्ष्यमाणमब्रवीत् ८ तदेवाह॥
२९ कथमिति हे कश्यपदायादाः पुंश्चल्यां मयि कथं संगताः अनुरक्ता हि यस्मात्पंडितः कदाचिदपि कामिनीषु पुंश्चलीषु विश्वासं न याति
न कुरुत इत्यर्थः ९ हे सुरद्विषः शालावृकाणां स्वैरिणीनां स्त्रीणां च सख्यान्यनित्यान्याहुः रनित्यत्वे हेतुं वदन् शालावृकान् स्त्रीश्च वि
शिनष्टि नूत्नं नूत्नं किंचिन्नूतनमन्वेषताम् १० इतीत्थं तस्या मोहिन्याः क्ष्वेलितैः परिहासवचनैः विश्वस्तं मनो येषां तेऽसु
राः भावेन केनाप्यभिप्रायेण गंभीरं यथा भवत्येवं हसितवंतः अमृतपात्रं च ददुः ११ ततोऽमृतभाजनं गृहीत्वा योषि
५६ द्रूपो हरिरीषत्स्मितेन शोभा यस्यास्तया गिरा बभाषे तदेवाह यदिति क्वचित्साध्वसाधु वा मया कृतं यद्यभ्युपेतं युष्माभिरंगीकृ

शु उ च इत्युपामंत्रितो दैत्यैर्मायायोषिद्वपुर्हरिः प्रहस्य रुचिरापांगैर्निरीक्षन्निदमब्रवीत् ८ भ ग वा कथं कश्यपदाया
दाः पुंश्चल्यां मयि संगताः विश्वासं पंडितो जातु कामिनीषु न याति हि ९ शालावृकाणां स्त्रीणां च स्वैरिणीनां सुरद्विषः
72 सख्यान्याहुरनित्यानि नूत्नं नूत्नं विचिन्वतां १० शु उ च इति ते क्ष्वेलितैस्तस्या आश्वस्तमनसोऽसुराः जहसुर्भा
वगंभीरं ददुश्चामृतभाजनम् ११ ततो गृहीत्वामृतभाजनं हरिर्बभाष ईषत्स्मितशोभया गिरा यद्यभ्युपेतं क्व च
साध्वसाधु वा कृतं मया वो विभजे सुधामिमां १२ इत्यभिव्याहृतं तस्या आकर्ण्यासुरपुंगवाः अप्रमाणविदस्तस्या
स्तत्तथेत्यन्वमंसत १३ अथोपोष्य कृतस्नाना हुत्वा च हविषानलं दत्वा गोविप्रदेवेभ्यः कृतस्वस्त्ययना द्विजैः
१४ यथोपजोषं वासांसि परिधायाहतानि ते कुशेषु प्राविशन्सर्वे प्राक्कूलेष्वभिभूषिताः १५ प्राङ्मुखेषूपविष्टे
षु सुरेषु दितिजेषु च धूपामोदितशालायां जुष्टायां माल्यदीपकैः १६

तं स्यात्तर्हीमां सुधां वो युष्मभ्यं विभजे १२ इतीत्थं तस्या मोहिन्या अभिव्याहृतं वाक्यमाकर्ण्य प्रमाणं तद्वाक्यनिश्चयस्तमजानंतः तथे
ति यथेष्टं कुरु इत्यन्वमंसत अनुजज्ञिरे १३ अथ तस्या अनुज्ञया उपोष्य कृतस्नानैर्यैः तेऽसुराः सुराश्च हविषा चरुणाऽनलम
ग्निं हुत्वा विप्रेभ्यो भूतेभ्यो अन्येभ्यश्च गाः गवादीन्यथायोग्यं दत्त्वा द्विजैः स्वर्वं कारितं स्वस्त्ययनं मंगलाचरणं येषां १४ ते दे
वासुराः यथोपजोषं यथाप्रीत्यहतानि नूतनानि सद्योयंत्रान्निर्मुक्तानि वस्त्राणि वसित्वाऽभितोऽभिभूषिताः सर्वे प्राक्कूले
षु प्रागग्रेषु कुशेषु प्राविशन्नुपविविशुः १५ ततो धूपैरामोदितायां माल्यैर्दीपैश्च जुष्टायां मलेहृतायां दीपितायां च शा
लायां पूर्वाभिमुखेषु सुरासुरेषूपविष्टेषु सत्सु १६

विरजांवरेणसंवीतः नितंब एव द्वीपः विशालत्वात्तद्धशोभायस्यास्तया कांच्या प्रकर्षेणविलसद्वल्गुसुंदरं यथाभवत्येवं चलतोश्चरणयोर्नू
पुरेयस्मिन् ४४ सव्रीडस्मितेन सह विक्षिप्ता कंपिता याभ्रूस्तस्याविलासेन सह या न्यवलोकनानि तैर्दैत्ययूथपानां चेतस्सुमुहुर्मुहुः का
ममुद्दीपयन् ४५ ॥ इ ७ ७ ध्या ८ एवंविधं रूपं बिभ्रतीमायांतीं तां स्त्रियमन्योन्यं त्यक्तसौहृदा अतएवाक्षिपंतः सुधापात्रं चौर्य
धर्मेणहरं तस्तैदैत्या ददृशुः १ दृष्ट्वाचाहोरूपमसौंदर्यमहोधामद्युतिरहोस्या योषितो नवं वयः इतिवदंतः स्ते दैत्यास्तां योषितमनु
ल्याभिमुखमागत्य जातहृच्छयाः संजातकामाः पप्रच्छुः २ प्रश्नप्रकारमेवाह केति हे कंजपलाशाक्षिका त्वं किं जातीमा कुत आग मि ४
तात्वं किंचिकीर्षसि कर्तुमिच्छसि कस्यसंबंधिन्यसि वद हे वामोरु नोस्माकं मनांसि मथ्नंतीव क्षोभयंतीव वर्त्तसे ३ कस्यासीदुतो ति ३

विरजांवरसंवीतनितंबद्वीपशोभया कांच्याप्रविलसद्वल्गुचलच्चरणनूपुरं ४४ सव्रीडस्मितविक्षिप्तभ्रूविलासावलोक
नैः दैत्ययूथपचेतस्सु काममुद्दीपयन्मुहुः ४५ इ श्री द्रा व म ए म धे मो पः ८ अ उ च तेन्योन्य
मसुराः पात्रे हरं तस्त्यक्तसौहृदाः क्षिपंतो दस्युधर्मेणायांतीं ददृशुः स्त्रियं १ अहोरूपमहोधामअहोअस्यानवं
वयः इति ते तामभिद्रुत्य पप्रच्छुर्जातहृच्छयाः २ दैत्या ऊचुः कात्वं कंजपलाशाक्षि कुतो वा किं चिकीर्षसि कस्यासि
वद वामोरु मथ्नंतीव मनांसि नः ३ न वयं त्वामरैर्दैत्यैः सिद्धगंधर्वचारणैः नास्पृष्टपूर्वां जानीमो लोकेशैश्च कु
तो नृभिः ४ नूनं त्वं विधिना सुभ्रू प्रेषितासि शरीरिणां सर्वेंद्रियमनःप्रीतिं विधातुं सघृणेन किम्
५ सा त्वं नः स्पर्द्धमानानामेकवस्तुनि मानिनि ज्ञातीनां बद्धवैराणां शं विधत्स्व सुमध्यमे ६ वयं कश्य
पदायादा भ्रातरः कृतपौरुषाः विभजस्व यथान्यायं नैव भेदो यथा भवेत् ७

मस्माभिः पर्वतपतकाकेनचिद्दृष्टपूर्वेत्यूचुर्नेति त्वाममरादिभिरस्पृष्टपूर्वां न जानीम इति न किंतु जानीम एव अमरादिभिरस्पृष्टपू
र्वा कुतो नृभिः स्पृष्टपूर्वा भवेरित्यर्थः ४ आस्तां इदं लक्षणं नूनं ईश्वरेण वकारितमसि सा कुरु नूनं इति हे सुभ्रु शरीरिणामस्मा
कं सर्वेंद्रियाणां मनसश्च प्रीतिं विधातुं सकृपेणेश्वरेण त्वं प्रेषितासि नूनं न यदृच्छया गतासि किंतु दैवेनैव प्रेषि
तेत्यर्थः ५ हे मानिन्यत्रैकस्मिन्वस्तुन्यमृतनिमित्ते स्पर्द्धमानानां परस्परमभिभवतां बद्धवैराणां ज्ञातीनामस्माकं त्वं सु
मध्यमे संधिं कुरु सम्यग्विभजस्वेति ६ कश्यपस्य दायादाः पुत्राः भ्रातरश्च आधुना कृतं पौरुषं कलहनिमित्तं यैस्ते वयं
मतो यथान्यायं कलहो यथा न भवेत्तथामृतं विभजस्व ७

रूपेण१

चा१

 देवलिंगेन देवताविशेषेणाप्रतिछन्नः तिरोधापितात्मवेषः स्वर्भानुः राहुः देवानां पंक्तौ प्रविष्टः सोममम्रुतमपिबत् चंद्रार्काभ्यां सूचितो हरिः २४
सोमं पिबतः स्वर्भानोः शिरः तरसैव धारायस्य तेन चक्रेण जहार चिच्छेद तस्य स्वर्भानोः कबंधः सुधयाप्राप्लावितोऽसंस्पृष्टोऽपतत् अमृतस्य कंठादधो निः-
सरणात्पूर्वमेव शिरसः छिन्नत्वादमृतसंस्पर्शाभावात्कबंधः पतितः २५ शिरस्त्वमृतसंस्पर्शादमरतां प्राप्तः अजो ब्रह्मा ग्रहमचीक्लृपत् अकल्पयत
सूर्यादिवद्वरेण प्राणिनां शुभाशुभसूचकं ग्रहमचीकरदित्यर्थः यस्तु ग्रहत्वं प्रापितो राहोर्मूर्द्धा वैरधीः चंद्रार्कावभिधावति २६ देवैरमृते पीतप्राये
सति प्रायग्रहणादमृतस्यावशेषः सूच्यते लोकभावनः लोकपालनो भगवान् विभुरसुरेंद्राणां पश्यतां सतां स्वरूपं स्वकीयं पौरुषं रूपं जगृहे

देवलिंगप्रतिछन्नः स्वर्भानुर्देवसंसदि प्रविष्टः सोममपिबच्चंद्रार्काभ्यां च सूचितः २४ चक्रेण क्षुरधारेण जहार पिबतः शिरः
23 हरिस्तस्य कबंधस्तु सुधयाप्लावितोऽपतत् २५ शिरस्त्वमरतां नीतमजो ग्रहमचीक्लृपत् यस्तु पर्वणि चंद्रार्का-
वभिधावति वैरधीः २६ पीतप्रायेऽमृते देवैर्भगवान्लोकभावनः पश्यतामसुरेंद्राणां स्वरूपं जगृहे हरिः २७ एवं
सुरासुरगणाः समदेशकालहेत्वर्थकर्ममतयोऽपि फले विकल्पाः तत्रामृतं सुरगणाः फलमंजसापुर्यत्पादपं-
कजरजःश्रयणान्न दैत्याः २८

स१

गृहीतवान् भगवंतमेवाश्रितानामेवोद्यमैकफलेनान्येषामित्येवमाख्यानतात्पर्यमाह एवमिति इत्येवं समास्तुल्या देशादयो येषां ता-
दृशाः अपि तत्र देशः क्षीरोदधितीरं कालो मथनसमयः हेतुर्मंदराद्रिणा मथनं अर्थः अमृतरूपं प्रयोजनं कर्म मथनानुकूलं मति-
रन्योन्यमेकप्रयोजनविषया एवंविधा अपि फले विकल्पाः फलवैषम्यवंतो बभूवुः केषांचित्फलमपरेषां नेति वैषम्यमभवदि-
त्यर्थः तदेवाह तत्र देवासुराणां मध्ये देवगणा एवामृतरूपं फलमंजसा सुखेनापुः प्रापुः कुतः यस्य भगवतः पादपंकजयो रजसः श्रय-
णात्तदाश्रयणात् हेतोः दैत्याः न प्रापुस्तदनाश्रयणादिति भावः २८

ऽपतस्यां शालायां हे नरेन्द्र अमृतकलशः पाणौ यस्याः सा मोहिन्याविवेश कथंभूता करस्य करभो बहिः करभसदृशौ सुवृत्तौ ऊरू यस्याः सा उशत्कोमल
मं दुकूलं यस्मिंस्तेन श्रोणीतटेन विशालया श्रोण्यालसा मंदागतिर्यस्याः पाठान्तरे करभसदृशयोरूर्वोर्दुकूलं यस्याः सा चासौ श्रो
णीतटेनालसा गतिर्यस्याः सा च मदेन विह्वले अक्षिणी यस्याः कनकनूपुराणां शिंजितेन कूजती ध्वनयती कुंभाविव स्तनौ यस्याः सा १७
तां श्रीसखीं श्रियमिव स्थितां श्रीसहायिनीं वा भगवद्रूपत्वात् कनकमये कुंडले यस्याः सा चासौ चारवः कर्णादयो यस्याः सा च तां वि
गलितः विस्रस्तः स्तनपट्टिका यस्यास्तां यस्यास्तां परदेवतारूपां तां संवीक्ष्य देवासुराः तस्या उत्स्मितवीक्षणेन संमुमुहुः १८ एवं तां
वन्मोहयित्वा यत्कृतं वा तदाह त्रिभिः असुराणामिति स्वभावतः क्रूराणामसुराणां सुधादाने सर्पाणां क्षीरदानमिवायं मत्वा तां
सुधामसुरेभ्यो न व्यभजदच्युतः यतो हा वाञ्छितान्नपाययतीति तथा अयं भावः दैत्यैर्दायं साध्वसाधु वा सर्वं ननु मतमेवमाश्रितान्देवा

तस्यां नरेन्द्र करभोरुरुशद्दुकूलश्रोणीतटालसगतिर्मदविह्वलाक्षी साकूजती कनकनूपुरशिंजितेन कुंभस्तनी कलशपाणिरथा
विवेश १७ तां श्रीसखीं कनककुंडलचारुकर्णनासाकपोलवदनां परदेवताख्यां संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तन
पट्टिकांतां १८ असुराणां सुधादानं सर्पाणामिव दुर्नयं मत्वा जातिनृशंसानां न तां व्यभजदच्युतः १९ कल्पयित्वा पृथक्पंक्तीरुभयेषां जग
त्पतिः तांश्चोपवेशयामास स्वेषु स्वेषु च पंक्तिषु २० दैत्यान्गृहीतकलशो वंचयन्नुपसंचरैः दूरस्थान्पाय
यामासजरामृत्युहरां सुधां २१ ते पालयंतः समयमसुराः स्वकृतं नृप तूष्णीमासन्कृतस्नेहाः स्त्रीविवादजुगु
प्सया २२ तस्यां कृतातिप्रणयाः प्रणयापायकातराः बहुमानेन चाबद्धा नोचुः किंचन विप्रियम् २३

नेव सुधां पाययिष्यामि किंच तैर्यथा न्यायं विभजस्वेत्युक्ते तेभ्यः क्रूरेभ्योमृतपाने न न्याय्यमतस्तेभ्यो न दास्यामीति १९ उभयेषां पंक्तीः
पृथक्प्रभक्ताः कल्पयित्वा तान्देवानसुरांश्च स्वासु स्वपंक्तिषूपवेशयामास २० उपात्तकलशः भगवानुपसंचरैः समीपगमनबहुमा
नप्रियवाक्यादिभिः दैत्यान्वंचयन् दूरस्थानपि देवानेव सुधां पाययामास २१ तेऽसुराः सुधामपि दैत्याः स्वकृते समये साध्वसाधु वा त
नेन मनुमन्यामहे इति पूर्वं कृतसंकेतं पालयंतः हे नृप कृतस्तस्यां स्नेहो येषां ते तादृशाश्च स्त्रीविवादस्य जुगुप्सितत्वात्तया वा तूष्णीमेवास
न् २२ तस्यां कृतः प्रणयः अतिस्नेहो यैः प्रणयापायेन कातरा भीताः एतावत्कालपर्यंतं पूर्वं किंचित्प्रियं नु पूर्वं नु धीराः क्षणं
प्रतीक्षध्वं इत्यादि बहुमानेन निबद्धाश्च किंचिदपि विप्रियं नोचुः समयपालनादिषड्ड्रिरे तैः कारणैरप्रियं किंचिद
पि नोचुः किंतु तूष्णीमासन्निति स्पष्टं २३

तत्ररथ्यादयोरथ्यादिभिरेवद्वंद्वंसंयुगेसमसज्जंतयुद्धायसंगताबभूवुः ८ तत्रदेवेष्वसुरेषुचकेचिदुष्ट्रादिभिर्वाहनैर्युयुधुः गौरमुखोवीति
ऋक्षोरीस्तस्यविशेषणं रक्तमुखोवानरमुखोवेत्यर्थः हरिभिःसिंहैः ९ तिमिंगिलामत्स्यविशेषैः गोभिर्वृषैः बलीवर्दैर्गवैर्गव
लीवर्दाःप्रायःप्रसिद्धाः १० शिवाःशृगालविशेषाः नामिर्वस्तैर्मेषैः ११ जलेस्थलेखेआकाशेगच्छतीति तथातैर्विकृत
विग्रहैःसत्त्वैर्जंतुभिर्वाहनभूतैरुभयोर्देवासुरसंबंधिन्योःसेनयोरग्रतःहेराजन्विविशुः १२ हेराजंश्चित्रध्वजपटैःपु
ष्टैरमलैर्महाधनैरत्नैर्वज्रदंडैर्व्यजनैर्बर्हचामरैः १३ वातेनोद्धूतैरुत्तरीयैरुष्णीषैर्धनुर्भिःकवचैःभूष
णैश्चविशदैःनिर्मलत्वेननिर्मलीकृतैःसूर्यरश्मिभिर्नितरांस्फुरद्भिःशस्त्रैश्च १४ वीराणांमालाभिश्चदेवासुराणांध्वजिन्यौ

रथिनोरथिभिस्तत्रपत्तिभिःसहपत्तयः हयाहयैरिभाश्चेभैःसमसज्जंतसंयुगे ८ उष्ट्रैःकेचिदिभैःकेचिदपरेयुयुधुःखरैः
केचिद्गौरमुखैरृक्षैर्द्वीपिभिर्हरिभिर्भटाः ९ गृध्रैःकंकैर्बकैरन्येश्येनभासैस्तिमिंगिलैः शरभैर्महिषैःखड्गैर्गोवृषै
र्गवयारुणैः १० शिवाभिराखुभिःकेचित्कृकलासैःशशैर्नरैः बस्तैरेकेकृष्णसारैर्हंसैरन्येचसूकरैः ११ अन्ये
जलस्थलखगैःसत्त्वैर्विकृतविग्रहैः सेनयोरुभयोराजन्विविशुस्तेऽग्रतोऽग्रतः १२ चित्रध्वजपटैराजन्नातपत्रैः
सितामलैः महाधनैर्वज्रदंडैर्व्यजनैर्बार्हचामरैः १३ वातोद्धूतोत्तरोष्णीषैरर्चिर्भिर्वर्मभूषणैः स्फुरद्भिर्विश
दैःशस्त्रैःसुतरांसूर्यरश्मिभिः १४ देवदानववीराणांध्वजिन्यौपांडुनंदन रेजतुर्वीरमालाभिर्यादसामिवसागरौ १५ वै
रोचनोबलिःसंख्येसोऽसुराणांचमूपतिः यानंवैहायसंनामकामगंमयनिर्मितं १६ सर्वसांग्रामिकोपेतंसर्वा
श्चर्यमयंप्रभो अप्रतर्क्यमनिर्देश्यंदृश्यमानमदर्शनम् १७ आस्थितस्तद्विमानाग्र्यंसर्वानीकाधिपैर्वृतः बाल
व्यजनछत्राग्र्यैरेजेचंद्रइवोदये १८ ५२

सेनेरेजतुःयथायादसांमालाभिःसागरौसमुद्रौतद्वत् १५ असुराणांचमूःसेनातस्याःपतिर्वैरोचनोबलिर्वैहायसाख्यंयानंविमानमा
स्थितआश्रितःतदुच्यतेउत्पन्नितेस्थितइत्यन्वयःइवरेजेयानंविशिनष्टिकामगंयथेच्छंगच्छतीतितथामयेननिर्मितं १६ सर्वैःसांग्रामिकैः
नैरस्त्रशस्त्रादिभिर्युक्तंसर्वैराश्चर्यमयंकंमहद्भिर्बलमप्रतर्क्यंविमानांतरवज्जातीयत्वेनतर्कितुमशक्यमनिर्देश्यमनियतप्रदेशावस्था
नत्वेनकस्मिंश्चिद्देशेनियमेनस्थितमितिनिर्देष्टुमशक्यंकदाचिद्दृश्यमानमपिपुनरदर्शनमदृश्यं इष्टुमशक्यंतेजस्वित्वाद्विमानश्रे
ष्ठेतदास्थितःइत्यन्वयःकथंभूतःसर्वैःसेनाधिपतिभिर्जनैश्चवृतःतस्यबलेःसमंताद्यूथानांपतयोऽसुराःस्वयानैःसहस
न्यपरिवृत्यतस्थुः १८

क्किंच यदिति असुः प्राणः वसु धनं देहात्मजादिषु निमित्तेषु देहाद्यर्थं नृभिः प्राणादिभिः यद्युज्यते यत्क्रियते इत्यर्थः तदेतदसदपार्थं शा
खा निषेचनवदपार्थमेव कुतः पृथक्त्वात् तस्य कर्मणो ममतापृथगभिमानगर्भत्वात् तैरेव प्राणादिभिर्यत्क्रियते सर्वान्तरात्मनो भगवतः
सर्वकारणस्य प्रीतये तत्तु सन्महाफलं भवति कुतोऽपृथक्त्वात् सर्वान्तरात्मतया सर्वमूलकतया च सर्वत्रानुस्यूतत्वात् तत्र दृष्टान्तः पत्रो
मूले सेचनं यथा सर्वस्य शाखास्कंधादेरपि भवति तद्वत् यद्वा पृथक्त्वादपृथक्त्वादिति च ल्यब्लोपे पंचमी देहात्मादीनां पृथक्त्वमालोच्या
ब्रह्मात्मकत्वं पश्यन् केवलं देहाद्यर्थं प्राणादिभिर्यत्क्रियते कर्म तद्विफलं ब्रह्मात्मकत्वमालोच्य तदाराधनबुद्ध्यानुष्ठितं लौकिकम
पि कर्म सफलमेवेत्यर्थः २९ इत्य मे व ध्या ९ समदेशकालहेत्वर्थकर्ममतीनामपि भगवन्तमाश्रितानां न केवलफ ना।

यद्युज्यतेऽसुवसुकर्ममनोवचोभिर्देहात्मजादिषु नृभिस्तदसत्पृथक्त्वात् तैरेव सद्भवति यत्क्रियतेऽपृथक्त्वात्सर्वस्य तद्भ
वति मूलनिषेचनं यत् २९ इ श्री भा ते ८ स्कं न मो ध्यः ९ शु उ च इति दानवदैतेया नाविंद
न्नमृतं नृप युक्ताः कर्मणि यत्ताश्च वासुदेवपराङ्मुखाः १ साधयित्वामृतं राजन्पाययित्वा स्वकान्सुरान् पश्यतां
सर्वभूतानां ययौ गरुडवाहनः २ सपत्नानां परामृद्धिं दृष्ट्वा ते दितिनंदनाः अमृष्यमाणा उत्पेतुर्देवान्प्रत्युद्यतायु
धाः ३ ततः सुरगणाः सर्वे सुधया पीतयैधिताः प्रतिसंयुयुधुः शस्त्रैर्नारायणपदाश्रयाः ४ तत्र दैवासुरो ना
म रणः परमदारुणः रोधस्युदन्वतो राजंस्तुमुलो रोमहर्षणः ५ तत्रान्योन्यं सपत्नास्ते संरब्धमनसो रणे स
मासाद्यासिभिर्बाणैर्निजघ्नुर्विविधायुधैः ६ शंखतूर्यमृदंगानां भेरीडमरूणां महान् हस्त्यश्वरथपत्तीनां नदतां निःस्वनोऽभवत् ७

लाभप्राप्तिरेव प्रसक्तप्राणहानिश्चेति वक्तुममृतलाभप्रयुक्तसंरम्भाणां दैत्यानां देवैः सह युद्धमाह दशमाध्यायेन हे नृपेत्थं दानवा दैतेयाश्चामृतं ना
विंदन्न लब्धवन्तः तत्र हेतुं वदन्विशिनष्टि समुद्रमथनकर्मणि युक्तास्तत्रानुकूलयत्नवन्तोऽपि वासुदेवपराङ्मुखाः अतो नाविंदन्निस
र्थः १ हे राजन् इत्थं भगवानमृतं साधयित्वा स्वाश्रितान्सुरान्पाययित्वा सर्वभूतानां पश्यतां गरुडवाहनः सन् जगाम २ ततः सप
त्नानां देवानां परामृद्धिं फलप्राप्तिं दृष्ट्वा ते दैत्या असहमानाः सन्तः उद्यतायुधाः देवान्प्रत्युत्पेतुरभिदुद्रुवुः ३ ततः सुरगणाश्चापि पीतया सुधया
एधितबलाः नारायणपदाश्रयाः शस्त्रैः प्रतिसंयुयुधुः ४ तत्रोदन्वतः क्षीराब्धेस्तीरे दैवासुर इति प्रसिद्धः परमदारुणोऽतिभीषण
स्तुमुलः संकुलः पश्यतां अपश्यतां च रोमहर्षणः रोमोद्गमजनको रणः संग्रामो बभूव ५ ६ ७ ८ ९

वातापिसहित इल्वलः ब्रह्मपुत्रैर्मरीच्यादिभिः हे अरिंदम ३२ मातृभिर्ब्राह्म्यादिभिः सप्तभिः सह उत्कलो सुरः उशनसा शुक्रेण नरकेणा
सुरेण ३३ कालेयैः कालकेयैः ३४ एवं द्वन्द्वयुद्धमाजौ युद्धे त एते सुरासुरश्रेष्ठाः द्वंद्वेन संघीभूय युध्यमानाः परस्परं समीपमेत्य
जिगीषवस्तीक्ष्णैः शरादिभिर्बलेनान्योन्यमाजघ्नुः ३५ ३६ गजादयः आरोहंतीत्यारोहास्तैः सहिता अन्ये च वाहनाना
विधाः खंडिताः निकृत्तानितराः छिन्नाः बाह्वादयो येषां ते एव भूताः तत्र इष्वासः निषंगः तनुत्रं कवचं ३७ तेषां देवादी
नां पदाघातै रथांगैश्च चूर्णिता दायोधनाद्युद्धभूमेरुत्थितो रेणुरुल्बणो निविडः दिशः खं सूर्यं च छादयन्नसृक्स्रावान्न्यवर्तत

75

वृषाकपिस्तु जंभेन महिषेण विभावसुः इल्वलः सह वातापिर्ब्रह्मपुत्रैररिंदम ३२ कामदेवेन दुर्मर्षः उत्कलो मातृभिः
सह बृहस्पतिश्चोशनसा नरकेण शनैश्चरः ३३ मरुतो निवातकवचैः कालेयैर्वसवोऽमराः विश्वेदेवास्तु पौलोमै
रुद्राः क्रोधवशैः सह ३४ त एवमाजावसुराः सुरेन्द्रा द्वंद्वेन संहत्य च युध्यमानाः अन्योन्यमासाद्य निजघ्नुरोजसा जिगीष
वस्तीक्ष्णशरासितोमरैः ३५ भुशुंडिभिश्चक्रगदर्ष्टिपट्टिशैः शक्त्युल्मुकैः प्रासपरश्वधैरपि निस्त्रिंशभल्लैः प
रिघैः समुद्गरैः सभिंदिपालैश्च शिरांसि चिच्छिदुः ३६ गजास्तुरंगाः सरथाः पदातयः सारोहवाहा विविधा विखं
डिताः निकृत्तबाहूरुशिरोधरांघ्रयश्छिन्नध्वजेष्वासतनुत्रभूषणाः ३७ तेषां पदाघातरथांगचूर्णितादायोधना
दुल्बण उत्थितस्तदा रेणुर्दिशः खं द्युमणिं च छादयन्न्यवर्ततासृक्स्रुतिभिः परिप्लुतात् ३८ शिरोभिरुद्धूतकिरीटकुंडलैः
संरंभदृग्भिः परिदष्टदच्छदैः महाभुजैः साभरणैः सहायुधैः सा प्रास्तृता भूः करभोरुभिर्बभौ ३९ कबंधास्तत्र चोत्पेतुः
पतितस्वशिरोक्षिभिः उद्यतायुधदोर्दंडैराधावंतो भटान्मृधे ४०

निवृत्तो रेणुं वदन्नायोधनं विशिनष्टि असृक्स्रुतिभिः रुधिरस्रवणैः परितः प्लुतात्सिक्तात् ३८ सारंभदृग्भिः शिरोभिर्महाभुजैः करभ
प्रास्तृतोऽर सदृशोरुभिश्च प्रास्तृता सती बभौ शिरांसि विशिनष्टि उत्क्षिप्तानि किरीटादीनि येभ्यः संरंभेणोत्कटा दृशो येषु परिदष्टा दंतैरधरोष्ठ
येषु तैः भुजान्विशिनष्टि साभरणैः सहायुधैरिति ३९ किंच कबंधा इति तत्र मृधे युद्धे पतितानि यानि स्वशिरांसि त
तैरक्षिभिः पश्यंतः कबंधाः शिरोरहितदेहाः उत्पेतुः कथंभूताः उद्यतान्यायुधानि येषु तैर्दोर्दंडैर्भुजदंडैः सह भटानवस्थि
ताः महामृधे इति पाठांतरम् बलेः पराक्रममाह चलिरिति ४०

यूथपतीनेवकांश्चिन्निर्दिशति नमुचिरिति १९ २२ तएतेसर्वेसोमस्यामृतस्यालब्धोभागोयैः केवलं क्लेशमात्रंप्राप्ताः संतः पूर्वरणमुखे
बहुशोनिर्जिताः अमरायैस्ते २३ सिंहनादान्विमुंचंतः कुर्वंतः महान्रवोयेषांतान् शंखान्दध्मुः ध्वनयामासुः एवमुद्धतान् शत्रूनसुरान्दृष्ट्वा
स्वराड्बलभिदिंद्रः नितरांकुपितः २४ दिक्करिणमैरावतमधिरूढः वियत्याकाशेवस्थितः शुशुभे शोभितः कमिव स्रवंतिप्रस्रवणानि यस्मिन्स
दधातस्तादृशमनेनाभिप्रेतं तंउदयाद्रिमारूढोहर्पतिःसूर्योयथातद्वत् २५ तस्येन्द्रस्यसर्वतःपरितोदेवानानाविधान्यायुधानियेषांते
आसंस्तंपरिवेष्ट्यतस्थुः स्वगणैःसहिताःवाय्वादयोलोकपालाः २६ तेदेवासुरास्त्वान्योन्यमभिसृत्यसमीपमागत्य परस्परंक्षि

तस्यासन्सर्वतोयानैर्यूथपानांपतयोसुराः नमुचिःशंवरोवाणोविप्रचित्तिरयोमुखः १९ द्विमूर्द्धाकालनाभोथप्रहेतिर्हेतिरिल्वलः
शकुनिर्भूतसंतापोवज्रदंष्ट्रोविरोचनः २० हयग्रीवःशंकुशिराःकपिलोमेघदुंदुभिः तारकश्चक्रदृक्शुंभोनिशुंभोजंभउत्कलः २१
अरिष्टोरिष्टनेमिश्चमयश्चत्रिपुराधिपः अन्येपौलोमकालेयानिवातकवचादयः २२ अलब्धभागाःसोमस्यके
वलंक्लेशभागिनः सर्वएतेरणमुखेबहुशोनिर्जितामराः २३ सिंहनादान्विमुंचंतःशंखान्दध्मुर्महारवान् दृष्ट्वासपत्नानुत्सि
क्तान्बलभित्कुपितोभृशं २४ ऐरावतंदिक्करिणमारूढोशुशुभेस्वराट् यथास्रवत्प्रस्रवणमुदयाद्रिमहर्पतिः २५ तस्या
सन्सर्वतोदेवानानावाहध्वजायुधाः लोकपालाःसहगणैर्वाय्वग्निवरुणादयः २६ तेन्योन्यमभिसंसृत्यक्षिपंतोनामभि
र्मिथः आह्वयंतोविशंतोग्रेयुयुधुर्द्वंद्वयोधिनः २७ युयोधबलिरिंद्रेणतारकेणगुहोस्यत वरुणोहेतिनायुध्यन्मित्रोराजन्प्रहेति
ना २८ यमस्तुकालनाभेनविश्वकर्मामयेनवै शंबरोयुयुधेत्वष्ट्रासवित्रातुविरोचनः २९ अपराजितेननमुचिरश्विनौ
वृषपर्वणा सूर्योबलिसुतैर्देवोबाणज्येष्ठैःशतेनच ३० राहुणाचतथासोमःपुलोम्नायुयुधेनिलः निशुंभशुंभयोर्देवीभद्रका
लीतरस्विनी ३१

पंतस्तिरस्कुर्वंतः नामभिराह्वयंतःविशंतश्चाग्रेद्वंद्वयोधिनोयुयुधुः २७ द्वंद्वानेवाहयुयोधेत्यादिभिःसप्तभिः बलिर्वैरोचनिःइंद्रे
णासहतारकेणासुरेणगुहःकुमारः अस्यतायुध्यतेत्यर्थः हेराजन्मित्रःप्रहेतिनायुध्यत २८ विरोचनःबलेःपितान्योवा
दैत्यः २९ सूर्योदेवएकएवबलेःसुतैः बाणोज्येष्ठोयेषांतैः शतसंख्याकैरयुध्यतेत्यर्थः ३० सोमश्चंद्रः पुलोम्नादैत्ये
नानिलोवायुरयुध्यत निशुंभशुंभयोस्ताभ्यांतरस्विनीबलवतीभद्रकालीदेव्ययुध्यत ३१ रामयजमानोसु

भा॰अ॰टी॰ ततः सर्वतश्चतुर्दिक्षु समुद्रः प्रत्यदृश्यत दैत्यैरिति शेषः कथंभूत उद्वेलः मर्यादातिगः प्रचण्डैर्महद्भिर्वातैरुद्धूतैस्तरङ्गैरावर्तैश्च भीषणः ५१ यथा
३३ वलिना एवमन्यैश्च महामायैरलक्ष्यगतिभिर्युद्धे मायासु सृज्यमानासु सतीषु सुरसैनिका विषेदुः खिन्ना बभूवुः ५२ हे नृप यत्र यदा
इन्द्रादयस्तस्यास्तत्प्रतिविधिं मायाप्रतिक्रियां न विदुस्तदा तैर्ध्यातो भगवान् विश्वभावनः प्रादुरभूत् ५३ कथंभूतः प्रादुर्बभूवेत्यत्राह ततः इति
ततः इन्द्रादिध्यानानन्तरं गरुडस्यांसे स्कन्धे कृतौ निहितौ अङ्घ्रिपल्लवौ येन पिशङ्गं वासो वस्त्रं यस्य नवकञ्जे इव लोचने यस्य
दृष्टाष्टायुधयुक्ता बाहवो यस्य श्रीश्च कौस्तुभश्चानर्घ्यं किरीटं च कुण्डले च उल्लसन्ति श्रीकौस्तुभादीनि यस्मिन्नेवंभूतोऽ
उल्लसतीप्र दृश्यत तैः पूर्वोक्तैरन्वयः ५४ ततः किमत आह तस्मिन् भगवति प्रविष्टे आविर्भूते सति असुराणां कूटकर्म मन्त्रादि प्रयो पस्य

ततः समुद्र उद्वेलः सर्वतः प्रत्यदृश्यत प्रचण्डवातैरुद्धूततरङ्गावर्तभीषणः ५१ एवं दैत्यैर्महामायैरलक्ष्यगतिभी रणे
76 सृज्यमानासु मायासु विषेदुः सुरसैनिकाः ५२ न तत्प्रतिविधिं यत्र विदुरिन्द्रादयो नृप ध्यातः प्रादुरभूत्तत्र भगवान्विश्वभा
वनः ५३ ततः सुपर्णांसकृताङ्घ्रिपल्लवः पिशङ्गवासा नवकञ्जलोचनः अदृश्यताष्टायुधबाहुरुल्लसच्छ्रीकौस्तुभानर्घ्य
किरीटकुण्डलः ५४ तस्मिन्प्रविष्टेऽसुरकूटकर्मजा माया विनेशुर्महिना महीयसः स्वप्नो यथा हि प्रतिबोध आगते । हरि
स्मृतिः सर्वविपद्विमोक्षणं ५५ दृष्ट्वा मृधे गरुडवाहमिभारिवाह आविध्य शूलमहिनोदथ कालनेमिः तल्लीलया गरुड
मूर्ध्नि पतद्गृहीत्वा तेनाहनन्नृप सवाहमरिं त्र्यधीशः ५६

गः तस्माज्जाताः सर्वा मायाः महीयसोऽनेकमायाविनाशकस्य भगवतो महिम्नैव विनेशुर्विनष्टा बभूवुः यथा प्रतिबोधे जागरे प्राग
ते स्वप्नो नश्यति तद्वदित्यर्थः हि यतः हरेः स्मृतिरेव सर्वासां विपदां विमोक्षणमपहन्त्री किमुत भगवत्प्रादुर्भावः आपद्धरं तत्तिव
क्यमिति भावः ५५ मृधे युद्धे गरुडवाहं भगवन्तं दृष्ट्वा इभारिवाहः सिंहवाहनः कालनेमिरसुरः शूलमाविध्य भ्रामयित्वा
ऽहिनोत् क्षिप्तवान् तत् गरुडस्य मूर्ध्नि आपतत् शूलं गृहीत्वा हे नृप तेनैव शूलेन त्र्यधीशस्त्रिलोकेशो भगवान् सवाहमिभारि
वाहनसहितमरिं शत्रुं कालनेमिमहनद्धतवान् इत्यर्थः ५६

वलिर्दशभिः शरैरिन्द्रं त्रिभिरैरावतं चतुर्भिश्चतुरो वाहानेरावत पादरक्षकाननेके न शरेणा [illegible] यंतारमार्दयत् अपीडयत् ४१ स शक्रस्ता
नापततः शरान संप्राप्तानेव तावज्जिर्ज्ञि [illegible] शरैः प्रहसन्निव शीघ्रविक्रमः धनुर्विद्याकुशलश्चिच्छेद ४२ तस्येन्द्रस्य तद्
तमं धनुः कौशलं कर्म वीक्ष्य दुर्जयो ऽसहमानो वलिः शक्तिमाददे गृहीतवान् प्रयोक्तुमिति शेषः महोल्कायाइव भा यस्या
स्तां ज्वलंती शक्तिं करस्थामेव हरिरिन्द्रश्चिच्छेद ४३ ततो वलिर्यद्यच्छूलादिकं शस्त्रमाददे तत्सर्वं समर्थ इन्द्रश्चिच्छेद ४४
अथासुरो वलिः स्वयं तिरोहित आसुरीं मायां ससर्ज कीदृशीं इत्यत्र तामेव दर्शयति ततइति सार्द्धैः षड्भिः हे प्रभो सुरसैन्यस्योप
रिष्टाच्छैलो गिरिमाधिकः प्रादुर्बभूव ४५ तस्माच्छैलात् दवाग्निनादह्यमानास्तस्य सैन्यस्योपरि पेतुः कथंभूताः दवाग्निना दह्यमानास्तथा टंकैस्तीक्ष्णाग्रैः

वलिर्महेन्द्रं दशभिस्त्रिभिरैरावतं शरैः चतुर्भिश्चतुरो वाहानेकेनारोहमार्दयत् ४१ सतानापततः शक्रस्तावद्भिः शीघ्रविक्रमः
चिच्छेद निशितैर्भल्लैरसंप्राप्तान् हसन्निव ४२ तस्य कर्मोत्तमं वीक्ष्य दुर्मर्षः शक्तिमाददे तां ज्वलंतीं महोल्काभां हस्तस्थामच्छि
नद्धरिः ४३ ततः शूलं ततः प्रासं ततस्तोमरमृष्टयः यद्यच्छस्त्रं समादद्यात् सर्वं तदच्छिनद्विभुः ४४ ससर्जाथासुरीं मायामंत
र्धानगतो ऽसुरः ततः प्रादुरभूच्छैलः सुरानीकोपरि प्रभो ४५ ततो निपेतुस्तरवो दह्यमाना दवाग्निना शिलाः सटंकशिख
रा निष्पेतुः शिलाश्च चूर्णयत्यो द्विषद्बलं ४६ महोरगाः समुत्पेतुर्दन्दशूकाः सवृश्चिकाः सिंहव्याघ्रवराहाश्च मर्दयंतो महागजान् ४७ या
तुधान्यश्च शतशः शूलहस्ता विवाससः छिन्धि भिन्धीति वादिन्यस्तथा रक्षोगणाः प्रभो ४८ ततो महाघना व्योम्नि गंभीर
परुषस्वनाः अंगारान्मुमुचुर्वाते राहताः स्तनयित्नवः ४९ सृष्टो दैत्येन सुमहान् वह्निः श्वसनसारथिः सांवर्तक इवात्युग्रो वि
बुधध्वजिनीमधाक् ५०
शिखरैः सहिताः शैला द्विषतो देवानां वलं चूर्णयंतो निपेतुः ४६ दंदशूका वृश्चिकैः सहिताः महोरगाश्च समुत्पेतुः सिंहव्याघ्र
वराहाश्च मर्दयंतः समुत्पेतुरित्यनुषंगः ४७ विवाससः नग्नाः शूलहस्ताः शतशः सहस्रशश्च यातुधान्यः छिंधि भिंधीति
वादिन्यः समुत्पेतुः ततो रक्षोगणाश्च ४८ हे प्रभो ततो गंभीरः परुषश्च स्वनो येषां ते महामेघाः वातैराहताः स्तनयि
त्नवः गर्जितो व्योम्न्याकाशे अंगारान्मुमुचुः ४९ दैत्येन वलिना सृष्टो महान्विपुलः श्वसनसारथिर्वायुसना
थो वह्निः सांवर्तकः प्रलयानल इवात्युग्रो विबुधध्वजिनीं देवानां चमूमधाक् अदहत् ५०

भा. पु.
टी.
३४ पि.न.२

लं विक्रमस्व इत्यतिरस्कृत उक्त आह बलिः संग्राममिति त्रिभिः कालेन चोदिता निसुखदुःखजयापजयादिफलदा
नाय प्रवर्तितानि कर्माणि येषां संग्रामे युद्धे वर्तमानानां कीर्त्यादयः सर्वेषामनुक्रमतान् कीर्त्यादिनिमित्तकर्मपरिपा
कानुक्रमात्स्पृशेव भवतामसर्वदा कीर्त्यादयो बभूवुः किंतु तत्तन्निमित्तपरिपाकदशायामेव त्वस्माकमपि तथैवेति भावः
७ तमिममनुक्रमेण कीर्त्यादिमंतं जनं कालरशनं कालवर्त्मत्वेन कालो निर्मितकर्मफलभोक्तारं सूरयः पंडिताः पश्यं
त्य तत्स्तोकीर्तिजयमहःस्तु न हृष्यंति तद्विपरीतेन न शोचंति तत्रैवं विधि विवेके यूयमपंडिता इति उपाः ८ तत्र कीर्त्याद
वाक्यानंदे साधकं मन्यमानानां मत एव शोच्यानां साधुभिः अहो मा एते इत्येवं शोच्यानां वो युष्माकं मर्मस्पृशा तेषां नेषां
याभिस्ताभिर्गिरि वयं न साधु मन्यामहे ९ इत्येवं विभुमिंद्रमाक्षिप्य वीराणां मर्दनो धीरो वैरोचनिः राक्षेपैराक्षिपवाक्यैरा

७७ सोऽहं दुर्मीयि नस्तोघवज्रेण पात पर्वगा गिरो हरिस्थैमंदात्मनू घटस्व ज्ञातिभिः सह ६ बलिः संग्राममेव
तेमामानां कालचोदितकर्मणां कीर्तिर्जयोऽजयो मृत्युः सर्वेषां स्युरनुक्रमात् ७ तमिमं कालरशनं जनाः पश्यं
ति सूरयः न हृष्यंति न शोचंति तत्र यूयमपंडिताः ८ न वयं मन्यमानानामात्मानं तत्र साधनं गिरो वः साधुशो
च्यानां गृह्णीमो मर्मताडनाः ९ शु उ च इत्याक्षिप्य विभुं वीरो नाराचैर्वीरमर्दनः आकर्णपूर्णैरहनदा
क्षेपैराह तं पुनः १० एवं निराकृतो देवो वैरिणा तथ्यवादिना नामृष्यत्तदधिक्षेपं तोत्राहत इव द्विपः ११ ॥र
प्राहरत्कुलिशं तस्मा अमोघं परमर्दनः सयानो न्यपतद्भूमौ छिन्नपक्ष इवाचलः १२ सखायं पतितं दृष्ट्वा जं
भो बलिसखः सुहृत् अभ्ययात्सौहृदं सख्युर्हतस्यापि समाचरन् १३

हतं पुनराकर्णांतमाकृष्टैर्नाराचैराहतैः १० यथार्थवादिना वैरिणा बलिना एवं तिरस्कृतो देव इन्द्रः तेन बलिना कृतमधिक्षेपं नाम
ष्यन्नासहत तोत्रेण कुशेनाहतो गज इव ११ किंतु तस्मै बलये अमोघं प्रतिहतमशीर्णं मर्दनं घातुकं वज्रं प्राहरत् हे नृप तस्मात्कुलिश
प्रहाराच्छिन्नपक्षः पर्वत इव स विमानो भूमौ न्यपतदिति शेषः सयानोऽन्यपतद्भूमौ इति पाठांतरे तु नष्टोषः शयानोऽपतिपा
के शयानो बभूव स्पर्धः १२ बलेः सखा सुहृच्च जंभोऽसुरः सखायं बलिं भूमौ पतितं दृष्ट्वा हतस्यापि सख्युर्बलेः सौहृदं भावप्रधानो
निर्देशः सौहृदं समाचरन्नभ्ययात् इन्द्रस्याभिमुखमगादित्यर्थः १३

ततोतिबलौ माली सुमालाख्यावसुरौ यस्य भगवतश्चक्रेण कृतशिरसौ युधि पेततुः तत्र मालिनो विक्रमं कथयन् तस्य शिरश्छेदनं भग
वच्चक्रेण कृतमाह अथेति अथ कालनेमिवधानंतरं माल्यवान्मालीतं भगवदधिष्ठितमंडजेन्द्रं गरुडं तीक्ष्णया गदयाऽहत
संघात्याहनत्ताडितवान् तावन्नदतोरेर्मालिनः शिरोरिणा चक्रेणाद्यो भगवांश्छिच्छेद अत्र माल्यवच्छब्देन श्रीमायण
प्रसिद्धमाल्यवद्विषय अपितु सुरांतरविषयः ५७ इ ष द म: १० अथोऽस्य परमतुष्टस्य परयोत्कृष्टया कृपया
प्रत्युपलब्धमासुरीभिर्मायाभिरनभिभूतं चेतो येषां ते शक्रवाय्वादयो देवा युद्धे पूर्वं यैर्वैरोचनादिभिरभिसंहताः हं
हताः संगता योद्धुमिति शेषः तान् भृशं जघ्नुः १ तदेव प्रपंचयति वैरोचनायेति भगवान् पाकशासन इन्द्रः मिस्वां

माली सुमाल्यतिबलौ युधि पेततुर्यच्चक्रेण कृतशिरसावथ माल्यवांस्तं आहत्य तिग्मगदयाहनदंडजेन्द्रं तावच्छिरोच्छि
नदरेर्नदतोरिणाद्यः ५७ इ श्री भा व म पु ए म धे घ भा १० सु ३ च अथो सुराः प्रत्युपल
ब्धचेतसः परस्य पुंसः परयानुकंपया जघ्नुर्भृशं शक्रसमीरणादयस्तांस्तान् रणे यैरभिसंहताः पुरा १
वैरोचनाय संरब्धो भगवान्पाकशासनः उदयच्छद्यदा वज्रं प्रजा हा हेति चुक्रुशुः २ वज्रपाणिस्तमाहेदं तिर
स्कृत्य पुरः स्थितं मनस्विनं सुसंपन्नं विचरंतं महामृधे ३ इ उ चे नटवन्मूढ मायाभिर्मायेशान्नो जिगीष
ति जित्वा बालान्निबद्धाक्षान्नटो हरति तद्धनं ४ आरुरुक्षंति मायाभिरुत्सिसृप्संति ये दिवं तान्दस्यून्विधुनोम्य
ज्ञान्पूर्वस्माच्च पदादधः ५

क्रुद्धः बलये वज्रमुदयच्छदुत्क्षिप्तवान् तदा प्रजा हाहाकारं कुर्वत्य अक्रुशुः रुरुदुः २ वज्रपाणिर्यस्य स इन्द्रः महा
मृधे विचरंतं सुसंरब्धं मनस्विनं युयुत्सुं पुरतः स्थितं बलिं तिरस्कृत्येदं वक्ष्यमाणमाह ३ तावत्तिरस्कारप्रकारमाह हा
म्मां ततएकेनवच आह हे मूढ मायेशान्नोस्मान्नटवन्मायाभिर्जेतुमिच्छसि दृष्टांतमेवोपपादयति जित्वेति निबद्धान्यक्षा
णि येषां तान् बालान् तान् जित्वा नटः कपटवर्ती येषां तेषां धनं हरति तथा ४ मत्प्रभावं मत्वेति वदन् तिरस्करो
ति हे असुर पूर्वस्मात्स्वर्गलब्धात्पदादधोधस्तना त्वदादयस्तान् ता हे आरुरुक्षंति आरोढुमिच्छंति उत्तरोत्तरं लोकमारोढु
मिच्छंति असुरा ये च मायाभिर्दिवं स्वर्गं उत्सिसृप्संति उत्सर्पयितुमिच्छंति तान् दस्यून्पापान् दुर्जनतुल्यानधुना विधुनो
मि हन्मि ५ दुर्मायिनस्तव शिरः सोहं पातयामि यस्य तेन वज्रेणाद्य छेत्ता हरिष्ये हे मंदात्मन् ज्ञातिभिः सह यद्यस्ति धाव

नमुचिस्तु स्वर्णमयाः पुंखाः मूलप्रांतदेशा येषां तैः पंचदशभिर्महद्भिरिषुभिरिंद्रमाहत्य प्रताड्य सजलो मेघ इव स्वयं संरब्धे युद्धे ध्वनं दधा
न २३ ततः सर्वे सुराः प्रावृट्कालिके सूर्यं मेघा इव रथसारथि युक्तं इंद्रं सर्वतः शरकूटैः छादयामासुः २४ तदा तमिंद्रमलक्षयं
तः पश्यंतः सहानुगाः सर्वे देवगणाः अतीव विह्वलितचित्ताः अनायकाश्चुक्रुशुः यथा महार्णवे भिन्ना नौ येषां ते दीर्घी
भावस्त्राशुः अतएव विनिर्जिता वणिक् यथा वाणिज्यं कर्त्तुं यः क्रोशंति तद्वत् २५ ततस्तुराषाडिंद्रः बाणपुंखानां पंज
रात् साश्वरथध्वजसारथिर्विनिर्गतः क्षपात्यये निशावसाने सूर्य इव स्वतेजसा दिशः खमाकाशं पृथिवीं च प्रकाश
यन् बभौ २६ असुराणां शरैरभ्यर्दितां पीडितां स्वसेनां निरीक्ष्य देवो वज्रधरः एकोऽरीन् रिपून् सुरान् हंतुं रुषा वज्रमु
द्यच्छद् उद्धृतवान् २७ स इंद्रो अष्टौ धारा यस्य तेनैव वज्रेणैव बलपाकयोरसुरयोः शिरसी मूर्द्धानौ जहार चिच्छेद

78 नमुचिः पंचदशभिः स्वर्णपुंखैर्महेषुभिः आहत्यानदत्संरब्धः सतोय इव तोयदः २३ सर्वतः शरकूटेन शक्रं स
रथसारथिं छादयामासुरसुराः प्रावृट् सूर्यमिवांबुदाः २४ अलक्षयंतस्तमतीव विह्वला विचुक्रुशुर्देवगणाः
सहानुगाः अनायकाः शत्रुबलेन निर्जिता वणिक्पथा भिन्ननावो यथार्णवे २५ ततस्तुराषाडिषुबद्धपंजराद्वि
निर्गतः साश्वरथध्वजाग्रणीः बभौ दिशः खं पृथिवीं च रोचयन्स्वतेजसा सूर्य इव क्षपात्यये २६ निरीक्ष्य पृतनां देवः प
रैरभ्यर्दितां रणे उदयच्छद्रिपुं हंतुं वज्रं वज्रधरो रुषा २७ स तेनैवाष्टधारेण शिरसी बलपाकयोः ज्ञातीनां पश्यतां
राजन् जहार जनयन् भयं २८ नमुचिस्तद्वधं दृष्ट्वा शोकामर्षरुषान्वितः जिघांसुरिंद्रं नृपते चकार परमोद्यमं २९ अश्म
सारमयं शूलं घंटावद्धेमभूषणं प्रगृह्याभ्यद्रवत्क्रुद्धो हतोऽसीति वितर्जयन् प्राहिणोद्देवराजाय निनदन्मृगराडिव ३० तदापतद्ग
गनतले महाजवं विचिच्छिदे हरिरिषुभिः सहस्रधा तमाहनन्नृप कुलिशेन कंधरे रुषान्वितस्त्रिदशपतिः शिरो हरन् ३१

किं कुर्वन् हे राजन् पश्यतां बलपाकयोर्ज्ञातीनां भयं जनयन् २८ ततो नमुचिस्तयोर्बलपाकयोर्वधं दृष्ट्वा शोकामर्षाभ्यां युक्तः रुषा युक्तः हे नृप
तं शक्रं हंतुमिच्छुः परममुद्यमं यत्नं चकार २९ उद्यममेवाह अश्मसारमयं लोहमयं घंटाभिर्युक्तं हेमभूषणं शूलं प्रगृह्य क्रुद्धो भ्यद्र
वत् हतोऽसीति वितर्जयन् भ्रामयन् सिंह इव विनदन् देवराजायेंद्राय प्राहिणोत् प्रायुंक्त ३० गगनतले महोल्केव दापतत्तच्छू
लं इंद्रः शरैः सहस्रधा विचिच्छिदे हे नृप यतः रुषायुक्तस्त्रिदशपतिरिंद्रः तेन नमुचिं कंधरे कंठे स्थितेन वज्रेण समंता
द्धनन् छिंदंस्तस्य शिरो हर्त्तुमारब्धवान् ३१ रामरामराम रा श्रीतेगोपालाय नमः परमरूपाय नमः रामाय नमः

सिंहोवाहनंयस्यसमहावलोजंभः समीपमागत्यरंहसावल्लेनवेगेनवागदामुद्यम्यशत्रुंहरंजत्रौकंठस्यमूलदेशेः ताडयन्तथागजंचता
डयत् १४ भृशंगदाप्रहारेणव्यथितः अतएवविह्वलीकृतोगजऐरावतोजानुभ्यामवनिंस्पृष्ट्वा परंदुःखंलेभे १५ ततोगजस्यदुः
खंस्यवतामातलिनाहरिद्वयौदशशतैः सहस्रसंख्याकैरश्वैर्युक्तोरथआनीतः समानीतंरथंविभुरिन्द्रोगजमैरावतंमुक्त्वारूढ
वान् १६ तस्ययंतुर्मातलेस्तत्कर्मरथानयनरूपमपूजयद्धो एवंविधेनसारथिनाभवितव्यंइत्येवंवहुमानयन्प्रकाशमा
नेनशूलेनतंमातलिंस्मयमानोयुद्धेहनत् १७ सत्वंधैर्यमालंव्यमातलिर्दुःसहामपिरुजंशूलघातजांव्यथांसेहेःसहत सक्रुद्ध
इन्द्रोवज्रेणजंभस्यशिरोपाहरच्चिच्छेद १८ तस्यजंभस्यज्ञातयोनमुचिवलपाकाख्यास्त्रयोनारदाद्दैत्यैर्जंभंहतंश्रुत्वात्वरयान्विता

ससिंहवाहआसाद्यगदामुद्यम्यरंहसा जत्रावताडयच्छक्रंगजंचसुमहावलः १४ गदाप्रहारव्यथितोभृशंविह्वलितोगजः जानु
भ्यांधरणींस्पृष्ट्वाकश्मलंपरमंययौ १५ ततोरथोमातलिनाहरिभिर्दशशतैर्वृतः आनीतोद्विपमुत्सृज्यरथमारुरुहेविभुः
१६ तस्यतत्पूजयन्कर्मयंतुर्दानवसत्तमः शूलेनज्वलतातंतुस्मयमानोहनन्मृधे १७ सेहेरुजंसुदुर्मर्षांसत्वमालंव्यमातलिः
इन्द्रोजंभस्यसंक्रुद्धोवज्रेणापाहरच्छिरः १८ जंभंश्रुत्वाहतंतस्यज्ञातयोनारदादृषेः नमुचिश्चवलःपाकस्तत्रापेतुस्त्वरान्विताः
१९ वचोभिःपरुषैरिन्द्रमर्दयंतोस्यमर्मसु शरैरवाकिरन्मेघाधाराभिरिवपर्वतं २० हरीन्दशशतान्याजौहर्यश्वस्यवलःशरैः ताव
द्भिरर्दयामासयुगपल्लघुहस्तवान् २१ शताभ्यांमातलिंपाकोरथंसावयवंपृथक् सकृत्संधानमोक्षेणतदद्भुतमभूद्रणे २२

तत्रयुद्धदेशेउपेयुराजग्मुः १९ तेपरुषैर्वचोभिरिन्द्रमर्दयंतस्ताडयंतस्तिरस्कुर्वतः अस्येन्द्रस्यमर्मसुस्थानेषुमेघाजलधारा
भिःपर्वतमिवशरैरवाकिरन् २० वलपाकनमुचीनांमध्येयोवलोविक्रमवान् क्रमेणैकेनाह हरीनिति वलोऽसुरआजौ
संग्रामेहर्यश्वस्यदशशतान्यश्वानामितिशेषः हरीनिन्द्रवाहनान्तावद्भिरेकादशशतैःशरैर्युगपदर्दयामास तताडयतोसौ
लघुहस्तवान् शरसंधानेनोपयुक्तकौशलात्वलाघवहस्तवान् इत्यर्थः २१ पाकोऽसुरःशताभ्यांशराणामितिशेषः
मातलिंरथंचपृथक्पृथगवयवशःयुगपदेकवारसंधानेनमोक्षणेनच तेनरणेऽर्दयामाससनुपाकः तत्सकृत्संधानमो
क्षणंपृथगवयवशोर्दनात्मकंचकर्माद्भुतमभवत् २२

इत्येवंभूतां दैवीं गिरं श्रुत्वा मघवानिन्द्रः सुसमाहितो भूत्वा ध्यायन्नार्द्रशुष्कात्मकं वस्तु चिंतयन् तदुभयात्मकं वस्तु फेनमपश्यत्
नमुभयात्मकं निश्चितवान् ३९ तदेवाह नशुष्केण नचार्द्रेण किंतूभयात्मकेन फेनेनैतदुपलिप्तेन वज्रेण नमुचेः शिरो जहारेत्य
र्थः तं नमुचेर्हंतारमिंद्रं मुनिगणास्तुष्टुवुः माल्यानि पुष्पाणि ववृषुः ४० गंधर्वश्रेष्ठौ विश्वावसुः परावसुश्च गानं चक्रतुः देवदुंदुभ
यो नेदुः ध्वनुः नर्तकाः स्त्रियः मुदा ननृतुः ४१ यथेन्द्रस्तथान्येपि वाय्वादयः प्रतिद्वंद्वानस्त्रौघैः सिंहाः क्षुद्रमृगानिव सूदयामासुर्जघ्नुः
४२ एवं देवैर्दानवेषु दनवसंक्षये दृष्ट्वा यावद्दानवसंक्षयो भविष्यतीत्यालोच्यैतावत्त्वरणाच्चतुर्मुखेन प्रेषितो भगवान्नारदः
हे नृप विबुधर्षभानिन्द्रादीन् वारयामास ४३ नारदकृतनिवारणप्रकारमाह भवद्भिरिति नारायणस्य भुज एवाश्रयो

७९ तां दैवीं गिरमाकर्ण्य मघवान्सुसमाहितः ध्यायन्फेनमथापश्यदुपायमुभयात्मकं ३९ नशुष्केण नचार्द्रेण ज
हार नमुचेः शिरः तं तुष्टुवुर्मुनिगणा माल्यैश्चावाकिरन्विभुं ४० गंधर्वमुख्यौ जगतुर्विश्वावसुपरावसू देवदुंदु
भयो नेदुर्नर्तक्यो ननृतुर्मुदा ४१ अन्येप्येवं प्रतिद्वंद्वान्वाय्वग्निवरुणादयः सूदयामासुरस्त्रौघैर्मृगान्केसरिणो य
था ४२ ब्रह्मणा प्रेषितो देवान्देवर्षिर्नारदो नृप वारयामास विबुधान्दृष्ट्वा दानवसंक्षयं ४३ नारद उवाच भव
सर्वे त्रिविष्टपं २ द्भिरमृतं प्राप्तं नारायणभुजाश्रयैः श्रिया समेधिताः सर्व उपारमत विग्रहात् ४४ श्रीशुक उवाच संयम्य मन्युसंरंभं मान
यंतो मुनेर्वचः उपगीयमानानुचरैर्ययुः ४५ येवशिष्टा रणे तस्मिन्नारदानुमतेन ते बलिं विपन्नमादाय अस्तंगि ९२
रिमुपागमन् ४६ तत्राविनष्टावयवान्विद्यमानशिरोधरान् उशना जीवयामास संजीविन्या स्वविद्यया ४७

येषां ते हेतुगर्भमिदं भवद्भिरमृतं लब्धं पीतं इतियावत् तथापि श्रिया त्रैलोक्यलक्ष्म्या च सर्वे समेधिता अतोधुना विग्रहात्
कलहादुपारमत ४४ एवंभूतं नारदस्य वचो मानयंतो देवा मन्युं तत्प्रयुक्तं युद्धोद्योगं चोपसंहृत्य सर्वे इन्द्रादयो देवा अनुचरै
रुपगीयमानाः संधिरार्थः त्रिविष्टपं स्वर्गलोकं ययुः ४५ ततस्तस्मिन् रणे ये हता वशिष्टा दानवा दैत्याश्च ते सर्वे नारदस्या
नुज्ञया विपन्नं वज्रप्रहारेण भूमौ पयातं बलिमादाय अस्ताद्रिं ययुः ४६ तत्रास्ताद्रौ उशना भार्गवः नविनष्टा अवयवा येषां
विद्यमाना शिरोधरा येषां तान् सुरान्स्वसंबंधिन्याऽनेनैतरसाधारणत्वं सूचितं मृतसंजीविन्याख्यया विद्यया मंत्रविद्य
याजीवयामास सर्वाः ४७

पः सुरपतिनेन्द्रेणौजसा बलेनेरितः प्रयुक्त ऊर्जितः बलवान् वज्रः स तस्य नमुचेस्त्वचं चर्मापि न विभेद भेत्तुं नाशक्नोत् इत्यर्थः अतिवीर्य्यैर्वज्रं
भिनत्तीति तथाभूतो वज्रो नमुचेः शिरोधरत्वचातिरस्कृतः इत्येतत्परमद्भुतमासीदिति शेषः ३२ तस्माच्छत्रोर्नमुचेरिन्द्रो वि
भेद्भीतो भवत्कुतः यतो वज्रः प्रतिहतो बभूव तस्य भयनिमित्तां चिंतां दर्शयति इदं वज्रप्रतिहतिरित्येतत्किं दैवयोगेन भूतं किं [illegible] बालो
कविमोहनं जातं लोकविमोहनार्थं जातं इत्यर्थः ३३ अन्यथा क्वाप्यप्रतिहते न वज्रेण नैवं भवितव्यं इत्याह येनेति मे मया कर्त्री
येन वज्रेण [illegible] पूर्वं महीध्राणां पक्षच्छेदः कृतः कथंभूतानां भारैः पतत्रैः पक्षैः भुवि पततां प्रजा
नां क्षये प्रजानां प्राणे निमित्ते विशतां च ३४ किं च त्वष्टुः संबंधि सारमयं वीर्याधिकं यत्तपः स एव वज्रः स येन वज्रेण

न तस्य हि त्वचमपि वज्र ऊर्जितो बिभेद यः सुरपतिनौजसेरितः तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधर
त्वचा ३२ तस्मादिन्द्रो बिभेच्छत्रोर्वज्रः प्रतिहतो यतः किमिदं दैवयोगेन भूतं लोकविमोहनं ३३ येन मे
पूर्वं महीध्राणां पक्षच्छेदः प्रजात्यये कृतो निविशतां भारैः पतत्रैः पततां भुवि ३४ तपःसारमयं त्वाष्ट्रं वृत्रो येन
विपाटितः अन्ये चापि बलोपेताः सर्वास्त्रैरक्षतत्वचः ३५ सोयं प्रतिहतो वज्रो मया मुक्तोऽसुरेऽल्पके नाहं त
दाददे दण्डं ब्रह्मतेजोऽप्यकारणं ३६ इति शक्रं विषीदन्तमाह वागशरीरिणी नायं शुष्कैरथो नार्द्रैर्वधमर्हति दानवः
३७ मयास्मै यद्वरो दत्तो मृत्युर्नैवार्द्रशुष्कयोः अतोऽन्यश्चिन्तनीयस्ते उपायो मघवन् रिपोः ३८

विपाटितः किं चान्ये-आधुना बलिजंभपाकबलादयोऽतिबला अत एव सर्वैर्वज्रेतरैरस्त्रैरक्षता त्वचो येषां ते निपाति
ताः ३५ सोऽयमेवंविधो वज्रः तेनैव मया प्रयुक्तोऽल्पके क्षुद्रे असुरे नमुचौ प्रतिहतो बभूव ब्रह्मतेजः दधीचेः सामर्थ्यरूपमप्यप्र
नाऽकारणं निष्कारणं दण्डं लक्षणं तुल्यं जातं वज्रं नाददे न परिगृह्णामि ३६ इत्थं विषीदंतं इन्द्रमशरीरिणी परा देवता
वागुवाच तदेवाह सार्द्धेन अयं दानवो नमुचिः शुष्कैरथो आर्द्रैरपि वधं नार्हति ३७ यतो मयास्मै नमुचये वरो दत्तः कौसा
वार्द्रशुष्काभ्यां मृत्युरस्य नैव भवत्विति अतो वज्रस्य शुष्कत्वान्नतेनायं हन्यते किंतु हे मघवन्नस्य रिपोर्मयार्थं
त्वयान्य उपायश्चिन्तनीयः ३८

ग४ ग४

एवंकार्य्यकारणोभयावस्य चिदचिदात्मकत्वं कृत्स्नजगत्कारणत्वं उपादानरूपं निमित्तरूपं चेति द्विविधमभिप्रेतं तत्र तावदुपादानत्वमुपपादयन् तत्प्रयुक्तं विकारं परिहरति आद्यन्ताविति यत इति सार्वविभक्तिकस्तसिः ततश्च यतो यस्मिन् भूयेन यदिति लभ्यते अस्य जगत आद्यन्तावादिः सृष्टिरुत्पत्तिः यतः सूक्ष्मचिदचिद्विशिष्टात् अन्तोलयो यस्मिन् मध्यं स्थितिर्येन यच्चेदं यच्चान्यजगतो विलक्षणमहं प्रत्यर्थ्यशरीरकं बहिः परार्थ्यशरीरकं च यस्माद्यस्य प्रकृतिवन्मगतविकाररहितस्य च एतान्याद्यन्तमध्यानि न सन्तीति एतेषां शरीरभूतचिदचिज्जत्वादितिभावः तदेवंभूतं सत्यं स्वरूपतः स्वभावतश्च विकाररहितं चिन्ति

ग१

२० आद्यन्तावस्य यन्मध्यमिदमन्यदहं बहिः यतोऽव्ययस्य नैतानि
तत्सत्यं ब्रह्म चिद्भवान् ५ तवैव चरणाम्भोजं श्रेयस्कामा नि
राशिषः विसृज्योभयतः सङ्गं मुनयः समुपासते ६

त्या संकुचितापरिच्छिन्नज्ञानाश्रयं तदात्मकं त्वं च ब्रह्मस्वरूपेण गुणैश्च निरतिशयबृहत् भवानेवाद्यन्तावित्यादिना जगत्कारणत्वेनोक्तस्य स्वरूपं विशोध्यते तत्सत्यं ब्रह्म चिदिति यथा सत्यं ज्ञानमनन्तं ब्रह्मेत्यनेन जगत्कारण[illegible]वादिवाक्ये न स्वरूपं विशोध्यते तद्वत् सत्यादिवाक्यार्थोऽत्रानुसंधेयः सत्यशब्देन सत्यपदस्य चिद्ब्रह्मशब्दाभ्यां ज्ञानानन्तपदयोश्चार्थ[illegible]स्याभिलापनात् ५ कश्चिच्छ्रेयः कारणं तु ध्येय इति जगत्कारणत्व[illegible]नियतत्वमुपास्यत्वमनितरसाधारण[illegible]त्वं चाह तवैवेति यतो[illegible]जगत्कारणभूतस्त्वमतस्तवैव चरणाम्भोजं निःश्रेयसकामा मुमुक्षवः उभयतः इहामुत्र च सङ्गं त्यक्त्वा निराशिषः अनन्यप्रयोजना मुनयः मननशीलाः भक्ताः त्वत्स्वरूपरूपगुणविभूतिमननशीला इत्यर्थः समुपासते सम्यग्विधेरनभिभूयमानाः सन्तः उपास[illegible]त इत्यर्थः ६

वलिश्च उणानसासंस्य च्छ: प्रत्यापन्नानि पुन: प्राप्तानीन्द्रियाणि स्मृतिश्च येन स: पराजितो पिनादु:स्व लु तो यत्तो लोकतत्त्वविच
क्षण: तसंपरीलननिपुण: ५८ ३ श्री ए द ११ भगवन्मायया देस्यामुमुहुरिति नविचित्रं यतो रुद्रं मु महे इत्तिथक्रमध्या
यःप्रवर्त्तते वृषध्वज इति हरि यौषिद्रूपेण दानवान्मोहयित्वा सुरगणान्सोमममपाययदिती दं श्रुत्वा वृषध्वजो रुद्र: भवान्यासह वृषमा
रूढ: सर्वैर्भूतगणै: प्रमथादिभि: परिवृतो यत्र मधुसूदनो वर्त्ते ते तत्र योषिद्रूपं द्रष्टुं जगाम १ २ सोमयोमयासह साद रं यथोतया
भगवता सभाजित: सत्कृतो रुद्र: सम्यगुपविष्टो हरिं प्रतिप्रत्यस्म यन्नि दं वक्ष्यमाणमुवाच प्रतिपूजा त्वस्तुति: ३ तामेवाह देव
६६ देवस्योभिरच्छभि: तवासुरसंमोहनाय धृतं योषिद्रूपं महेन्द्र दर्शयेति प्रार्थयितुकामो नेदं नेव वालानसुरान्वंचयितुं मया धृतं कपट
पुंश्चली रूपं द्रष्टुं किमिच्छसीति मा प्रत्याचक्ष्व इत्याभि प्रेयन्न्कलत्वं जगदुदयविभवलय ।बंधमोक्षलीलस्याचिंत्य विविध विचित्र श

वलिश्चोनष्टासास्य च्छ: प्रत्यापन्नेन्द्रियस्मृति: पराजितोपिनाविषण्णो लोकतत्त्वविचक्षण: ५८ ३ श्री ज्ञा व म पु
रो म धे का गो य: ११ अ ३ च वृषध्वजो निशाम्येदं योषिद्रूपेण दानवान् मोहयित्वासुरगणान् ह
रि: सोममपाययत् १ वृषमारुह्य गिरिश: सर्वभूतगणैर्वृत: भवान्याच वधे द्रष्टुं यत्रास्ते मधुसूदन: २ सभाजितो
भगवता सोमया भवान्भव: सूपविष्ट उवाचेदं प्रतिपूज्य स्मयन्हरिं ३ म दे उ च देवदेव जगद्व्यापिन् जगदीश ज
गन्मय सर्वेषामपि भावानां त्वमात्मा हेतुरीश्वर: ४ रामाय रामभद्राय रामचंद्राय वेधसे रामरामराम रामो विजयते

कैस्तवत द्योषिद्रूपं धर्म्मप्रतिपक्ष जगदुपद्रवकृदसुरमोहनं तद्धि नाद्यापश्यं त्वाद्यमत्स्यादि रूपवल्लीलयात्मीयसंकल्पेन धृतं दर्शनी
यमेवान्यथा प्रकृति पुरुषविलक्षणस्यावाप्रसमस्तकामस्य निरतिशयानंदमहोदधेस्तवेदं प्राकृतस्येव न घटते इति वक्तुम..नि
१२ तं साधारणैर्हेतुभि: संबोधयति हे देवादेव देवानामस्मदादीनामपि देव हे जगद्व्यापिन् जगद्व्यापित्वे .... नवाप्यकाप्यवह
त्याह सर्वेषामपि चेतनात्मकानां भावानां पदार्थानामात्मा त्वमेव आत्मत्वमेत: प्रविश्य धारकत्वे न केवलमात्मैवापितु हेतु: कारणभूत:
ईश्वर: कारणाबस्यचिदस्विन्नियंता च त्वमेवेत्यर्थ: ४ श्रीराम राम राम श्री श्री श्री श्री छ ह
चेतना२

न्याला ८४

भा.प्र.टी. अनन्यदन्यदित्युक्तेऽनन्यत्वे उपपादयति एक इति सदसच्चिदचिदुभयात्मकं जगत्त्वमेक एव कार्यभूताच्चिदचिदुभयात्मकाज्जगतस्तत्कारणभूतस्त्वम
३८ भिन्न एवेत्यर्थः कार्यकारणयोरभेदादिति भावः ननु कार्यकारणाभ्यां सजातीयाभ्यामेव भवितव्यं कार्यं च जगच्चिदचिदात्मकमहं तु तदुभ
यविलक्षणत्वेन त्वयैवाभिहित इत्याशंक्य निरस्यति कीदृशं त्विति नहि एक इति एकः नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरकत्वेन एकः सदसदात्म
कजगद्गतभेदस्य नामरूपविभागप्रयुक्तत्वेन तत्सति संबंध्येकत्वे तं भावप्रयुक्तमेवैकशब्दार्थः एवं च सालक्षण्यात्कार्यकारणभावस्तयोर
भेदश्चोपपन्न इति भावः कार्यकारणयोरभेदे दृष्टांतमाह अद्वयमिति कृताकृतं कार्यकारणावस्थमद्वयमेकमेव [illegible] इदं कार्यका सुवर्णवद्वत्
रणयोर्जगद्ब्रह्मणोर्न वस्तुभेदः न वस्तुभेद इत्यनेन कार्यत्वकारणत्वावस्थयोरवस्थातद्वतोश्चाभेदे व्यवस्थावतोर्वस्तुनोः कार्यका तदिव
रणयोरभेदः कारणद्रव्यमेवावस्थांतरापन्नं कार्यमित्युक्तं अनेनासत्कार्यवादश्च दासः सूचितः तमेवोपपादयति त्वयिका

21 एकस्त्वमेव सदसद्द्वयमद्वयं च स्वर्णं कृताकृतमिवेह न वस्तुभेदः अज्ञानतस्त्व
यि जनैर्विहितो विकल्पो यस्माद्गुणव्यतिकरो निरूपाधिकस्य ८ रामाय

वि। र्यकारणरूपे त्वयि विकल्पो भेदः जनैर्वैशेषिकादिभिरज्ञानकल्पितः बुद्धिशाकांतरादीनामवस्थाभेदेनाप्युपपत्तेर्वस्तुभेदोऽज्ञानक
ल्पित इति भावः यतोऽयं गुणव्यतिकरः गुणपरिणामात्मकः प्रपंचः निरूपाधिकस्य प्रकृतिपुरुषाभ्यां निष्कृष्टस्वरूपस्य तव संबंधी
त्वच्छरीरभूतस्त्वत्तस्तत्स्वरूपे शरीरभूताद्गुणव्यतिकराद्द्वये भिन्नं चेत्यर्थः ८ एवमनन्यत्वान्यत्वे उपपादिते तदेवं प्रकृतिपुरु
ता४ षविलक्षणत्वेन वेदान्तवेद्यस्त्वमेवेति स्तुतं किं बहुना सर्वे वेदा यत्पदमामनन्ति वेदैश्च सर्वैरहमेव वेद्यो वेदांतकृद्वेदविदे
व चाहमित्याद्युक्तरीत्या निगमादिषु सर्वत्र धर्मब्रह्मादिशब्दैरभिधीयमानस्त्वमेवेत्याह त्वां ब्रह्मेति केचिद्ब्रह्मे
तरभागास्त्वां [illegible] वदंति मन्यंते ब्रह्मेति बोधयंति केचिद्ब्रह्मेति नो ब्रह्मेति व्यवहरंतीत्यर्थः एके मीमांसकाः धर्मं वद
ति यद्यप्यपूर्वाख्यं क्रियाजन्यं ते धर्मं मन्यंते तथापि फलमतउपपत्तेरिति शारीरकन्यायेनापूर्वस्यापि भगवत्प्रसाद

ब्रह्मेत्यार

अथ लीलार्थमेव येषिद्रूपमुपात्तमन्यथा प्रकृतिपुरुषविलक्षणस्य प्राकृतवन्नघंतस्सभिप्रयन प्रकृतिपुरुषयोरसंभावि नैर्धर्मैर्विशिष्टं वेदं
तवेयं जगन्निमित्त कारणं स्तौति त्वमिति तं ब्रह्म स्वरूपेण गुणैश्च वर्ह्म ब्रह्म शब्दवाच्य परमात्मतत्वं त्वमेव किंतद्ब्रह्म यत्सर्वं सम
र्वं व्याप्यमतं स्वरूपतः स्वभावतश्च विकार रहितं ब्रह्मामृत शब्दाभ्यां सत्यादिवाक्योदितं प्रत्यभिज्ञापितं पूर्णपदेन तेनेदं पूर्णं पु
रुषेण सर्वमिति वाक्योदितं अत्र पूर्णशब्दः कर्तरि क्तांतः विगुणं स्थौल्यादि गुण रहितमने नास्थूलमनण्वह्रस्वमित्याद्य
स्थूलादि वाक्योदितं प्रत्यभिज्ञापितं विशोकमित्यनेन य एष आत्माऽपहतपाप्मेत्यादि वाक्योदितं आनंदमात्रमित्यनेन वि
ज्ञानमानंदमित्यादि वाक्योदितं मात्रचा दुःखसंभेद्युदासः अविकारमित्यनेन निष्क्रियं निष्कलमित्यादि वाक्योदि
तं [redacted] निरवद्यत्वं प्रत्यभिज्ञानादनन्यत् सर्वशरीरकत्वात्सर्वकारणत्वाच्च सर्वस्मात्प्रकृति
पुरुषात्मकाज्जगतोनन्यत् अनेनैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा अयमात्मा ब्रह्म तत्त्वमसि सर्वं खल्विदं ब्रह्मेत्यादि वाक्यार्थः प्र
त्यपूर्णेश्लोकस्य तं विगुणं विशोकमानंदमात्रमविकारमनन्यदन्यत् विश्वस्य
हेतुरुदयस्थितिसंयमानामात्मेश्वरश्च तदपेक्षतयाऽनपेक्षः ७ रामः
त्यभिज्ञापितः अन्यच्छरीराच्छरीरिणोभिन्नत्वादन्यत् अनेन य आत्मनि तिष्ठन्यः पृथिव्यां तिष्ठन्नित्यादिश्रुत्यर्थः प्रत्यभिज्ञापि
तः विश्वस्योदयस्थितिसंयमानो सृष्टिस्थितिलयानां हेतुरित्यनेन सदेव सोम्येदमग्र आसीत् अनेनजीवेनात्मनानुप्रविश्य सन्मूलाः
सोम्येमाः सर्वाः प्रजाः सदायतना सत्प्रतिष्ठा इत्यादिका रणवाक्यार्थः आत्मेश्वर अन आत्मेश्वरः पतिंविश्वस्यात्मेश्वरं न स्वमञ्चापधि
कश्चदृश्यते स्वमहिम्नि प्रतिष्ठितइत्यादिश्रुत्यर्थोनुसंहितः यद्यपि विश्वस्य चिदचिदात्मकस्यात्मा तदुदयस्थितिसंयमानां व्यापारणात
दपेक्षतयोदितं भवति एवंभूतोपि त्वमनपेक्षः अपेक्षारहितः अनादरः सर्वमिदं कृत्याणगुणोज्ञानमभ्यादयनोऽप्यनादरः
अनेन सर्वमिदमभ्यात्तो वाक्यनादर इतिश्रुत्यर्थोऽनुसंहितः अवाप्तसमस्तकामत्वेनापेक्षणीयस्याभावादनादरः अतएवावाक
अजल्पकः परिपूर्णैश्वर्यत्वाद्बुलोदिस्तंवपर्यन्तं निखिलं जगत्तृणीकृत्योपमासीन इतिश्रुत्यर्थः प्रत्यभिज्ञापितइत्यर्थः
७ रामराघ श्रीरामराघवराम राम रामश्री ५

एवं प्रतिपृच्छ्य प्रस्तुतं विज्ञापयति द्वाभ्यां अवतारा इति गुणैः सर्वज्ञत्वसर्वान्तरात्मत्वादिभिः कल्याणगुणैः रममाणस्य लीलारसमनुभवतस्त
वावतारा वराहादयो बहवो मया दृष्टाः योषिद्रूपं पुनर्दृष्टं सोऽहं द्रष्टुं भवदवतारेष्वधुना यत्तत्त्वया धृतं योषिद्वपुस्तद्द्रष्टुमिच्छा
मि १२ येन योषिद्वपुषा दैत्याः संमोहिताः सुरास्त्वमृतं पायिताः तद्योषिद्वपुर्द्रष्टुमिच्छवो वयमागतास्तद्दर्शनेऽस्माकमधिकं कौतू
हलं वर्तते १३ एवमुक्तो भगवान् रुद्रं प्रत्यभाषतेत्याह शुकः एवमिति इत्थं शूलपाणिना रुद्रेणाभ्यर्थितः प्रार्थितो भगवा
न् भावो गंभीरं केनचिदभिप्रायेण गंभीरं यथा तथा प्रहस्य रुद्रं प्रत्यभाषत १४ तदेवाह द्वाभ्यां कौतूहलायेति पीयूषभा
जने मृतकलशे गते दैत्यैरपहृते सति सुरकार्याणि योषिद्वेषेण भविष्यंतीति पश्यता आलोचयता मया दैत्या

२२ अवतारा मया दृष्टा रममाणस्य ते गुणैः सोऽहं तद्द्रष्टुमिच्छामि यत्ते योषिद्वपुर्धृतं १२ येन संमोहिता
दैत्याः पायिताश्चामृतं सुराः तद्दिदृक्षव आयाताः परं कौतूहलं हि नः १३ श्रु उ च एवमभ्यर्थि
तो विष्णुर्भगवान् शूलपाणिना प्रहस्य भावगंभीरं गिरिशं प्रत्यभाषत १५ भ गा उ कौतूहलाय दैत्या
नां योषिद्वेषो मया धृतः पश्यता सुरकार्याणि गते पीयूषभाजने १५ तत्तेऽहं दर्शयिष्यामि दिदृक्षोः सुरसत्तम
कामिनां बहुमतं संकल्पप्रभवोदयं १६ श्रु उ च इति ब्रुवाणो भगवांस्तत्रैवांतरधीयत सर्वतश्चारयंश्च
क्षुर्भव आस्ते सहोमया १७

नां कौतूहलाय योषिद्वेषः धृतः उपात्तः १५ तत्तेऽहमिति दिदृक्षोरहं दर्शयिष्यामीत्यन्वयः पश्यतेत्यस्यायं भावः अवश्यं तावदमृतान्दैत्यान्
वंचयित्वा देवेभ्योऽमृतं देयं न चेदं वैषम्यं रूपांतरेण तथा कर्तुमुचितमतो वंचनमोहनादिसारे कामिनीरूपे मया धृतं इति कथंभू
तं योषिद्वपुः कामिनां बहुमतं कामुकैर्बहुमाननीयं संकल्पप्रभवः कामः तस्योदयो यस्मात्तादृशं १६ इत्युक्त्वा तर्हि तोभ
गवान् योषिद्वपुस्त्वनिर्मितां कांचिद्युवतिं दर्शयामासेत्याह मुनिः इतीति इत्थं ब्रुवाणोऽभिदधानो भगवान् तत्रैवांतर्हितो ब
भूव रुद्रस्तु सह उमया भगवान्यासह सर्वतः परितश्चक्षुः प्रसारयन्सर्वत्र पश्यन्नास्ते तत्रौदासीन्यं चक्रे १७ रामाय नमः श्रीः

दूरूपत्वमकामेनापि तैरवश्यं वाच्यं इति यागादिक्रियाया भगवदाराधनरूपत्वेन तत्प्रतिपादकस्य वेदपूर्वभागस्याराध्योऽलौ
किकश्रेयस्साधने सिद्धधर्मरूपेणास्मिन्नेव पर्य्यवसानं तत्रापि तात्पर्य्यवस्या भगवानेव प्रतिपाद्यते इत्यभिप्रायेण
धर्ममेकेऽवयंतीत्युक्तं ये च वेदविदो विप्रा ये चाध्यात्मविदो जनाः ते वदंति महात्मानं कृष्णं धर्मं सनातनमिति ए
के सेश्वरसांख्याः यौगिकाश्च तत्र वेदांतविरुद्धतत्त्वापादने नेतरग्राह्यं निरीश्वरसांख्यस्मृतिस्तु निर्मूलैवेति भावः
सदसतोः प्रकृतिपुरुषयोः परं विलक्षणं परेशमाद्यमवयंति अन्ये केचित्पांचरात्रास्तु नवशक्तियुतं विमलोत्कर्षिणी
वा॰अं॰५ ज्ञानक्रिया ततः परं प्रह्वा सत्या तथेशानानुग्रहा नवशक्तय इत्युक्तं नवशक्तियुतं परं निःसमाभ्यधिकमव्ययं निर्विका

त्वां ब्रह्म केचिदवयंत्युत धर्ममेके एके परं सदसतोः पुरुषं परेशं अन्येऽवयंति नवशक्तियुतं परं त्वां केचिन्महा
पुरुषमव्ययमात्मतंत्रं ९ नाहं परायुरृषयो न मरीचिमुख्या जानंति यद्विरचितं खलु सत्वसर्गाः य
न्मायया मुषितचेतस ईश दैत्यमर्त्यादयः किमुत शश्वदभद्रवृत्ताः १० स त्वं समीहितमदः स्थितिज
न्मनाशं भूतेहितं च जगतो भवबंधमोक्षौ वायुर्यथा विशति खं च चराचराख्यं सर्वं तदात्मकतयाऽवग
मोऽवरुंत्से ११ वंतो॥२

रं स्वतंत्रं महापुरुषमवयंति ९ न कालेन त्वद्गुणानां अहं वयं ब्रह्म वा मो यत्स्वयाऽसृष्टं विश्वमेव वयं ततो न जानीमः किं पुनरन्ये तत्त्वस्व पद॥१
रूपगुणादिकमस्मदादय एव न जानंति किं पुनः शश्वत्सदाऽभद्रवृत्ताः ज्ञानशून्याः कोपात् अमंगलकर्मपरायणाः दैत्यमर्त्यादयो न जानंती
ति १० त्वमेकोऽपरिछिन्नस्वरूपस्वभावः सर्वज्ञ इत्याह स इति स त्वं भुक्तविधस्त्वं सर्वं तदात्मकतया सर्वांतरात्मकतया व्याप्येति शे
षः अवरुंत्से जानासि कथंभूतोऽवगमः ज्ञानस्वरूपः सर्वात्मकतया प्रात्मैलावगमो वा किं तत्सर्वं समीहितं स्वकृतमदेमुष्यजग
तः स्थितिसृष्टिनाशानां समाहारस्तद्भूतानामीहितं च जगतो भवरूपं बंधमोक्षं चेत्येतत्सर्वं अवभुंक्ष्व इति पाठांतरं तदान्तरात्म
तयाऽवगमः अवगछतीत्यवगमः कर्तरि पचाद्यजंतः ज्ञानन्नेव भुंक्षे लीलारसमनुभवसीत्यर्थः व्याप्तौ दृष्टांतः चरा
चरात्मकं वस्तु वायुः खमाकाशं च यथा आविशति तद्वदिति ११

यद्येति॥

सः क्रीडमानः कंदुको यदा तस्याः कराग्राद्दूरं गतः तदा तं कंदुकमनु व्रजंत्याः स्त्रियाः लघुसूक्ष्मं वासः ससूत्रं कांचीसहितं मारुतो देवस्य
रुद्रस्य पश्यतः सतः जहार किल २३ एवमेवंभूतां मारुतेनापहृतवाससं नग्नां स्त्रीं यावत् रुचिरः सुंदरोपांगो यस्याः दर्शनीयां इति सु
दरत्वादिलिंभावः मनोरमां तां दृष्ट्वा रुद्रस्तस्यां विषज्जंत्यां लज्जया कुंचितकटाक्षे रात्मानं निरीक्षमाणायां मनश्चक्रे किल
२४ तयापहृतविवेको तएव तया कृत उत्पादितः स्मरः कामस्तेन विह्वलो तएव गतो ह्रीर्यस्य कामातुरत्वान्न भयं न लज्जेति भिमा
यादेवंभूतो रुद्रः भवान्याः पश्यंत्याः सत्या अपि तत्पदं तस्याः समीपं ययौ गतः २५ तमायांतं रुद्रं विलोक्य सा स्त्री विव
स्त्राऽत एव वृक्षेषु निलीयमाना तिरोधाना हसंती नान्वतिष्ठत क्वचित्स्थिरं नेतस्थौ २६ तामननुतिष्ठंतीम

६३

23 तस्याः कराग्रात्स तु कंदुको यदागतो विदूरं तमनुव्रजत्स्त्रियः वासः ससूत्रं लघु मारुतोहरद्भवस्य देवस्य किला
नुपश्यतः २३ एवं तां रुचिरापांगीं दर्शनीयां मनोरमां दृष्ट्वा तस्यां मनश्चक्रे विषज्जंत्यां भवः किल २४ तयाप
हृतविज्ञानस्तत्कृतस्मरविह्वलः भवान्या अपि पश्यंत्या गतह्रीस्तत्पदं ययौ २५ सा तमायांतमालोक्य विवस्त्रा
व्रीडिता भृशं निलीयमाना वृक्षेषु हसंती नान्वतिष्ठत २६ तामन्वगच्छद्भगवान्भवः प्रमुषितेन्द्रियः कामस्य
च वशं नीतः करेणुमिव यूथपः २७ सोनुव्रज्यातिवेगेन गृहीत्वानिच्छतीं स्त्रियं केशबंध उपानीय बाहुभ्यां प
रिषस्वजे २८ सोपगूढा भगवता करिणा करिणी यथा इतस्ततः प्रसर्पंती विप्रकीर्णशिरोरुहा २९ आत्मानं मोच
यित्वांग सुरर्षभभुजांतरात् प्राद्रवत्सा पृथुश्रोणी माया देवविनिर्मिता ३०

भगवान्भवोन्वागच्छत्कथंभूतः प्रमथितानि क्षोभितानीन्द्रियाणि यस्य कामवश्यतां प्राप्तः यथा यूथपो गजः करेणुं स्त्रीमनुगच्छति तद्वत् २७ सोनुगतो १८
रुद्रोऽतिवेगेन समीपमेत्यानिच्छतीमपि स्त्रियं केशबंधे गृहीत्वा स्वसमीपं प्राप्य बाहुभ्यामालिंगितवान् २८ यथा करिणा
गजेन करिणी तथा भगवता रुद्रेणोपगूढा परिष्वक्ता सा योषिद्विप्रकीर्णाः शिरोरुहाः केशा यस्याः इतस्ततः प्रसर्पंती २९ सुर
र्षभस्य रुद्रस्य भुजयोरंतरान्मध्यादात्मानं बलान्मोचयित्वा अंग हे राजन् देवेन भगवता विनिर्मिता सा पृथुश्रोणी मायामोहिनी भ
गवन्मायानिर्मिता था योषित्प्राद्रवत्प्राधावत्

ततस्तत्र विचित्राणि पुष्पाणि अरुणाः पल्लवाश्च येषां ते द्रुमा यस्मिन् तस्मिन्नुपवने वरस्त्रियं श्रेष्ठां स्त्रीं ददर्श भव इति शेषः भग
वन्निर्मिता काचिदियं स्त्री न तु स्वयं पुरुषोत्तमः स्त्रीरूपं जग्राहेति ज्ञापते माद्रवेत्सा एषु श्रोएषा माया देवविनिर्मिता आत्मानं देवमाययाजु
ईक्षते यन्ने दूरत एवास्येरं मोहितोऽस्यं गमापयेत्यनेन शक्तिभिस्तया वगमात् कथंभूतां वरस्त्रियं कंदुकलीलया कंदुकस्य क्री
डया विक्रीडतीं पाकं पचतीतिवल्लि देशः कंदुकक्रीडां कुर्वतीत्यर्थः यद्वा कंदुकलीलयेति हेतु र्थे तृतीया कंदुकक्रीडाज
न्यरसानुभवार्थं कंदुकक्रीडां कुर्वतीत्यर्थः लसद्दुकूलेन पर्यस्ते परिवीते नितंबे मेखला यस्यास्तां १८ उत्पतंती सा कंदु
कवशेन ये आवर्तनोद्वर्तने ताभ्यां कंपितयोः स्तनयोः प्रकृष्टहारस्य च ऊरुभरैः पदे पदे प्रतिपदं मध्ये प्रभज्य
मानामिव चलत्पदमेव प्रवालवत्कोमलं तदितस्ततः नयंतीं १९ दिक्षु भ्रमतः कंदुकस्य चापलैश्चांचल्यैः भृशं प्रो

ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे विक्रीडतीं कंदुकलीलया लसद्दुकूलपर्यस्तनितंबमेखलां १८
आवर्तनोद्वर्तनकंपितस्तनप्रकृष्टहारोरुभरैः पदे पदे प्रभज्यमानामिव मध्यतश्चलत्पदप्रवालं नयतीं ततस्ततः १९
दिक्षु भ्रमत्कंदुकचापलैर्भृशं प्रोद्विग्नतारायतलोललोचनां स्वकर्णविभ्राजितकुंडलोल्लसत्कपोलनीलालकमं
डितानना २० श्लथद्दुकूलं कबरीं च विच्युतां सन्नह्यतीं वामकरेण वल्गुना विनिघ्नतीमन्यकरेण कंदुकं विमोहयंतीं जगदात्म
मायया २१ तां वीक्ष्य देव इति कंदुकलीलयेषद्व्रीडास्फुटस्मितविसृष्टकटाक्षमुष्टः स्त्रीप्रेक्षणप्रतिसमीक्षणविह्वलात्मा
नात्मानमंतिक उमां स्वगणांश्च वेद २२

द्विग्नेतारे कनीनिके तारे यस्य लोले आयते लोचने यस्यास्तां स्वकर्णाभ्यां विभ्राजिते ये कुंडले ताभ्यां उल्लसंतौ कपोलौ ताभ्यां च नीलाल
कैश्च मंडितमाननं यस्यास्तां २० श्लथच्छिथिलं दुकूलं विच्युतां कबरीं धम्मिल्लं च वल्गुना सुंदरेण वामहस्तेन सन्नह्यतीं
अन्यतरेण कंदुकं विनिघ्नतीमात्मनः स्वसंबंधिन्या मायया जगद्विमोहयंतीं २१ तां वीक्ष्य देवो रुद्रः आत्मानमंतिक
स्थितां उमां स्वगणांश्च न वेद कथंभूतो देवः इति पाकंदुकलीलातया ईषद्व्रीडया अस्फुटं स्मितं तेन सह विसृष्टो यः क
टाक्षस्तेन मुष्टो वंचितः अत एव स्त्रियाः प्रेक्षणं तयाच प्रति समीक्षणं ताभ्यां विह्वलः परवश आ
त्मा मनो यस्य तथाभूतः २२

भा॰अ॰टी
५१

त्वांविनाकोनुपुमान्ममामायांविषक्तःविषयासक्तोतितरेत् विषक्तइत्यनेनजितेन्द्रियस्तुमत्प्रपन्नोतितरेदेवेतिसूचितं कथंभूतांमदकृतात्मभि
रजितेन्द्रियैर्दुस्तरांस्तांस्तान्भावान्कामक्रोधादीनिविसृजतीं ३९ एवंस्वमायायादुस्तरत्वमभिधायतांविशिंषंस्तयातस्यानभि
भवमनुमन्यतेतिसेयमुक्तविधात्रिगुणात्मिकाकालेनकालशरीरकेणमयासहप्राप्तुचितकालेनभागशः रजआद्यंशेनसमेताव्या
प्तामायात्वांनाभिभविष्यतिमोहितंनकरिष्यतीत्यर्थः ४० एवमित्थंहेराजन्भगवताश्रीवत्सांकेनसत्कृतोरुद्रस्तंश्रीवत्सांकमामं
त्र्यानुज्ञाप्यतेनानुज्ञातस्तंपरिक्रम्यचसगणःसप्रमथादिगणःस्वालयंकैलासाद्रिंजगाम ४१ अथानंतरंहेभारत ऋषि
मुख्यानांपश्यतांसतांभगवान्भवःआत्मनोंशभूतांशरीरार्धभूतांभवानींप्रत्याचष्टोवाच ४२ तदेवाह अयीतिसभ्यांपर

कोनुमेतितरेन्मायांविषक्तस्त्वदृतेपुमान् तांस्तान्विसृजतींभावान्दुस्तरामकृतात्मभिः ३९ सेयंगुणवतीमायानत्वामभि
कालेनर भविष्यतिमयासमेताकालरूपेणभागशः ४० श्रु उ च एवंभगवताराजन्श्रीवत्सांकेनसत्कृतः आमंत्र्यतंपरिक्र
म्यसगणःस्वालयंययौ ४१ आत्मांशभूतांतांमायांभवानींभगवान्भवः पश्यतामृषिमुख्यानांप्रत्याचष्टाथभारत ४२ रु उ
24 च अपिव्यपश्यस्त्वमजस्यमायांपरस्यपुंसःपरदेवतायाः अहंकलानामृषभोपिमुह्येययावशान्येकिमुतास्वतंत्राः ४३
यंमामपृच्छस्त्वमुपेत्ययोगात्समासहस्रांतउपारतंवै सएषसाक्षात्पुरुषःपुराणोनयत्रकालोविशतेनवेद ४४
श्रु उ च इतितेभिहितस्तातविक्रमःशार्ङ्गधन्वनः सिंधोर्निर्मथनेयेनधृतःपृष्ठेमहाचलः ४५ रामायनमः

देवतायाअजस्यधर्मायजोत्पत्तिरहितस्यपरमपुरुषस्यमायांत्वंव्यपश्यः मत्तस्त्वंपश्येत्यर्थः तदेवदर्शयति कलानांविद्यानांमृषभोधिपति
रहंःपारवश्यरहितब्रह्माद्यपिमुह्येकिंपुनरस्वतंत्राःमर्त्यादिमायोमुह्यंतीति ४३ समासहस्रांतेनेकसंवत्सरसहस्रपर्यंतेतपस्तप्त्वातदंतेयो
गात्तपोयोगादुपारतंनिवृत्तंमांत्वंयदपृच्छः त्वंपुरास्यवस्तुकिमितिपृष्टवत्यसि ससाक्षादेवएवपुराणःपुरुषः यत्रयस्मि
न्पुराणेपुरुषेकालोनविशतिप्रकालोनकलयतिकालापरिछिन्नइत्यर्थः यश्चकालादिकंसर्वंवस्तुजातंयुगपत्साक्षाद्वेदस
र्वज्ञइत्यर्थः ४४ अष्टाध्यायार्थंनिगमयतिमुनिः इतीति हेतातवात्सल्यात्संबोधनंहेराजन्नित्थंशार्ङ्गधन्वनोऽजितस्यविक्र
मःतेतुभ्यंमयाभिहितः कोसौयेनाजितेनकूर्मरूपिणासिंधोःक्षीरोदधेर्निर्मथनेकर्मणिमहाचलोमंदराचलःपृष्ठेधृतइति ४५

४१८

वैरिणा कामेन विनिर्जितः वासौ रुद्रस्तस्मादद्भुतकर्मणः विष्णोर्विष्णुनिर्मिताया योषितः पदवीमन्वगच्छत ३१ शुष्मिणः मत्तस्य यू-
थपस्य गजस्य वासितां स्पृष्टवतीं गजीमनुधावत इव तस्य तामनुधावतोऽमोघरेतसो रुद्रस्य रेतश्चस्कन्द क्षरते ३२ अमोघरेतस्त्व
मेवाह यत्रेति मह्यां यत्र यत्र स्थले महात्मनस्तस्य रुद्रस्य रेतोऽपतत्तानि स्थलानि हे महीपते रौप्यस्य रजतस्य हेम्नः सुवर्णस्य च क्षेत्राण्या
सन्नभवन् ३३ किं च यत्र क्व च सरिदादिषु रेतोऽपतत् तत्र रुद्रः संनिहितो बभूव तत्र तदुपासकाः ऋषय आसन्नभवन् ३४ एवं रेतसि
स्कन्ने सति देवमायया आवितां जडीकृतमात्मानं स रुद्रोऽपश्यत् ततः हे नरश्रेष्ठ कश्मलात् कामात् संन्यवर्तत ३५ अथानन्तरं अपरि
ज्ञेयं परितो ज्ञातुमशक्यं वीर्यं चेष्टितं यस्य तस्य जगदात्मनः परमात्मनो यन्माहात्म्यं तदवगतं ज्ञातं येन सः तथाभूतो रुद्रस्तदुहत

तस्यासौ पदवीं रुद्रो विष्णोरद्भुतकर्मणः प्रत्यपद्यत कामेन वैरिणेव विनिर्जितः ३१ तस्यानुधावतो रेतश्चस्कन्दामोघरेतसः
शुष्मिणो यूथपस्येव वासितामनुधावतः ३२ यत्र यत्रापतन्मह्यां रेतस्तस्य महात्मनः तानि रूप्यस्य हेम्नश्च क्षेत्राण्या
पवनेषु च सन्महीपते ३३ सरित्सरःसु शैलेषु वनेषु च यत्र क्वचासन्नृषयस्तत्र सन्निहितो हरः ३४ स्कन्ने रेतसि सोऽपश्यद
त्मानं देवमायया जडीकृतं नृपश्रेष्ठ संन्यवर्तत कश्मलात् ३५ अथावगतमाहात्म्य आत्मनो जगदात्मनः अपरिज्ञे
यवीर्यस्य न मेने तदु हाद्भुतं ३६ तमविक्लवमव्रीडमालक्ष्य मधुसूदनः उवाच परमप्रीतो बिभ्रत्स्वां पौरुषीं तनुं ३७
भगवानुवाच दिष्ट्या त्वं विबुधश्रेष्ठ स्वां निष्ठामात्मना स्थितः यन्मे स्त्रीरूपया स्वैरं मोहितोऽप्यंग मायया ३८

२२

ष्टियोषिद्रूपं तच्चेष्टितं च महदद्भुतं सर्वं श्रुतपूर्वं मेने ...मन्यत ३६ ततो भगवान् मधुसूदनः स्वां तिरोधापितां पौरुषीं त
नुं बिभ्रत् आविर्भावयन् स्वयमाविर्भवदित्यर्थः अविक्लवं धैर्यमव्रीडं निर्लज्जं च तं रुद्रमालक्ष्य नितरां प्रीतः सन् जगाद ३७
तदुदितमेवाह दिष्ट्येति त्रिभिः हे विबुधश्रेष्ठ त्वं स्वां निष्ठां कामविकाररहितां देवादात्मनावस्थितः लब्धवान् मया
प्राप्यात् स्थितत्वादिति भावः तदुपपादयन्नाह यदिति अंग हे रुद्र यद्यस्मात्त्वं मे मम मायया स्त्रीरूपया स्वैरं यथेच्छं नित
रामित्यर्थः मोहितो मोहं प्रापितोऽसि इत्यर्थः ३८ एवं मोहितस्य तव स्वनिष्ठालाभो दैवात् संपन्न इति भावः ३८ दुस्त
रत्वमेवाह कोन्विति ससससमत

एवं वर्तमानं सप्तममन्वन्तरमुक्तं षडतीतान्युक्तान्यथ भविष्याणि मन्वन्तराणि विवक्षुरुक्तान्यनुवदति संक्षेपत इति एवं सप्तमन्वन्त
राणि संक्षेपतस्तुभ्यं मयोक्तान्यथ भविष्याणि वक्तुं प्रतिजानीते भविष्याणीति अथ विप्रो: शनैर्भिरं शीरवतां रेरिति यावत् अ
न्वितानि भविष्याणि मन्वन्तराण्यष्टमादीनि वक्ष्यामि विप्रो: शनैरन्वितानीत्यनेनैतेषामप्यस्य श्रोतव्यत्वमुच्यते ७ अष्टमस्य म
न्वन्तरं वक्तुं तावत्तदुपोद्घातरूपां कथामाह त्रिभिः विवस्वत इति विश्वकर्मणः प्रजापतेर्दुहितरावुभे संज्ञा छाया नाम विवस्व
तः देवस्य देवराजेन्द्र ये तव नु पुरा प्राकू षष्ठस्कन्धे अभिहिते उक्ते ८ बडवाख्या विवस्वतस्तृतीया भार्या एके आहुर्मनुरेव
मेव मते सैव भूत्वा च बडवा नासत्यौ सुषुवे भुवीति षष्ठस्कन्धे उक्ते: तासां तस्य एषा भार्याणां मध्ये संज्ञायाः सुताः त्रयः सुताश्च सुतौ च
सुताः पुमान्स्त्रीत्येकशेषः एका सुता द्वौ सुतौ इत्यर्थः तदेवाह यमश्च यमी सुतौ नदी च श्राद्धदेवश्चेति त्रयः सुता इत्यर्थः

संक्षेपतो मयोक्तानि सप्तमन्वन्तराणि ते भविष्याण्यथ वक्ष्यामि विप्रो: शनैरन्वितानि च ७ विवस्वतस्तु द्वे जाये विश्वकर्मसुते
उभे संज्ञाच्छाया च राजेन्द्र ये प्रागभिहिते तव ८ तृतीयां बडवामेके तासां संज्ञासुतास्त्रयः यमो यमी श्राद्धदेवः छायायाश्च सु
तान्शृणु ९ सावर्णिस्तपती कन्या भार्या संवरणस्य या शनैश्चरस्तृतीयोऽभूदश्विनौ बडवासुतौ १० अष्टमेऽन्त
रेऽप्राप्ते सावर्णिर्भविता मनुः निर्मोकविरजस्काद्याः सावर्णितनयान्नृप ११ तत्र देवाः सुतपसो विरजा अमृत
प्रभाः तेषां विरोचनसुतो बलिरिन्द्रो भविष्यति १२ दत्वेमां याचमानाय विष्णवे यः पदत्रयं राद्धमिन्द्रपदं हि
त्वा ततः सिद्धिमवाप्स्यति २१

९ सावर्ण्याद्याः सुतान ९ एवत्रापि एकशेषः तदेवाह सावर्णिः सुतस्तपती आख्या कन्या सुता या संवरणस्य भार्या कथि
ता शनैश्चरस्तृतीयः सावर्णि शनैश्चरौ द्वौ पुत्रौ तपत्येका सुता चेत्यर्थः अश्विनौ बडवायाः सुतौ १० अथाष्टममन्वन्त
रमाह अष्टमे इत्यादिना नवमो दक्षसावर्णिरित्यतः प्राक्तनेन अष्टमे मन्वन्तरे प्राप्ते सति सावर्णिर्विवस्वत एव पुत्रो म
नुर्भविष्यति निर्मोकादयः सावर्णे मनोः पुत्राः भवितारः ११ तत्र मन्वन्तरे सुतपा अमृताद्या देवगणाः तेषां देवगणा
नामधिपतिरिन्द्रो विरोचनसुतो बलिर्भविष्यति १२ तं विशिनष्टि दत्वेति द्वाभ्यां यो बलिः पदत्रयं याचमानाय विष्ण
वे वामनायेमां पृथिवीं दत्वा तत्प्रसादात् राद्धं लब्धं इन्द्रपदं हित्वा नु भव पदं हित्वेत्यर्थः ततः सिद्धिं मुक्तिमवा
प्स्यति १३ राम

अथ व्याख्या: कीर्तनादिफलमाह एतन्मुहुरिति मोहिनी मायानादिकं पुनः पुनः कथयतः एवंविधश्च समुद्यमः प्रयत्नः कश्चिदपि दैवोजा
तु कदाचिदपि कालेन रिष्यते न नश्यति न विफलीभवतीत्यर्थः कुतः यद्यस्मादुत्तमश्लोकस्य भगवतो गुणानामनुवर्णनं
समस्तानां संसारश्रमाणां त्रयाणामाध्यात्मिकादितापानामपहं हेतु ४६ भक्तपक्षपातं स्मरन्नमस्करोति असदिति
मथ्यो मथ्यन्ते तत्र जातं मथ्यं सिन्धोर्मथने जातममृतं यः कपटयुवतिवेषः सुरारीन्दैत्यान्मोहयन् प्रपन्नानमरवर्यान्देवानशी
शयत् पाययत्तममृतमसतामजितेन्द्रियाणामविषयो गम्यो ऽङ्घ्रिर्यस्य तं भावेन भक्त्या गम्यमुपसृतानामाश्रितानामनुवर्त्मा
नानां कामानि पूर्णान्पूरयतीति तं नतोऽस्मि कर्त्तरि क्तः नमस्तु तवानस्मीत्यर्थः ४६ इ ह मे ८ रा १२ तदेवेप
वेता१ अथ चाक्षुषमन्वन्तरं सचरित्राजितारं तिरूप्यप्रा प्रसङ्गमादिमन्वंतराण्याह मुनिर्यावदध्यायसमाप्ति मनुरिति अथुनावि
कम१

एतन्मुहुः कीर्तयतोनुशृण्वतो न रिष्यते जातु समुद्यमः क्वचित् यदुत्तमश्लोकगुणानुवर्णनं समस्तसंसारपरिश्रमापहं ४६
असदविषयमंघ्रिं भावगम्यं प्रपन्नानमृतममरवर्यानाशयत्सिंधुमथ्यं कपटयुवतिवेषो मोहयन्यः सुरारींस्तमहमुपसृतानां काम
पूरं नतोस्मि ४७ इ श्री ज्ञा ग म थे द ध्या १२ मु गु व मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः सप्तमोव
ग१४ र्तमानो यस्तदपत्यानि मे शृणु १ इक्ष्वाकुर्नभगश्चैव धृष्टः शर्यातिरेव च नरिष्यन्तोथ नाभागः सप्तमो दिष्ट उच्यते २
करूषश्च पृषध्रश्च दशमो वसुमान्स्मृतः मनोर्वैवस्वतस्यैते दशपुत्राः परंतप ३ आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः अश्विनौ
ऋभवो राजन्निन्द्रस्तेषां पुरंदरः ४ कश्यपोत्रिर्वसिष्ठश्च विश्वामित्रोथ गौतमः जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः सप्तर्षिदेव
५ अत्रापि भगवज्जन्म कश्यपाददितेरभूत् आदित्यानामवरजो विष्णुर्वामनरूपधृक् ६

घमानुः सप्तमो मनुर्विवस्वतः पुत्रः श्राद्धदेव इति प्रसिद्धः तस्य श्राद्धदेवस्यापत्यानि पुत्रान् कथयतो मे मत्तः शृणु १ हे परंतप इक्ष्वाक्वा
दय एते दश वैवस्वतस्य मनोः पुत्राः २ ३ देवानाह आदित्यादयो देवा इत्यन्वयः इन्द्रमाह तेषामधिपतिरिन्द्रः पुरंदरा
ख्यः ४ सप्तर्षीनाह कश्यप इति ५ भगवदवतारमाह अत्रापि सप्तमे मन्वन्तरे कश्यपात्पितुरदितेर्मातुश्च भगवज्ज
न्माभूद्भगवानवतारं स्पष्टः स च विष्णुरुपेन्द्राख्यो वामनरूपं धृतवानिति तथा आदित्यानां विवस्वानर्यमा पूषे
त्यादीनां षष्ठ्यैकधीकानां मध्ये ऽवरे जन्म यस्यादित्यानां कनीयानित्यर्थः ६

दशममन्वंतरवर्त्तकमाह॥ दशम इति॥ उपश्लोकस्य सुतो महान् गुणैः ब्रह्मसावर्णिरिति प्रसिद्धो दशमो मनुर्भविता तस्य ब्रह्मसाव
र्णिमनोः सुता भूरिषेणाद्याः द्विजाः सप्तर्षयस्तु हविष्मत्प्रमुखाः॥२१॥ तानेव कांश्चिन्निर्दिशति हविष्मानिति सुवासनादयो देवगणा भविता
रः सुरेश्वर इन्द्रस्तु शंभोर्नाम्नो भविता २२ अवतारमाह विष्वक्सेनो विभुर्भगवान् विश्वसृजो गृहे तज्जायायां विषूच्यां स्वांशेनावतीर्णः
शंभोरिन्द्रस्य सख्यं करिष्यति २३ एकादशमन्वंतरवर्त्तकमाह मनुरिति आत्मवान् प्रशस्तमनस्को धर्मसावर्णिरिति प्रसिद्धः
एकादशो मनुर्भविष्यति एकादशम इत्यार्षं तस्य धर्मसावर्णेः सुता दश सत्यधर्मादयोऽनागता भवितारः २४ विहंगमाद्या देवगणाः

दशमो ब्रह्मसावर्णिरुपश्लोकसुतो महान् तत्सुता भूरिषेणाद्या हविष्मत्प्रमुखा द्विजाः २१ हविष्मान्सुकृतिः सत्योज
यो मूर्तिस्तदा द्विजाः सुवासनविरुद्धाद्या देवाः शंभुः सुरेश्वरः २२ विष्वक्सेनो विषूच्यां तु शंभोः सख्यं करिष्यति
26 जातः स्वांशेन भगवान् गृहे विश्वसृजो विभुः २३ मनुर्वै धर्मसावर्णिरेकादशम आत्मवान् अनागतास्तत्सु
ताश्च सत्यधर्मादयो दश २४ विहंगमाः कामगमा निर्वाणरुचयः सुराः इन्द्रश्च वैधृतस्तेषामृषयश्चा
रुणादयः २५ आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः वैधृतायां हरेरंशस्त्रिलोकीं धारयिष्यति भविता
देव४ रुद्रसावर्णी राजन्द्वादशमो मनुः देववानुपदेवश्च देवश्रेष्ठादयः सुता २७ ऋतधामा च तत्रेन्द्रो देवाश्च हरिता
दयः ऋषयश्च तपोमूर्तिस्तपस्व्याग्नीध्रकादयः २८ स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः अंतरं स
त्यसहसः सूनृतायाः सुतो विभुः २९ मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् चित्रसेनविचित्राद्या देवसावर्णि
देहजाः ३० देवाः सुकर्मसुत्रामसंज्ञा इन्द्रो दिवस्पतिः निर्मोकतत्त्वदर्शाद्या भविष्यंत्यृषयस्तदा ३१ रामाय

तेषामधिपतिरिन्द्रस्तु वैधृत इति प्रसिद्धो भविता सप्तर्षयस्त्वरुणादयः २५ अवतारमाह आर्यकस्य भार्यायां वैधृतायां जातो व
तीर्णः हरेरंशस्तत्र मन्वंतरे धर्मसेतुरिति प्रसिद्धो भविता स च त्रिलोकीं धारयिष्यति २६ हे राजन् द्वादशो मनू रुद्रसावर्णिरिति प्र
सिद्धो भविता तस्य सुता देववादयः २७ तत्र मन्वंतरे ऋतधामाख्य इन्द्रः हरितादयो देवगणाः सप्तर्षयः सुतपः प्रभृतयः २८
स्वधामाख्यो हरेरंशावतारस्तस्य मनो रुद्रसावर्णेरंतरं साधयिष्यति स च सत्यसहः सूनृतयोः सुतः २९ त्रयोदशो मनुर्देव
सावर्णिरिति प्रसिद्धो भाव्यः भविता देवसावर्णेर्देहजातास्तत्सुताश्चित्रसेनादयः ३० सुकर्मादिसंज्ञका देवगणाः इन्द्र
स्तु दिवस्पतिरिति प्रसिद्धो भविता तथा मन्वंतरे ऋषयः समर्थयो निर्मोकादयो भविष्यंति ३१

योसौ बलिर्भगवता बद्धः पुनः प्रीतेन तेनैव भगवता सुतले स्वर्गादप्यधिके लोके निवेशितोधुनास्वराडिन्द्र इवास्ते १४ अत्र मन्वंतरे भविष्यतः
सप्तर्षीनाह गालव इति रामः परशुरामः द्रोणपुत्रो अश्वत्थामा कृपः कृपाचार्यः १५ इमे गालवादयः स्वयोगतः स्वयोगप्रभावात्
सप्तर्षयो भविष्यंति हे राजन्निदानीं त्वेते गालवादयः स्वकीयाश्रमेषु वर्तंते १६ अवतारं तच्चरित्रं चाह देवगुह्यादिति ईश्वरो भगवा
न्देवगुह्यात्सरस्वत्यामवतीर्णः सार्वभौम इति प्रसिद्धो विभुः समर्थोऽत एव पुरंदरात्स मन्मन्वंतरे इन्द्रात्स्थानमिन्द्रपदं हृत्वाऽपनी
य बलये दास्यति अत्रेदमनुसंधेयम् चाक्षुषाख्ये षष्ठे मन्वंतरे यदा दुर्वाससः शापेन गतश्री रिन्द्रो जित शरणागते सहायामतं
प्राप्य बलिर्विजित्य सश्रीकः स देवगणस्त्रिलोकाधिपत्यं कृतवान् तदा बलिर्भार्गवैराहृत बलः तमिन्द्रमुच्चाल्य त्रिविष्टपमधि
तस्थौ तदा पुनरदित्याराधितो भगवानादित्यां नाम वरजो वामनो भूत्वा पदत्रय याञ्च्या व्याजेन बलेस्त्रिविष्टपं गृहीत्वाऽइन्द्राय पु
त्वा दा

योसौ भगवता बद्धः प्रीतेन सुतले पुनः । निवेशितोधिके स्वर्गादधुनास्ते स्वराडिव १४ गालवो दीप्तिमान् रामो द्रोणपुत्रः कृ
पस्तथा । ऋष्यशृंगः पिता अस्माकं भगवान् बादरायणः १५ इमे सप्तर्षयस्तत्र भविष्यंति स्वयोगतः । इदानीमास
ते राजन्स्वे स्व आश्रममंडले १६ देवगुह्यात्सरस्वत्यां सार्वभौम इति प्रभुः । स्थानं पुरंदराद्धृत्वा बलये दास्यतीश्वरः
(१७ नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः । भूतकेतुर्दीप्तकेतुरित्याद्यास्तत्सुतान्नृप १८ परामरीचिगर्भाद्या दे
वा इंद्रः अद्भुतः स्मृतः । द्युतिमत्प्रमुखास्तत्र भविष्यंत्यृषयस्ततः १९ आयुष्मतोंऽबुधारायामृषभो भगवत्कला । भवि
ता येन संराद्धां त्रिलोकीं भोक्ष्यतेऽद्भुतः २० रामाय

इंद्राय प्रदाय बलिमनुगृह्णन्निदमाह एष मे प्रापितः स्थानं दुष्प्रापममरैरपि सावर्णेरंतरस्यायं भवितेन्द्रो मदाश्रयः तावत्
सुतलमध्यास्ते विश्वकर्मविनिर्मितमिति तदेवमनुगृहीतस्तत्प्रभृति सुतले निवसन्नद्यास्ते अष्टमे मन्वंतरे तदावतरिष्यमा
णेन सार्वभौमाख्येन भगवता पुरंदरादपनीय दत्ते इन्द्रपदे इन्द्रो भविष्यति तेन तदाधिपत्यावसाने सिद्धिमवाप्स्यतीति १७ नवम
मन्वंतरवृत्तमाह नवम इति वरुणसंभवः वरुणस्य पुत्रः दक्षसावर्णिरिति प्रसिद्धो मनुर्नवमो भविता भविष्य
ति तस्य सुता भूतकेत्वादयो भविष्यंति १८ पाराद्या देवगणाः इन्द्रस्तु अद्भुत इति प्रसिद्धो भविता द्युतिमत्प्रभृतयस्सप्तर्षयः भविता
रः १९ एवं मन्वादयः प्रोक्ताः सचरित्रमवतारमाह आयुष्मत इति अंबुधारायां भार्यायामायुष्मतः सकाशाद्भगवानवती
र्णऋषभ इति प्रसिद्धो भविता येन संराद्धां समृद्धां त्रिलोकीं अद्भुताख्य इन्द्रो भोक्ष्यति पालयिष्यति २०

नियोजकाः मन्वादयस्तु १ स्ववशास्मानुरूपं ४ प्र२

भा॰स्कं॰८

४४

एवंभगवद्वचनात्तैः नियोज्याः जगद्यात्रानयने तेषां कर्मसु क्रमप्रकरणं जगद्यात्रां नयंतीत्यपेक्षायां तावदृषीणां कर्माह चतुर्युगांत
इति पूर्वपूर्वमन्वंतरावसाने कालेनाध्येत्रभावयुक्तकालेन ग्रस्तान्विप्लुतान् श्रुतिगणान्ऋषयोवत्पश्यंति श्रुतिगणान्विशिन
ष्टि यतो येभ्यः श्रुतिगणेभ्यः सनातनो धर्मो विबुध्यते इति शेषः ४ मनूनां कर्माह ततइति ततः ऋषिभिर्यथावच्छ्रुतिगणा
व४ दर्शनानंतरं तदवबोधितं सर्वं [illegible] चतुष्पादं धर्मं हरिणा यज्ञादिरूपिणोदिता उक्तानियुक्ताइत्यर्थः संयताः संतो मनवो
ध्यास्याःसावस्वेकाले युगानुरूपं महीमहीमध्ये संचारं यत्नुपदेशेन प्रवर्तयंति ५ मनुपुत्राणां कर्माह पा[illegible]लयंतीति
निरीक्षयतस्ततः प्रजापालाः मनुपुत्रास्तंधर्मं यावदंतं यावन्मन्वंतरावसानं किंविभागशः पुत्रपौत्रादिक्रमेण वर्णाश्रमविभागेन च पा
विप्रकीर्णसमाहृ लयंति देवानां कर्माह यज्ञेति येच तत्र विविधत्वनृतमनुष्या यत्रपंच महायज्ञादौ कर्मण्यन्विताः तैः सह देवा यज्ञभाग
त्यस्मृतिभिः ४५ नृप८

चतुर्युगांते कालेन ग्रस्तान्श्रुतिगणान्यथा तपसा ऋषयोपश्यं यतो धर्मः सनातनः ४ ततो धर्मं चतुष्पादं मनवो ह
रिणोदिताः युक्ताः संचारयंत्यद्धा स्वेस्वे काले महीं नृप ५ पालयंति प्रजापाला यावदंतं विभागशः यज्ञभागभुजो
देवा ये च तत्रान्विताश्च वै ६ इंद्रो भगवता दत्तां त्रैलोक्यश्रियमूर्जितां भुंजानः पाति लोकांस्त्रीन्कामं लो
के प्रवर्षति ७ ज्ञानं चानुयुगं ब्रूते हरिः सिद्धस्वरूपधृक् ऋषिरूपधरः कर्म योगं योगेशरूपधृक् ८
सर्गं प्रजेशरूपेण दस्यून्हन्यात्स्वराड्वपुः कालरूपेण सर्वेषामभावाय पृथग्गुणः ९ स्तूयमानो जनै
रेभिर्मायया नामरूपया विमोहितात्मभिर्नानादर्शनैर्न च दृश्यते १०

भुजः तत्र ओंकारः ६ इंद्रस्य कर्माह इंद्र इति भगवता यज्ञादिरूपिणा दत्तामत एवोर्जितां प्रभूतां त्रैलोक्यश्रियमनुभवंस्त्रीन्
लोकौते हरियज्ञाद्यवताररूपः सिद्धरूपधृक्कपिलादिरूपधृक् ज्ञानं युगानुरूपं ब्रूते उपदिशति ८ प्रजेशरूपेण मरी
च्यादिरूपेण सर्गं करोतीति शेषः स्वराड्वपुः राजमूर्तिः सन् तदनुप्रवेशेनेत्यर्थः दस्यून्दुष्टसत्वान्हन्यात् पृथक् कालरूपे
ण सर्वेषामभावाय प्रलयाय च भवति कथंभूतः सत्वाद्युपपृथग्गुणविशिष्टः ९ नामरूपया नामरूपभाजा
मायया विमोहिता निमतं भास्यिते षां तैर तएव नानादर्शनैस्तैर्नैकाकारे ध्यात्मसु देवमनुष्यादिनानाबुद्धिं कुर्व
द्भिरेभिर्जनैः केवलं स्तूयमानः शास्त्रेण निरूप्यमाण एव न तु दृश्यते इत्यर्थः १० रामरामरामरामराम ४४

नपाति कथं पातीत्यत आह कामं यथेष्टं लोकेभिवर्षति द्रव्या पातीत्यर्थः ७ अथावतारस्य कर्माह ज्ञानमिति चशब्देन मन्वादिनियोजनं समुच्चीय त्रुटिः
२

27

देवहोत्रस्य भार्यायां बृहत्यां हरेरंशः संभविष्यति स च योगेश्वराख्यो देवहोत्रस्य तनयो दिवस्पतेरिन्द्रस्य उपहर्ता इष्टसंपादको भवि
ता ३२ चतुर्दशो मनुस्तु इन्द्रसावर्णिरिति प्रसिद्धः एष्यति भविष्यति तद्वीर्यजाः तत्सुता ऊर्जादयः ३३ देवगणास्तु पवित्रा
दिसंज्ञिताः इन्द्रः शुचिरिति प्रसिद्धः भविष्यति तपस्विनः सप्तर्षयो ग्न्यादयः ३४ हरिर्भगवान् सत्रायणस्य तनयो बृहद्भानुरि
ति प्रसिद्धो भविष्यति हे महाराज स बृहद्भानुर्वितानायां सत्रायणस्य भार्यायां जातः क्रियातंतून् यज्ञकर्मसंतानान् विता
यिता विस्तारयिष्यति ३५ मन्वंतरकथनमुपसंहरति हे राजन् त्रिकालानुगतानि भूतवर्तमानभविष्यत्कालानुगतानि षट्त्वतीतानि
वर्तमानमेकं भविष्याणि सप्तैवं चतुर्दश मन्वंतराणि ते तुभ्यं मया प्रोक्तानि एभिश्चतुर्दशभिर्मन्वंतरैः कल्पः दैनंदिनाल्प

देवहोत्रस्य तनय उपहर्ता दिवस्पतेः योगेश्वरो हरेरंशो बृहत्यां संभविष्यति ३२ मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्य
ति ऊरुगम्भीरबुध्याद्या इन्द्रसावर्णिवीर्यजाः ३३ पवित्राश्चाक्षुषा देवाः शुचिरिन्द्रो भविष्यति अग्निर्बाहुः शु
चिः शुद्धो मागधाद्यास्तपस्विनः ३४ सत्रायणस्य तनयो बृहद्भानुस्तदा हरिः वितानायां महाराज क्रिया
तंतून्वितायिता ३५ राजंश्चतुर्दशैतानि त्रिकालानुगतानि ते प्रोक्तान्येभिर्मितः कल्पो युगसाहस्रपर्ययः ३६
२ श्री प्राव म पु ते म धे तु मा न्वं त र ष ना त्र द १३ रा वा मन्वंतरेषु भगवान् यथा मन्वादय
स्त्विमे यस्मिन्कर्मणि ये येन नियुक्तास्तद्वदस्व मे १ श्रीशुक उवाच मनवो मनुपुत्राश्च मुनयश्च महीपते इन्द्राः सुरग
णाश्चैव सर्वे पुरुषशासनाः २ यज्ञादयो याः कथिताः पौरुष्यस्तनवो नृप मन्वादयो जगद्यात्रां नयन्त्याभिः प्रचोदिताः ३

कः कल्पः स च युगसहस्रपरिमितः युगानां कृतादीनां सहस्रवारं पर्ययः परिवृत्तिर्यस्मिन् स तथाभूतः ३६ २ मे यो श १३
एवं मन्वंतरेषु कथितेषु प्रसंगान्मन्वादीनां कृत्यं पृच्छति राजा मन्वंतरेष्विति हे महीपते भगवान् मन्वंतरेषु इमे उक्ता मन्वादयः
आदिशब्दाद्देवास्तत्पुत्रादयः ये तामी मन्वादयः पंच ते सर्वे पुरुषेणेश्वरेण यथा यथावतारैः शास्यते नियुज्यन्ते इति तथा
२ तदेवाह यज्ञादय इति हे नृप पौरुष्यः परमपुरुषस्य संबंधिन्यस्तनवो अवतारा यज्ञादयः कथिताः ताभिः प्रणोदिता
नियुक्ताः मन्वादयः जगद्यात्रां जगत्पोषणादिक्रियां नयन्ति जगत्पोषणं कुर्वन्तीत्यर्थः ३ रामरामरामरामराम

ततो विश्वजिद्यागेन हविर्भिः सिद्धाद्धुताशनाद्वह्नेः स्वर्णरथमाप्तवान् तत्र तस्य कांचनपरिकरवद्धो रथः आविर्बभूव ततो हयाश्च तस्येन्द्रस्य तुरंगाणां वर्ण
तुल्यहरितवर्णास्तस्मादेवोत्पन्नाः सिंहेन विराजमानो ध्वजः ५ ततः पुरोधोपनद्धकांचनपरिकरवद्धं धनुः रत्निका वत्सायोतूणौ दिव्यौ
कवचं आसन् पितामहः प्रल्हादः तस्य बलेः संप्रदानस्य सर्वं ध...वक्ष्याथावष्ठौ तस्मै अम्लानां पद्मानां यस्यां तां मालां ददौ शुक्रः
शिष्यस्य ...मंगलमाल्ल्यनादर्कं यस्य तादृक्शंखो ... परिक्रम्य तेभ्यः स्वतः प्रणामो येन सः प्रल्हादस्य नमस्कार ७ अथ भृगुभिर्दत्तमनच्छेदि कंसं रथमारूढः सन् बलिः राजे स्वन्वयः कथंभूतः मालाधरः सन्नद्धकवचितश्चापी धीध
११
ततो रथः कांचनपट्टनद्धो हयाश्च हर्यश्वतुरंगवर्णाः ध्वजश्च सिंहेन विराजमानो हुताशनादात्तहविर्भिरिष्टात् ४ धनुश्च दि
चैर
व्यं तूणावक्षय्यौ कवचं च दिव्यं पितामहस्तस्य ददौ च मालामम्लानपद्मां जलजं च शुक्रः ६ एवं स विप्रार्जित
योधनार्थः स्तैः कल्पितस्वस्त्ययनोऽभिविप्रान् प्रदक्षिणीकृत्य कृतप्रणामः प्रल्हादमामन्त्र्य नमश्चकार ७ अथारुह्य
रथं दिव्यं भृगुदत्तं महारथः सुस्रग्धरोऽथ सन्नद्धो धन्वी खड्गी धृतेषुधिः ८ हेमांगदलसद्बाहुः स्फुरन्मकरकुंडलः
रराज रथमारूढो धिष्ण्यस्थ इव हव्यवाट् ९ तुल्यैश्वर्यबलश्रीभिः स्वयूथैर्दैत्ययूथपैः पिबद्भिरिव खं दृग्भिर्दह
द्भिः परिधीनिव १० वृतो विकर्षन्महतीमासुरीं ध्वजिनीं विभुः ययाविन्द्रपुरीं स्वृद्धां कम्पयन्निव रोदसी ११ रम्यामुप
वनोद्यानैः श्रीमद्भिर्नन्दनादिभिः कूजद्विहंगमिथुनैर्गायन्मत्तमधुव्रतैः १२
धुर्दुरः धृतइषुधिर्येन सः ८ हेमांगदाभ्यां लसन्तौ बाहू यस्य स्फुरतौ मकरकुंडले यस्य तथाभूतो रथमारूढो राजत इव धिष्ण्यस्थः
प्रज्वलितः हव्यवाडग्निरिव कुंडस्थ आहवनीयादिरिव ९ दैत्ययूथपैर्वृतः स्वयूथैः स्वमित्रपुरीं ययौ इत्यन्वयः कथंभूतैः
तुल्यैश्वर्यश्रीभिः ... दृग्भिः खं नभः पिबद्भिरिव परिधीन् दिशो दहद्भिरिव स्थितैः १० कथंभूतः सन् वि
भुः समर्थः महतीमासुरीं ध्वजिनीं सेनां विकर्षन् आकर्षयन् रोदसी द्यावापृथिव्यौ कंपयन्निव ११ सः स्वृद्धामिंद्रपुरीं ययौ
पुरीं वर्णयति रम्यामिति सार्द्धैरेकादशाभिः श्रीमद्भिः फलपुष्पादिसमृद्धैर्नन्दनादिभिरुपवनैरुद्यानैश्च रम्यां
तत्रोपवनानि फलप्रधानानि निकटानि वा उद्यानानि पुष्पप्रधानानि दूरस्थानि वा कथंभूतैः कूजंति विहंगमि
थुनानि येषु गायंतो मधुना मत्ता मधुव्रता येषु तैः १२ रामरामरामरामरामराराम रामरामरामरामरामराम

प्रासंगिकं निरूप्य मन्वोऽस्मिन्व्यतीताः स्युः कल्पे स्वायंभुवादय इति मन्वंतरकथनार्थं तया प्रस्तुतं कल्पमेवोपसंहरति एतदिति
कल्पविकल्पस्य कल्पभेदस्यावांतरकल्पस्य दैनंदिनकल्पस्येत्यर्थः एतच्चतुर्दशमन्वंतरात्मकं प्रमाणं परिकीर्तितं कोसौ कल्पविकल्पः
पुराविदः कल्पविकल्पव्याख्यार्थविदः यत्र कल्पविकल्पे मन्वंतराणि चतुर्दश स्युः ११ इत्य मे तु दशः १४ एवं मन्वंतरा
एयावर्णयित्वेमां याचमानाय विश्वमेयः यत्त्रयं वृत्तिसंग्रहेणोक्तं हरेर्वामनस्य चरितं विस्तरेण बुभुत्सुः पृच्छति राजा द्वाभ्यां बले
रिति हरिः स्वयमीश्वरः अवाप्तसमस्तकामो भूत्वा कृपणवत्कस्माद्धेतोः बलेः सकाशात् भूमेः पदत्रयमयाचत लब्ध्वार्थो
पि याञ्चया लब्धपदत्रयोपि कस्माद्धेतोस्तं बलिं ववंध १ एतद्याञ्चावंधनादिकं हरेः कर्म वेदितुमिच्छामो वयमत्रैतच्छ्रु
वणेनोस्माकं परममधिकं कौतूहलं वर्तते एतच्छ्रुत्वा निर्दिशन्नाह पूर्णस्यावाप्तसमस्तकामस्य यज्ञेश्वरस्य भगवतः कर्तरि षष्ठी य

एतत्कल्पविकल्पस्य प्रमाणं परिकीर्तितं यत्र मन्वंतराण्याहुश्चतुर्दश पुराविदः ११ इति म अ म छे च शो यः
रा जा बलेः पदत्रयं भूमेः कस्माद्धरिरयाचत भूतेश्वरः कृपणवल्लब्धार्थोपि बबंध तं १ एतद्वेदितुमिच्छामो
महत्कौतूहलं हि नः यज्ञेश्वरस्य पूर्णस्य बंधनं चाप्यनागसः २ श्रु उ च पराजितश्रीरसुभिश्च हापितो हीन्द्रेण रा
जन्भृगुभिश्च जीवितः सर्वात्मना तानभजद्भृगून्बलिः शिष्यो महात्मार्थनिवेदनेन ३ तं ब्राह्मणा भृगवः प्रीयमा
णा अयाजयन्विश्वजितां त्रिणाकं जिगीषमाणं विधिनाभिषिच्य महाभिषेकेण महानुभावाः ४ रामाय नमः राम

रेश्वरेणानागसो निरपराधिनो बलेः बंधने च कौतूहलं यावचेन्च २ इत्येवं राज्ञा पृष्टः सन्निस्तद्वृत्तमाह मुनिर्नवभिरध्यायैः तत्र
तावद्बलेस्त्रिलोकीमपहृत्य सुखपायांतरमपश्यन् याञ्चां कृतवानिति वक्तुं तावद्बलेर्गुरुसेवाबलेन स्वर्गप्राप्तिक्रममाह पराजित
श्रीरित्यादिना यावदध्यायसमाप्तिः हे राजन् इंद्रेण देवासुरे युद्धे पराजितः गतश्रीः राज्यलक्ष्मीर्यस्य असुभिः प्राणैश्च हापितः त्याजितः
पुनर्भृगुभिः ब्राह्मणैः जीवितः जीवनं प्रापितो भृगूणां शिष्यो बलिर्वैरोचनिः तान्भृगूनेव सर्वात्मना कायेन मनसा च महात्मोदार
मनार्थनिवेदने न धनसमर्पणेन नभजत्सेवां चक्रे इत्यर्थः भृगवस्तु शिष्यभक्ता ३ तं भृगवस्ते त्रिणाकं स्वर्गं जेतुं इच्छंतं बलिं महा
नुभावाः ब्राह्मणा भृगवः प्रीयमाणाः संतः विश्वजिता यागेन याजयामासुः किं कृत्वा महाभिषेकेण बहुब्राह्मणप्रसिद्धेनाभिषिच्य ४

मृदंगादीनां स्वनैः तालादिध्वनिसहितैर्नृत्यैः सवाद्यैरुपदेवानां गंधर्वादीनां गीतैश्च मनोरमां स्वप्रभया जिता प्रभा सा क्षादिद्यक्रीता यथि
या त्रीदेवता यथा ता मन्यैरजित प्रभां इति वा पाठान्तरे जिता यहाः सूर्यादयो यया तां २१ यत्र सामान्येन पुंसकं अधर्मिष्ठाश्च यो न
व्रजंति इतः प्रेत्य न प्राप्नुवंति खलादुरात्मानः शठाः मूर्खाः मानिनो हंकारिणः लुब्धा वंचकाः २२ तामेवं भूतां देवधानीम
८।४ मेवंतीं वहिः समंतात् सैन्यैः सेनायाः पतिः स वलिः एतन्यथा सेनया रुरुधे तेन इन्द्रयोषितां भयमुत्पादयन्नाचार्येणाशुक्रे
णदत्तं महास्वनं शंखं दध्मौ २३ मघवानिन्द्रस्तु वलेः परममधिक उद्योगं ज्ञात्वा सर्वदेवानां गणैः रूपेतो वृहस्पतिमित्य
मुवाच २४ तदेवाह भगवन्निति सार्द्धैस्त्रिभिः हे भगवन् पूर्वं वैरिणो देवासुरयुद्धे पराजितस्य वलेरधुना यं महान् उद्यमः

महेंद्रागारं स्वानकदुंदुभिस्वनैः सतालवीणामुरजर्ष्टिवेणुभिः नृत्यैः सवाद्यैरुपदेवगीतकैर्मनोरमां स्वप्रभया जितप्रभां २१
यन्न व्रजंत्यधर्मिष्ठाः खलाभूतद्रुहः शठाः मानिनः कामिनो लुब्धा एभिर्हीना व्रजंति यत् २२ तां देवधानीं स वरूथि
२१ नीपतिर्वहिः समंतादुरुधे पृतन्यया आचार्यदत्तं जलजं महास्वनं दध्मौ प्रयुंजन् भयमिन्द्रयोषितां २३ मघवांस्तदभि
प्रेत्य वलेः परममुद्यमं सर्वदेवगणोपेतो गुरुमेतदुवाच ह २४ ह उ च भगवन्नुद्यमो भूयान् वलेर्नः पूर्ववैरिणः
अविषह्यमिमं मन्ये केनासीत्तेजसोर्जितः २५ नैनं कश्चित्कुतो वापि प्रतिव्योढुमधीश्वरः पिबन्निव मुखेन
नेदं लिहन्निव दिशो दशा दहन्निव नभोदृग्भिः संवर्ताग्निरिवोत्थितः २६ ब्रूहि कारणमेतस्य दुर्धर्षत्वस्य मद्रिपोः
ओजःसहोवलं तेजो यत एतत्समुद्यमः २७ गुरुरुवाच जानामि मघवंच्छत्रोरुन्नतेरस्य कारणं शिष्यायोपभृतं तेजो भृगुभिर्ब्रह्मवादिभिः

इस्य उद्यमं सो हं मन्ये केन हेतुनायं तेजसोर्जित आसीत् २५ एनं वलिं को पि पुमान् केनाप्युपायेनापाकर्तुं न प्रभुः अयं मुखे
नेदं जगत् पिवन्निव दशापि दिशो लिहन्निव उत्थितः प्रलयाग्निरिव दृग्भिर्नभो दहन्निवास्ते २६ मम शत्रोर्वलेः उद्धर्षत्वस्ये
तस्य कारणं ब्रूहि यतः [illegible] कारणादोज आदिसत्समुद्यमः सद्यमश्चैतदासीत् तत्रौजः इंद्रिय
वलं सहउत्साहो मानसं वलं देहिकं २७ एवं विज्ञापितआह गुरुः जानामीति हे मघवन्नस्य त्वच्छत्रोर्वलेरैन्न
त्यकारणमहं जानामि किं तत् यद् भृगवादिभिः शुक्रादिभिः शिष्याय वलये उपभृतमाहितं तेजः इति तु तृ २८
रामराम रामरा रामरा रामरारा मरा रामरा राम रामरा रा रामराम रामरारा रामरा रामराम भरा म राम राम रामरा रा रामं

प्रवालादीनां फलभारेणाप्लुताः शाखा येषां ते मरद्रुमा येषु यत्र यासु सुरसेविताः प्रमदाः क्रीडंति ताः हंसादिकुलैराकुलाः व्याप्ता नलिन्यः सं
रांसि पत्रैषु तेरूपवनो द्यानै रम्यामिति पूर्वेणान्वयः १३ किंच परिखाभूतया देवादेवस्य त्रिविक्रमस्य पादांगुष्ठजया आकाशगंगया वृतां
४ पेषांताद्दशानि प्राकारेण च मध्यामित्यन्वयः कथंभूते नाग्निरिव वर्णो यस्य तेन सुवर्णमयेनेति भावः अट्टालाः प्राकारोपरिरचितालियुद्धस्थानानि
तत्सहितेन उन्नतेन चेति १४ रूक्मपट्टानि कपाटानि येषु तैः खांतरद्वारैः स्फटिकमयैर्गोपुरैः पुरद्वारैश्च जुष्टा विभक्ताः प्रथगुपारा
जेमार्गा यस्यां विश्वकर्मणा विनिर्मितां १५ सभादिभिरालंकृतां सुरभ्रांसंपन्नां वा तत्रसभा आवेशस्थानानि चत्वराण्यं गणानि
रथ्या उपमार्गाः न्यर्बुदं दशकोटयः तामिर्वीणनीयैरनंतैर्विमानैर्वृतां वज्रविद्रुममया वेदयो वेदिका येषु तैः शृंगाटकैः

प्रवालफलप्रब्धोरूभारशाखामरद्रुमैः हंससारसचक्राह्वकारंडवकुलाकुलाः नलिन्यो यत्र क्रीडंति प्रमदाः सुरसे
विताः १३ आकाशगंगया देव्यावृतां परिखिभूतया प्राकारेणाग्निवर्णेन साट्टालेनोन्नतेन च १४ रूक्मपट्ट
कपाटैश्च द्वारैः स्फटिकगोपुरैः जुष्टां विभक्तप्रपथां विश्वकर्म विनिर्मितां १५ सभाचत्वररथ्याढ्यां विमानैर्न्यर्बुदै
र्वृतां शृंगाटकैर्मणिमयैर्वज्रविद्रुमवेदिभिः १६ यत्र नित्यवयोरूपाः श्यामा विरजवाससः भ्राजंते रूपवन्नार्च्य
र्चिभिरिव वन्हयः १७ सुरस्त्रीकेशविभ्रष्टनवसौगंधिकस्रजो यत्रामोदमुपादाय मार्ग आवाति मारुतः १८
हेमजालाक्षनिर्गच्छद्धूमेनागरूगंधिना पांडुरेण प्रतिच्छन्नमार्गे यांति सुरस्त्रियः १९ मुक्तावितानैर्म
णिहेमकेतुभिर्नानापताकावलभीभिरावृतां शिखंडिपारावतभृंगनादितां वैमानिकस्त्रीकलगीतमंगलां २०
मणिमये १ चतुष्पथैर्युतां १६ नित्यं वयस्तारुण्यं रूपं सौकुमार्यं च यासां ताभायौवनमध्यस्थाश्च रूपवत्यः विरजं निर्मलं वासो यासां ताः स्त्रियः
अर्चिभिः शिखाभिर्वह्नय इव यत्र यस्यां राजंते तां इत्यर्थः १७ यत्र यस्यां सुरस्त्रीणां केशेभ्यो विभ्रष्टानां नवसौगंधिकस्रजामामो
दमुपादाय मारुतो हेमगवाक्षेभ्यो विनिर्गच्छता धूमेनागरुसुगंधिना मार्गे आवाति तां १८ यस्यां मार्गे पांडुरेण धूमेन वा
प्रतिच्छन्ने मार्गे सुरस्त्रियो प्रसरसः यांति संचरंतितां १९ मुक्तामयैर्वितानैर्मणिहेममयैः केतुभिश्च नानाविधानां
पताकानां मावलिभिश्च विराजितां शिखंड्यादिभिर्नादितां वैमानिकस्त्रीणां मधुगीतैर्मंडिताम् २० रामायनमः रामरा
रामरामरामरामरारामरारामरारामरारामरारामरारामरारामरारामरारामरारामरामरामरा मराम रामरारामरा रामरामरामरारामराम

वैलभीभि १

अक्षाविधेनागुरुगंधिनागुरुधूमेनपांडु
रेणापांडुरवर्णेन ४

एवं परितपंतामदित्यां कदाचिद्भगवान्कश्यपश्चिरात्समाधेर्विरतः तस्या अदितेराश्रममाजगाम कथंभूतं निर्गत उत्सवो यस्मा
न्निर्गत आनंदो यस्मात्तं २ स कश्यपः कृत आसनपरिग्रहो येन स यथान्यायं सभाजितः सम्यक्पूजितः हे कुरूद्वह दीनं वदनं
यस्यास्तां पत्नीं इदं वक्ष्यमाणमाह ३ दीनवदनमालक्ष्य बहुधा विकल्पयंस्तां कश्यपेन पृच्छन्नाह अपीति सार्धैः पंचभिः अ
पीति प्रश्नद्योतकमव्ययं हे भद्रे ऽधुना लोके विप्राणां गवां धर्मस्य लोकस्य जनस्य कथंभूतस्य मृत्योः छंदसिच्छामनुव
र्तत इति तथा तस्य चाभद्रमकुशलं नहि ४ हे गृहमेधिन्यपि वा किं गृहेषु धर्मादेः किंचिदकुशलमिति काका प्रश्नः गृह
न्विघ्नं नहि यत्र येषु गृहेषु अयोगिनामपि योगः स्वधर्मादिना योगफलं भवति यद्वा ऽयोगिनामेव योगः आसक्तिर्येषां किंना

एकदा कश्यपस्तस्या आश्रमं भगवानगात् निरुत्सवं निरानंदं समाधेर्विरतश्चिरात् २ स पत्नीं दीनवदनां कृता
सनपरिग्रहः सभाजितो यथान्यायमिदमाह कुरूद्वह ३ कश्यप उवाच अप्यभद्रं न विप्राणां लोके भद्रेऽधुना गतं न
धर्मस्य न लोकस्य मृत्योश्छंदानुवर्तिनः ४ अपि वाकुशलं किंचिद्गृहेषु गृहमेधिनि धर्मस्यार्थस्य कामस्य यत्र योगो ह्ययोगि
30 नां ५ अपि वातिथयोऽभ्येत्य कुटुंबासक्तया त्वया गृहादपूजिता याताः प्रत्युत्थानेन वा क्वचित् ६ गृहेषु येष्वतिथयो नार्चि
ताः सलिलैरपि यदि निर्यांति ते नूनं फेरुराजगृहोपमाः ७ अप्यग्नयस्तु वेलायां न हुता हविषा सति त्वयोद्विग्नधिया भ
द्रे प्रोषिते मयि कर्हिचित् ८ यत्पूजया कामदुघान्याति लोकान्गृहान्वितः ब्राह्मणोऽग्निश्च वै विष्णोः सर्वदेवात्मनो मुखं ९

तुरित्यर्थः ५ अतिथय आगत्य कुटुंबासक्तया प्रत्युत्थानादिना कदाचिदपूजिताः संतो गृहात् याताः गताः ६ किंवा यद्यतिथयो
ऽभ्येत्य येषु गृहेषु सलिलैरप्यनर्चिताः संतो निर्गच्छंति तर्हि ते गृहा नूनं शृगालनाथबिलतुल्या एव ७ हे सति भद्रे मयि प्रोषिते
प्रस्थिते सत्युद्विग्नधिया त्वया अग्नयः आहवनीयाद्यग्नयस्त्वदधीनाः हविषा वेलायामुदिते सूर्ये प्रातर्जुहोतीत्युक्तप्रात
रादिकालेन हुताः ८ किं वाग्नीन्विप्रान्नर्चि यत्पूजयेति कामानिष्टार्थान् दोग्धीति तथा तान् तथाविधानग्नीनां पूजया
गृहान्वितः गृहस्थः पुमान् पुण्यलोकान्याति प्राप्नोति किंच ब्राह्मणोऽग्निश्च सर्वदेवताशरीरकस्य विष्णोः मुखं वै निश्च
ये ब्राह्मणोऽस्य मुखमासीत् मुखादिंद्रश्चाग्निश्चेत्यादि श्रुतेरिति भावः ९ रारामरा म रामा मरा भ ४७ ४७ रामः

अतो भगवंतं विनान्यः कश्चिद्भवद्विधः साक्षाद्भगवान् वा ऽस्य संमुखे क्षणमपि स्थातुं न शक्नोति २९ मंत्रमाह तस्माज्जेतुमशक्यत्वात्सर्वे
यूयं त्रिविष्टपं स्वंनिलयमदर्शनं यात गच्छत कथंभूताः यतः येन कालेन शत्रोः पराजयो नोन्नत्यं वा भविष्यति तं कालं प्रतीक्षमाणाः
संतः ३० कोसौ कालस्तत्राह अयमधुना विप्राणां बलेनोदर्कं उत्तरोत्तरमधिकं फलं यस्य ऊर्जितः बलीभूतः विक्रमो यस्य तादृशः प्राप्ते
सपुनस्तेषां विप्राणां एवापमानेन हेतुना सानुबंधः ससमृद्धिर्विनंक्ष्यति तं कालं प्रतीक्षंत इत्यर्थः ३१ एवमित्थमर्थानुदर्शिनात
त्कालोचितकर्त्तव्यप्रयोजनाभिज्ञेन बृहस्पतिना सम्यगालोचिताः गीर्वाणाः सुरास्त्रिविष्टपं त्यक्त्वा कामरूपिणः संतः जग्मुः
३२ एवं देवेष्वंतर्हितेषु सत्स्वथ वैरोचनो ब लिर्देवधानीं पुरीमधिष्ठाय लोकत्रयं स्ववशमकरोत् ३३ ततस्तं विश्व

भवद्विधो भवान् वापि वर्जयित्वेश्वरं हरिं नास्य शक्तः पुरः स्थातुं कृतांतस्य यथा जनः २९ तस्मान्निलयमुत्सृज्य यूयं सर्वे त्रि
विष्टपं यात कालं प्रतीक्षंतो यतः शत्रोर्विपर्ययः ३० एष विप्रबलोदर्कः संप्रत्यूर्जितविक्रमः एषामेवापमानेन सानुबंधो वि
नंक्ष्यति ३१ श्रु उ च एवं सुमंत्रितार्थास्ते गुरुणार्थानुदर्शिना हित्वा त्रिविष्टपं जग्मुर्गीर्वाणाः कामरूपिणः ३२
देवेष्वथ विलीनेषु बलिर्वैरोचनः पुरीं देवधानीमधिष्ठाय वशं निन्ये जगत्त्रयं ३३ तं विश्वजयिनं शिष्यं भृगवः
शिष्यवत्सलाः शतेन हयमेधानामनुव्रतमयाजयन् ३४ ततस्तदनुभावेन भुवनत्रयविश्रुतां कीर्तिं दिक्षु
वितन्वानः सरेज उडुराडिव ३५ बुभुजे च श्रियं स्वृद्धां द्विजदेवोपलंभितां कृतकृत्यमिवात्मानं मन्यमानो
महामनाः ३६ इ श्री भा अ म घे च शो पः १५ श्रु उ च एवं पुत्रेषु नष्टेषु देवमातादितिस्तदा हृते
त्रिविष्टपे दैत्यैः पर्य्यतप्यदनाथवत् १

जयिनं शिष्यमनुव्रतं बलिं तद्वत्सला भृगवो ऽश्वमेधानां शतेनायाजयन् प्राप्तं इन्द्रपदं स्थिरीकर्त्तुमयाजयन्नित्यर्थः ३४ ततो ऽश्वमेधया
गशतप्रभावेन लोकत्रयख्यातां कीर्तिं वितन्वानः सबलिश्चंद्र इव रराज ३५ द्विजदेवैर्ब्राह्मणै रुपलंभितां प्रापितां सुसमृद्धां श्रियं संपदं
बुभुजे कथंभूतः महामना दीर्घसंकल्पः आत्मानं कृतं कृत्यं प्रयोजनं येन तं कृतार्थमिव मन्यमानः ३६ इ ष पे पाः २५ एवं
बलेरिन्द्राधिपत्यमभिधायाथ भगवतो वामनावतारं प्रस्तोष्यन् तदुपोद्घातरूपां कथां तावत् प्रस्तौति मुनिः एवमिति
इत्थं पुत्रेष्विन्द्रादिषु नष्टेषु अदर्शनं गतेषु सत्सु दैत्यैस्त्रिविष्टपे हृते च सति देवमाता ऽदितिरनाथवद्दीना इव पर्य्यतप्यत् १ रामः

सा त्वत्पत्नीत्वेनासंभाविता दुःखाहमधुनापरैर्दैत्यैर्विवासिता स्वस्थाना दुच्चाटिता पुत्रैः सुखाभेदाभिप्रायेणाहं विवासितेत्युक्तं दुःखसागरेम
ग्नाऽभवमधुना प्रबलैर्दैत्यैर्मेमैश्वर्यादीन्यपहृतानि तत्रैश्वर्यमाधिपत्यं श्रीर्भोगादिसंपत्स्थानं निवासदेशः १६ एतानि मत्सुताः
पुनर्यथा पूर्ववत्प्रपद्येरन्नाप्नुयुर्येनोपायेन प्रपद्येरन्त्वा तथा हे साधो कल्याणं कल्याणधिया शुभालोचनया विधेहि १७ एवमि
त्यमदित्या प्रार्थितः कः प्रजापतिः कश्यपः स्मयन्निव तामदितिमाह १८ तदेवाह प्रथमं तावत्सुतस्नेहं लाघयितुं विस्मयव्याजेन तत्त्वमुपदिशति
सार्द्धेन अहो विष्णोर्माया बलेति यदिदं जगत्स्नेहबद्धं पुत्रादिषु स्नेहपाशेन बद्धमित्येतत् भौतिकः भूतपंचकपरिणामरूपो देहः क्व प्रकृतेः
परो भिन्नः आत्मा क्व परस्परमेवमत्यन्तविलक्षणयोर्देहात्मनोरभेदोऽत्यन्तमसंभावित इत्यर्थः एवमसंभाविताभेदयोर्देहात्मनो
र्मध्ये कस्येमे पुत्राद्याः कस्य संबंधिनः किं देहस्य किं वा आत्मनः अयं भावः तावन्नात्मनः साक्षात्पुत्रादिसंबंधः अपितु देहद्वारा देह
स्य भौतिकत्वेनोपचयादिविकारित्वेन चानित्यत्वात्तत्संबंधिषु पुत्रादिषु स्नेहोऽज्ञानमूलक इति तदेवाह मोह एव देहात्मन

पैर्विवासिताहं मग्नास्मि दुःखसागरे ऐश्वर्यं श्रीर्यशः स्थानं तानि प्रबलैर्मम १६ यथा तानि पुनः साधो प्रपद्येरन्ममात्मजाः
द्वाचात्माग्र२ तथा विधेहि कल्याणं धिया कल्याणकृत्तम १७ श्रु उ च एवमभ्यर्थितोऽदित्या कस्तामाह स्मयन्निव १८ कश्यप उ॰ अहो मा
याबलं विष्णोः स्नेहबद्धमिदं जगत् क्व देहो भौतिकोऽनात्मा क्व चात्मा प्रकृतेः परः कस्य के पतिपुत्राद्या मोह एव हि कारणं १९ उपतिष्ठ
31 स्व पुरुषं भगवन्तं जनार्दनं सर्वभूतगुहावासं वासुदेवं जगद्गुरुम् २०

म एवात्र स्नेहे कारणमित्यर्थः १९ एवं तत्त्वोपदेशेनापरितुष्यन्तीं प्रत्याह उपतिष्ठस्वेति द्वाभ्यां वासुदेवमाराधय वासुदेवाराधन
स्य समीहितसाधनत्वं सूचयंस्तं विशिनष्टि सर्वेषां भूतानां गुहासु हृदयकमलेषु वासो यस्य तमनेन वासुदेवशब्दस्य प्रवृत्तिनिमि
त्तं दर्शितं ननु किं विशेषेण वासुदेवमेवोपतिष्ठस्वेति वदसि ... तो विशिनष्टि जनार्दनं अर्द गतौ याचने चेति धातुः जनैः
श्रेयस्कामैरर्द्यते याच्यते इति तं स एव याचनीय इति भावः तत्र हेतुं वदन्विशिनष्टि भगवन्तं षाड्गुण्यपूर्णं देवतान्तरस्य दरिद्र
त्वादिति भावः वदान्यत्वमाह पुरुषं पुरुषं अधिकं सनोति ददातीति पुरुषः षणु दाने इति धातोरन्येभ्योऽपि दृश्यत इति ड
प्रत्ययः आत्मदा बलदाय एको बहूनां विदधाति कामानित्यादिषु पर्यन्तसत्त्वेन प्रसिद्ध इति भावः २० रामरामरामरामरारामे
[redacted]

इति
हितोपदेशे नापीष्टसाधवात्वाद्वि ... पस्का
मेः स एवाराधनीय इत्याह जगद्गुरुमिति यो

हे मनस्विनि ते पुत्राः सर्वे कुशला अपि कुशला एव हि किमालक्ष्यैवं पृच्छसीत्यत्राह भवत्याऽऽत्मानं मनागस्वस्थमप्रकृतिस्थं वदनदैन्याभिश्चि
न्हैरहं लक्षये तव चित्तमस्वस्थं लक्षयित्वाहं पृच्छामीति भावः १० एवं पृष्टाऽदितिरस्वास्थ्य कारणमन्यदिति वक्तुं तस्य गृहमभद्रादिकं न
स्तीत्याह भद्रमिति द्वाभ्यां हे ब्रह्मन् द्विजादीनां भद्रमेव तथा हे गृहमेधिन् त्रिवर्गस्य धर्मार्थकामस्य परं क्षेत्रं मुख्यवस्थानं तच्च हे गृह
आश्रमस्थाग्न्यादयः प्रजाः सर्वे ह्येते सर्वे हे ब्रह्मन् भगवतस्तवानुध्यानान्मया क्रियमाणाद्धेतो न रिष्यति न नश्यति न हीयत इत्यर्थः
११ १२ अनुध्यानान्न रिष्यतीत्येतदेव काक्वा दर्शयति कोन्विति हे भगवन्मे मनसो मनोविषयः मनसा कांक्षितः कामः को नु न संपद्य
ते सर्वोपि कामः संपत्स्यत एवेत्यर्थः कुतः यतो भवान्प्रजाध्यक्षः प्रजानां पतिः सन् यस्या मे त्वद्धर्मपत्न्या एवं धर्मान्प्रभाषते उपदिश

अपि सर्वे कुशलिनस्तव पुत्रा मनस्विनि लक्षयेऽस्वस्थमात्मानं भवत्या लक्षणैरहं १० अ ति वा भद्रं द्विजगवां ब्रह्मन्
धर्मस्यास्य जनस्य च त्रिवर्गस्य परं क्षेत्रं गृहमेधिन् गृहा इमे ११ अग्नयोऽतिथयो भृत्या भिक्षवो ये च लिप्सवः सर्वं
भगवतो ब्रह्मन्ननुध्यानान्न रिष्यति १२ को नु मे भगवन् कामो न संपद्येत मानसः यस्या भवान्प्रजाध्यक्ष एवं धर्मान्
प्रभाषते १३ तवैव मारीच मनःशरीरजाः प्रजा इमाः सत्वरजस्तमोजुषः समो भवांस्तास्वसुरादिषु प्रभो तथापि
भक्तं भजते महेश्वरः १४ तस्मादीश भजन्त्या मे श्रेयश्चिंतय सुव्रत हृतश्रियो हृतस्थानान् सपत्नैः पाहि नः प्रभो १५

ति उपदेशेनैवंविधान् धर्मान् त्वय्यनुष्ठापयति सति को नु कामो दुर्लभ इति भावः १३ तर्हि किं तव चिंतास्वास्थ्यनिमित्तमि
त्यपेक्षायां तद्विज्ञापयितुं तदर्थेनाघाकुर्य्यादित्याशंकया तावत्तं प्रसादयति तवेति हे मारीच सत्वादिप्रधाना इमाः सर्वाः
प्रजाः देवा दैत्याश्च तवैव मनसः शरीराच्च जाताः अतो भवांस्तासु सुरासुरादिषु प्रजासु यद्यपि समः समदर्शनस्तथा
पि हे प्रभो महेश्वरो भगवान् भक्तं भजते नु वर्त्तते भक्तपक्षपाती भवानित्यर्थः प्रभोरिति पाठे प्रभोस्तव महेश्वरो भग
वान् भजत इत्यर्थः १४ तस्माद्भक्तानुभजनस्वभावत्वात्त्वं त्वां भजन्त्या मे मम श्रेयः श्रेयउपायं चिंतय आलोच
य हे सुव्रत कस्तवाधुना श्रेयो विपर्ययस्तत्राह सपत्नैर्दैत्यैर्हृता श्रीर्येषां हृतानि स्थानानि येषां तानस्मा
न्मत्पुत्रान्पाहि पालयेत्यर्थः यतः हे प्रभो पालनसमर्थस्त्वं इत्यर्थः १५

भा॰अ॰टी॰ ५६ कयादेहमालिप्यस्रोतसिनद्यामिमंमंत्रंवक्ष्यमाणंजपन्स्नायात् कुधिरयेदितितदालेपनसमयेस्तन्मंत्रमुदीरयेदित्यर्थः २६ मंत्रमाह।
त्वंइतिउद्धृतासिवराहेणक्षेत्रेनरसावपातुनेतिमंत्रार्थमनुवादकोऽयंमंत्रः हेदेविहेभूदेवितस्थानंनिवयथास्थानेइच्छतावराहेणभगवतात्वंरसाया
स्सातलादुद्धृतासितुभ्यंनमः ममपापंप्रणाशयेतीमंमंत्रमुदीरयन्मृदालिप्यस्नायात् २७ ततोनिर्वर्तितः सम्यगनुष्ठितः आत्मनियमः
संध्योपासनादिर्येनतादृशः समाहितचित्तोहरिमर्चयेत् कुत्रार्चयेदित्यत्राह स्थंडिलादिषु पंचस्वर्चयेत् तत्रस्थंडिलेरंगवल्यादिभिरलंकृ
ताभूमिर्जलंविशुद्धकुंभसंभृतं २८ तत्रावाहनेनवमंत्रमाह नमइति मंत्रार्थविवेकः अत्रप्रधानोमंत्रोवासुदेवद्वादशाक्षरः
वासुदेवंजगद्गुरुं उपतिष्ठस्वेत्युक्तत्वात् गंधमाल्यादिभिश्चार्चेद्द्वादशाक्षरविद्यया जुहुयान्मूलविद्ययाजपेदष्टोत्तरशतमि
गविषयणाभावादिति मृत्युपर्यंतमेव वैरानुबंधः एतावान् अतः मद्वेषो नास्तीति भावः १३

भा·स्क·टी·
५९

तदा वामनाय पृथिवीं दातुमुद्युक्तमसुरेश्वरं शिष्यं बलिं विष्णोः कर्तुमिष्टं जानन् शुक्रः कालत्रयविदां श्रेष्ठः उवाच २९ तदेवाह यावद
ध्यायसमाप्तेः एष इति हे वैरोचने एष वामनः साक्षाद्भगवान् अव्ययो विष्णुरेव देवानां कार्य्यसाधकः कार्य्यं साधयितुमित्यर्थः कश्य
पात्प्रजापतेरदितेरवतीर्णः पदत्रयमात्रेण लोकत्रयं प्रतिगृह्य देवेभ्यो दातुमवतीर्ण इति भावः ३० एवंविधाय तस्मै त्वानर्थमजान
ता त्वया यत्प्रतिश्रुतं तत्साधु न मन्ये कुतः यतो ऽनयो ऽन्याय्य उपस्थितः ३१ अनयमेवाह एष इति मायामाणवकस्त्वाम
संकल्पोपात्तमाणवकसन्निवेशो हरिर्वा मनो वस्थानादिकं विपुलं यथा श्रावयनी ये न्द्राय दास्यति ३२ ननु मया पदत्रयमेव प्र
तिश्रुतं नाधिकं तत्राह त्रिभिरिति विश्वकायो विश्वरूपो भूत्वेत्यर्थः त्रिभिः पादविन्यासैरिमांस्त्रीन् लोकान्क्रमिष्यते परिच्छिद्य ग्रहीष्य

विष्णवे क्ष्मां प्रदास्यन्तमुशना असुरेश्वरं जानंश्चिकीर्षितं विष्णोः शिष्यं प्राह विदांवरः २९ शु उ च एष वैरो
चने साक्षाद्भगवान् विष्णुरव्ययः कश्यपाददितेर्जातो देवानां कार्यसाधकः ३० प्रतिश्रुतं त्वयैतस्मै यदनर्थमजा
नता न साधु मन्ये दैत्यानां महानुपगतो ऽनयः ३१ एष ते स्थानमैश्वर्यं श्रियं तेजो यशः श्रुतं दास्यत्याच्छिद्य श
42 क्राय मायामाणवको हरिः ३२ त्रिभिः क्रमैरिमान् लोकान् विश्वकायः क्रमिष्यति सर्वस्वं विष्णवे दत्वा मूढ व
र्तिष्यसे कथं ३३ क्रमतो गां पदैकेन द्वितीयेन दिवं विभो खं च कायेन महता तार्त्तीयस्य कुतो गतिः ३४ निष्ठां
ते नरके मन्ये ह्यप्रदातुः प्रतिश्रुतं प्रतिश्रुतस्य यो ऽनीशः प्रतिपादयितुं भवान् ३५ न तद्दानं प्रशंसन्ति
येन वृत्तिर्विपद्यते दानं यज्ञस्तपः कर्म लोके वृत्तिमतो यतः ३६ धर्माय यशसे ऽर्थाय कामाय स्वजनाय
च पंचधा विभजन्वित्तमिहामुत्र च मोदते ३७

तीत्यर्थः ३३ क्रमत इति तथापि प्रतिश्रुतं संपादनीयमेवेत्यत आह क्रमत इति द्वाभ्यां एकेन पदार्द्धन्यासेन भूमिं द्वितीयेन दिवं हे विभो
महता कायेन खमन्तरिक्षं च क्रमतः क्रममाणस्य भगवतस्तृतीयपादविन्यासस्य का गतिः तृतीयपादस्यास्य दानाभावात्त
थापि प्रतिश्रुतमसंपादितमेव स्यादित्यर्थः ३४ अत एव प्रतिश्रुतमदातुस्तव नरके निष्ठामवस्थितिं मन्ये कुतः यो भवान् प्रति
श्रुतस्य प्रतिपूरयितुमसमर्थः ३५ तथापि सर्वस्वदानात्कीर्त्तिस्तावद्भविष्यतीत्यत आह नेति येन दानेन वृत्तिर्जीविका विपद्य
ते विलुप्ता भवति तद्दानं न प्रशंसन्त्यार्याः कुतः यतो लोके वृत्तिमतः जीविकावत एव पुंसः सर्वे धीन्येव दानादीनि धर्म्मादिरेतवः
३६ तत्र स्वजनाय स्वजनपुष्ट्ये जीविकाविपत्तिकरदानाद्विभिधर्म्मादयः प्रस्तुतकिंशपतीत्यर्थः अतो विभागं च धर्म्मादिपंचकार्यः तथा विभजन्नेव
हामुत्र लोके मोदते ३७

मामुपव्रज्य याचित्वा पुमान्कश्चिद्भूयोन्यं याचितुं नार्हति तस्माद्धे वटो कामं यथेच्छं वृत्तिकरीं विपुलां भूमिं मे मत्तः प्रतीच्छ प्रतिगृहाण २०
पुनर्याचिताधिकनिःस्पृहत्वमेवाविःकुर्वन्नाह वामनः यावंत इति सप्तभिः हे नृप त्रिलोक्यां यावंतो विषया देशास्ते सर्वेपि प्रति
गृह्यमाणाः संतोऽजितेन्द्रियं पूरयितुमलं बुद्धिमतः कर्तुं न शक्नुवंति २१ यदुक्तं द्वीपदाशुभमविद्वानित्यत्राह त्रिभिः क्रमैः पादै
रसंतुष्टः पुमान्नवखंडयुक्तेन जंबूद्वीपेनापि न पूर्यते अपूर्त्तौ हेतुमाह सप्तानां द्वीपवराणां इच्छया हेतुनानपूर्यते २२ अहं सप्तद्वीपाम
पि दास्ये प्रतीच्छेत्यत्राह सप्तेति वैन्यः पृथुः गयश्चादिर्येषां ते नृपाः सप्तानां द्वीपानामधिपतयोप्यर्थैः कामैश्च तृष्णा
या अंतं न गताः अर्थकामतृष्णाया अवधिं न प्राप्ताः इति नोस्माभिः श्रुतं उत्तरोत्तरमसंतुष्टस्यार्थकामतृष्णायाः प्रवृत्तेरि

न पुमान्मामुपव्रज्य भूयो याचितुमर्हति तस्माद्वृत्तिकरीं भूमिं वटो कामं प्रतीच्छ मे २० स वा वा यावंतो विषयाः प्रेष्ठास्त्रि
लोक्यामजितेन्द्रियं न शक्नुवंति ते सर्वे प्रतिपूरयितुं नृप २१ त्रिभिः क्रमैरसंतुष्टो द्वीपेनापि न पूर्यते नववर्षसमे
तेन सप्तद्वीपवरेच्छया २२ सप्तद्वीपाधिपतयो नृपा वैन्यगयादयः अर्थैः कामैर्गता नांतं तृष्णाया इति नः श्रुतं
२३ यदृच्छयोपपन्नेन संतुष्टो वर्त्तते सुखम् नासंतुष्टस्त्रिभिर्लोकैरजितात्मोपसादितैः २४ पुंसोयं संसृ
न५ तेर्हेतुरसंतोषोर्थकामयोः यदृच्छयोपपन्नेन संतोषो मुक्तये स्मृतः २५ यदृच्छालाभतुष्टस्य तेजो विप्रस्य वर्द्ध
ते तत्प्रशाम्यत्यसंतोषादंभसेवाशुशुक्षणिः तस्मात्त्रीणि पदान्येव वृणे त्वद्वरदर्षभात् एतावतैव सिद्धोहं
वित्तं यावत्प्रयोजनं २७ श्री शु उ इत्युक्तः प्रहसन्नाह वांछितं प्रतिगृह्यतां वामनाय महीं दातुं जग्राह जलभाजनं २८

रिति भावः २३ एतैरसंतुष्टस्य सुखं च नास्तीति वदन्तावत्संतुष्टस्य सुखमाह यदृच्छयेति दैवात्प्राप्तेन संतुष्टस्तु सुखं वर्त्तते सुखं यथा
तथा त्वैः जितात्माजितेन्द्रियस्य तद्वोपसादितैः प्राप्तैस्त्रिभिर्लोकैरसंतुष्टस्तु न सुखं वर्त्तते २४ संतोषासंतोषौ न केवलं सु
खदुःखमात्रहेतू अपि तु संसृतिमुक्त्योरपीत्याह पुंस इति अर्थकामयोरसंतोषः पुंसः संसारस्य हेतुः यदृच्छया दैवात्प्राप्तेन संतो
षः समुक्तये स्मृतः हेतुरिति शेषः २५ किंच दैवात्प्राप्तेन तुष्टस्य विप्रस्य तेजो वर्द्धते असंतोषात्तु तत्तेजः प्रशाम्यत्यंभसा
ग्नि यथा जलेन आशुशुक्षणिरग्निस्तद्वत् २६ तस्मात्संतोषस्यैव श्रेयस्करत्वाद्धे नृपोत्तम त्रीण्येव पदानि त्वां वृणे ति४
याचे एतावतैवाहं कृतार्थः वित्तं हि यावत्प्रयोजनमेव सुखदं इति शेषः अधिकं तु दुःखदं इति भावः २७ इत्युक्तो बलिः
प्रहसंस्तर्हि प्रतिगृह्यतां इत्याह एवमुक्त्वा वामनाय भूमिं दातुं जलपात्रं गृहीतवान् २८ रामाय रामाय नमः रामाय नमः

वदे॰ मिकरत्वात्

मित्र वेधा च का पसर्वमोकुर्वन् । तथा मीति प्रतिश्रुत एवन्युमा नात्मने कामेन काम्यत गतकामो जीवनं अध्ययनेन वसतीति हेत्वर्थे
तृतीया तस्मै नं लंनसमर्थः स्यादित्यर्थः अतः किंचिदेव देयामिति भावः अथैतत्पूर्णमस्यात्मं यन्नेति यत्सर्वेनेति ब्रूयात्स दुष्कीर्तिः ।
नाथ तेसे नं तत्रैव हन्यादिति श्रुत्यर्थमाह अथेति नेनिपदनृतं वचः यन्नपूर्णमर्थयर्था ... आत्मानं चेति वकारस्यान्वय आत्मनो मित्रवेसम्
स्यार्थमाकर्षतीत्यप्यात्मं यो हि नित्यं मम किंचिदपि नास्तीति दामीति ब्रूते स हि तेनानृतेन परेषामर्थानाकर्षतीति प्रसिद्धं साहि दमनृतमनृतमिव सर्वदोषं
दामर्थयथा मा वा दितियरिचो यतत्सतिसिपति अथेतदिति अथनच्छ आत्मं यावकामित्रं वचनेति किंचिदपि नेनानृतं यद्वचस्तदेतत्पूर्णमिति वित्तेनेति
ले॰१ मित्र वे सर्वमोकुर्वा कामेनचात्मने अथैतत्पूर्णमस्यात्मं यच्चनेत्यनृतं वचः सर्वेनेत्यनृतं ब्रूयात्स दुःकीर्तिः श्वसन्मृतः ४२ स्त्रीषु नर्म
43 विवाहेषु वृत्यर्थे प्राणसंकटे गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितं ४३ इति श्रीमद्भागवते महापुराणे ऽष्टमस्कंधे शुक्रवाक्यं
नामैकोनविंशोऽध्यायः १९ श्रीशुक उवाच बलिरेवं गृहपतिः कुलाचार्येण भाषितः तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो
गुरुं १ व हू च सत्यं भगवता प्रोक्तं धर्मो यं गृहमेधिनां अर्थकामं यशो वृत्तिं यो न बाधेत कर्हिचित् २ रामाय नमः
वचसो मिथ्यार्थ परत्वादनृतमित्युक्तं तदनुवदन्प्रतिक्षिपति यदीति यत्सर्वं नेति किंचिदपि नेति ब्रूयात्स दुष्कीर्तिर्यस्य तादृशः
स्यात् अकृतो वा शङ्कः पक्षविपरीत स्वार्थकः भवति स्तवाह श्वसन्नप्यसौ मृत एव स्यादित्यर्थः ४२ अतो वृत्तिसं
नं कटादिष्वनृतेन दोषाभावेत्युपसंहरति स्त्रीषु प्रोत्साहनेन वशीकारेन नर्मकर्मणि परिहासे वरादिस्तुतौ वस्यचिज्जीविकार्थे गो वा ब्रा
ह्मणो वा हिंसायां कस्यचित्प्राणबाधायां तेन निवृत्ते भवेदित्यर्थः तथाच याज्ञवल्क्यः वर्णिनां हि वधो यत्र साक्ष्यमनृतं वदेदिति
तथाच श्रुतिः तस्मात्काले एव हन्ति काले नद्यास्त्यानृते मिथुनीकरोतीति ४३ १ ह १ न श्लो ११ एवमुक्तो बलिरुवाचेत्याह बलिरिति कुलाचार्येण प्रयुक्तोऽर्थमुक्तो यजमानो बलिः क्षणं तूष्णीमवस्थाय हे राजन्नव दे२
हितः प्रकृतमध्यवस्यन् गुरुमुवाच समाह १ तदेवाह सत्यमिति भगवता त्वया यदुक्तं सत्यमेतत् यः गृहस्थानां धर्मः कोऽपि
चिदपि गृहमेधिनामर्थादीन्न बाधेत न विहन्ति अतः स गृहमेधिनां धर्मः २

तत्र

ननु तर्हि प्रतिश्रुत्यनेति कथमनृतं वाच्यं तत्राह सार्द्धैः षड्भिः अत्रापि सत्यानृततत्त्वव्यवस्थायां बह्वृचैर्गीतं यत्र कथयतो मन्त्रः श्रयु
बह्वृचश्रुत्या हि प्रथमं मे मितिं सत्यं नेत्यनृतं तद्देतत्पुष्पफलं ... यो यत्सत्यमहीश्वरो यशस्वी कल्याणकीर्तिर्भवतीत्यस्य
दिना सत्यानृतयोर्लक्षणपूर्वकं स्तुतिनिंदाभ्यां सत्यं विहितमनृतं चानिषिद्धं अनंतरं च पराग्वा एतद्रिक्तमक्षरमित्यादिना
सत्यदोषानृतेच गुणानुक्ता तस्मात्काल एव दद्यात्कालेन दद्यात्सत्यानृते मिथुनी करोतीत्युपसंहारेण संकटादिष्वनृतम
प्यनुज्ञातं तमिमं श्रुत्यर्थं दर्शयन्नाह सत्यमिति ओमित्यंगीकारेणाथ प्रोक्तं तत्सत्यं नेति यदाह तदनृतं ३८ तत्सत्यमीष
दनृतं विना नासिद्ध्यतीत्याशयेनाह सत्यं पुष्पफलं विद्यात्तानीयादात्मवृक्षस्य देहरूपस्य वृक्षस्य कुतः गीयते श्रुत्योच्यते इत्यर्थः
जीवतइति पाठांतरे तु सुगमं यद्यपि श्रुत्या वाचः सत्यं पुष्पफलं चेत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वादात्म... वृक्षस्येति प्र
सक्तानुसारेणोक्तं भवति पुष्पफलस्थानीये सत्ये ततः किमत आह वृक्षे देहे जीवति तत्पुष्पफलं ... स्यादिति पाठे श्रुत
कायावाचः परामर्शः देहश्चानृतेन रक्षणीयइत्याह अनृतं चात्मनो देहस्य मूलं तथा च श्रुतिः इयेर्नृते नेति एतेनत्वन

अत्रापि बह्वृचैर्गीतं शृणु मे सुरसत्तम सत्यमोमिति यत्प्रोक्तं यन्नेत्याहानृतं हि तत् ३८ सत्यं पुष्पफलं विद्यादात्मवृक्षस्य गीय
ते वृक्षे जीवति तन्नस्यादनृतं मूलमात्मनः ३९ तद्यथा वृक्ष उन्मूलः शुष्यत्युद्वर्ततेचिरात् एवं नष्टानृतः सद्य आ
त्मा शुष्येन्न संशयः ४० पराग्रिक्तमपूर्णं वा अक्षरं यत्तदोमिति यत्किंचिदोमिति ब्रूयात्तेन रिच्येत वै पुमान् ४१

तेन दपेत संकटेष्वात्मानं रक्षेदित्यर्थः ३९ एतदेव दृष्टांतेन स्फुटयति तद्यथा वृक्ष उन्मूलः शुष्यत्यचिरादेव उद्वर्ततेपतति सवा१
च एवं नष्टमनृतं यस्य स आत्मा देहः शुष्येत संदेहः शुष्येदिति भावः ४० सर्वदा सत्यं वदतो देहो न निर्वहेदिति स्फुटी
न२ कर्तुं सत्यस्य दोषानृतस्य गुणं चाह पराग्रिक्तमिति द्वाभ्यां यदोमित्यक्षरं सर्वं स्वं दास्यामीत्यंगीकारार्थकमक्षरं तत्पराक्पराङ्मुखं व्या
ख्यातरिक्तं इति तस्यापि व्याख्यानमपूर्णमिति तथा च श्रुतिः पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति सर्वं स्वदानेन स्वाभावेन देहस्यापि
विनाशाद्धनुर्वित्याद नष्टाद्गुणाभावाद्दोमित्यक्षरमपाङ्गुण्य वदोमित्यक्षरमपाङ्गुण्य वदन प्रतिश्रुत्यपरत्वेनापरिपूर्णं स्यादि
त्यर्थः किंचिदोमिति ब्रूयात्तर्हि किंचिद्दास्यामि पश्चात्तेन तेन रिच्येत पुमान् रिच्येत विरिच्यते इत्यर्थः दत्तावशिष्टेनात्मनो वृत्तिके
ल्यपन्न जीवेदतस्तद्धानं ... एवं ... परत्वेन परिपूर्णं स्यादिति भावः तथा च श्रुतिः ... यत्सर्वमोंकुर्यात्तिरिक्तं चात्मानं
सकामेभ्यो नालं स्यादिति यत्सर्वमों न कुर्यात्स्वात्मानं रिक्तं कुर्यादित्यर्थः ४१

यन्नेति१ ति२ रित्तो३ तृ४

ताहिंनिर्द्धनत्वेनदैन्यंस्यादित्यत्राह मनस्विनइति अर्थिनांकामपूरणेनदुर्गतिर्दैन्यंपतन्मनस्विनोविवेकिनःकार्पण्यस्यशोभनंभद्रमेवकिंपुनः
मेवादृशांब्रह्मविदांतत्रइमेवतिवक्तव्यंततोस्यवटोवांछितंददामि १ ननुनायंवटुःकिंतुविष्णुस्तवशत्रुस्ताहितुभ्यंतदामेवदायस्यामेत्याह यजंतीतिवेद
कपत्यावनुष्ठानकुशलाभवंतःआदृताःसंतःक्रतुभिर्यज्ञैर्यत्स्वयंसोमकेरसोमकेष्वपागीयंविष्णुयजंत्याराधयंतिसएषवटुर्वेषोविष्णुरधुनाममवरदोवाऽपरः
प्र॰८ शत्रुरस्तुसर्वथासेभूमींप्रियतादास्यांव ११ ताहितृतीयपादस्यदानाभावेनहेतुनात्वांबध्नीयादसावतःआह्वयेत्यत्रागांस्तसर्वस्वसमर्पणेनतोपराधितंनमा चपीति ८ २४
मसावधर्मेणापादवध्नीयातथाप्येनंधृतविग्रहंतुनाहिंशिष्येनहनिष्यामिवंधनंमप्यनुमन्येनाहंबिभेमीतिएवंमत्योक्तत्वादितिभावः १२ किंचेष

मनस्विनःकार्पण्यस्यशोभनंयदर्थिकामोपनयेनदुर्गतिः कुतःपुनर्ब्रह्मविदंभवादृशांततोवटोरस्यददामिवांछितं १० यजंति
यज्ञक्रतुभिर्यमादृताभवंतआम्नायविधानकोविदाः सएवविष्णुर्वरदोस्तुवापरोदास्याम्यमुष्मैक्षितिमीप्सितांमुने ११ य
द्यप्यसावधर्मेणमांवध्नीयादनागसं तथाप्येनंनहिंसिष्येभीतंब्रह्मतनुंरिपुं १२ एषवाउत्तमश्लोकोनजिहास
तियद्यशः हत्वामेनांहरेद्युद्धेशयीतनिहतोमया १३ शु उ च एवमश्रद्धितंशिष्यमनादेशकरंगुरुः शशाप
दैवप्रहितःसत्यसंधंमनस्विनं १४ शु उ च दृढंपंडितमान्यज्ञःस्तब्धोस्यस्मदुपेक्षया मच्छासनातिगोयस्त्व
मचिराद्भ्रश्यसेश्रियः १५ शु उ च एवंशप्तःस्वगुरुणासत्यान्नचलितोमहान् वामनायददाविमामर्चित्वोदकपूर्वकम् १६

एषउत्तमश्लोकोविष्णुस्तर्हियशःकीर्तिंनजिहासतिस्वक्तुंनेच्छतिसर्वस्वंप्रतिगृह्यमांवध्वास्वकीयंविपुलंयशःनविहास्यतीतिभावः किंतु
तु॰२ मांयुद्धेहत्वाएनांभूमिंहरेत्माहितुभ्यंसमर्प्यत्वेमयानिहतोयुद्धेशयीतवा १३ इत्यमश्रद्धितंनश्रद्धास्यसंजातेत्यश्रद्धित
स्तंस्वस्याज्ञामस्वीकुर्वाणंशिष्यंबलिंशुक्रःदैवचोदितःशशापशापानर्हत्वसूचयन्विशिनष्टिसत्यसंधामिसंधिर्यस्यतंग
यास्तमनस्कं १४ शापमेवदर्शयति त्वंदृढंनूनंपंडितमात्मानंमन्यते इति तथाचस्तुतस्तब्धःअनुएवस्तब्धःसर्वस्वनाश
प्रसक्तावप्यलेपकोसियतस्त्वंमच्छासनामतिक्रांतवान्तस्मात्ममगुरोरुपेक्षया अचिरादेवश्रियःत्रैलोक्याधिपत्याद्भ्रश्यसे १५
इत्यंगुरुणाशप्तोपिसत्यान्नचलितोमहान् १६ संकल्पोबलिर्वामनायार्चित्वोदकपूर्वकांएनांभूमिंददौ १६

44

त्या२

तथापि गृहस्थोप्यहं वित्तलोभेन प्रल्हादपौत्रः धूर्तवद्ददामीति प्रतिश्रुत्य द्विजं कथं निराकरोमि ३ ननु प्रत्याख्याने दोषा उक्तास्त
त्राह । सत्यात्परो धर्मो नास्तीति भूमिराह किं तथाहं सर्वं इति यत इयं भूर्लोकपरमन्नं तेवादिनं मते विना सर्वं मेरुमंदरादिकम्
पि वोढुं धर्तुं मलं समर्था मालाने मेनेऽसत्यसाक्षात्तस्यास्तथा विधोत्तयभावेऽप्यलोवपरोनरस्तस्या दुर्भरत्वेनानुमतइतिभावः मन्ये
इति पाठेऽलीकपरं नरं विनाहं सर्वं वोढुमलं मन्येऽलीकपरं तु न सहे कथमहं तत्सहेइत्यर्थः सोढुमिति पाठः सुगमः ४ किंच
यथाविप्रप्रलंभनाद्विप्रविषयेऽनृतं वरनाद्यथाहं विभेमि तथा निरयादिभ्यो न विभेमि तत्राधन्ये दारिद्र्ये ५ किंचय
द्यत्धनादिकं तत्सर्वं संपरेतं मृतं पुरुषमस्मिन्नेव लोके हास्यति त्यक्ष्यति तत्किमिति जीवन्नेव स्वयं न देयमिति भावः ।
तथापि तावद्धनिसेकरपरिहारार्थं किंचिद्देयं तद्दाऽस्त्वत आह तस्येति येनार्थेन ददता नापि नतुष्टोऽद्धि प्रस्तहित स्यार्थस्य त्यागे यतेऽकिंचि
मित्ते नकिंचितु याचितादन्यस्य दाने त्रिप्रस्यासंतोषातद्धाने दुर्थैर्मिवस्याद तो याचितं सर्वं देयं न किंचिदितिभावः ६ ननु यदि

सत्याहं वित्तलोभेन प्रत्याचक्षे कथं द्विजं प्रतिश्रुत्य ददामीति प्राल्हादिः किरातोयथा ३ नह्यसत्यात्परो धर्म इति होवाच भूरियं
सर्वं वोढुमलं मन्ये स्ते लीकपरं नरं ४ नाहं बिभेमि निरयान्नाधन्यादसुखार्णवात् नस्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ५
यद्यद्धास्यति लोकेस्मिन्संपरेतं धनादिकं तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत् ६ श्रेयः कुर्वन्ति भूतानां साधवो दुस्त्यजासु
भिः दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु ७ यैरियं बुभुजे ब्रह्मन्दैत्येन्द्रैरनिवर्तिभिः तेषां कालोऽग्रसीत्लोकान्नयशोऽधिग
तं भुवि ८ सुलभा युधि विप्रर्षे ह्यनिवृत्तास्तनुत्यजः न तथा तीर्थ आयाते श्रद्धयाये धनत्यजः ९ रामायरामाय

किंचिद्देतेन नतुष्टोद्विप्रस्तर्हि न देयमेवेत्याह श्रेय इति साधवः यथोपकार साधनस्वभावाद् ध्यङादयः दुस्त्यजैरसुभिः प्राणैरपि भूतानां
श्रेयः कुर्वन्ति धरादिषु को विचारः ७ सर्वं प्राणिनां दीयमानं ददन्तं वाभिप्रायेणाह यैरिति हे ब्रह्मन्दैत्येन्द्रैरस्माकमपि तामहादिभिर्युद्धे
ष्वनिवर्तिभिरियं भूमिर्बुभुजे उपभुक्तो तेषां लोकान्कालोऽग्रसीत्सेह तदात् मेर्धमादिगतं तत्र यशः कीर्ति तु नाग्रसीत्तात्वधु
नाप्यनुवर्ततइतिभावः ८ देहादपि प्रियस्य धनस्य त्यागादेव कीर्तिर्भवतीत्याह सुलभाइति हे विप्रर्षे युद्धेन तनुं देहं त्यजंती
ति तथा तादृशाः सुलभाः बहवोऽनुवृत्ता जाताः यभ्रूं युद्धे स्वर्थ्यः तथा तीर्थे सत्पात्रे श्रद्धया सर्वस्वं त्यजंतीति तेनानुवृ
ताः अतोतिदुष्करो धनत्याग एव मया कार्य इतिभावः अनिवृत्ता इत्यपि पाठः ९ रामायनमः राम राम
रामरामरामराम श्रीमान् वेदवादवादिविजयते राम राम राम राम राम राम राम राम रामरामरामराम राम रामायनमः

मु॰

विभोर्वाससि वस्त्रे संध्यां जघने आत्मास्वयं वलिर्मुख्यो येषां तान् प्रजापतीन् गुह्ये नाभ्यां नभोन्तरिक्षं कुक्षिषु सप्तसिंधून् सर्वान् उरुक्रमस्य भगवत उ
रसि नक्षत्रपंक्तिं २४ अंग हे राजन् हृदि धर्मं मुरारेः स्तनयोः ऋतं च सत्यं च एतदिमानि देवतानि स्पष्टं: अथ मनसि चंद्रमसं वक्षस्य
रविंदहस्ते यस्याः तां लक्ष्मीं कंठे सामानि समस्तान् रेफान् शब्दादीन् २५ भुजेषु इन्द्रः प्रधानो मुख्यो येषां तान् अमरान् तस्य भगवतः
कर्णयोर्दिशः मूर्ध्नि द्यौ दिवि केशेषु मेघान् नासिकायां श्वसनं श्वासात्मके वायुं वा आयो रूक्षत्वाद् अक्ष्णोर्नेत्रयोः सूर्यं वदने
मुखे वह्निं २६ वाण्यां तु छंदांसि वेदान् रसने रसनेन्द्रिये वरुणं भ्रुवोर्निषेधं निषेध्यात्मके शास्त्रार्थं विधिं प्रवृत्त्यात्मके शास्त्रार्थं
पक्ष्मसु अहश्च रात्रिं च परमपुरुषस्य ललाटे मन्युं अधरोष्ठे लोभं २७ स्पर्शे त्वगिन्द्रिये कामं रेतसि जलं पृष्ठे त्वधर्मं क्रम

45

संध्यां विभोर्वाससि गुह्य ऐक्षत् प्रजापतीन् जघने आत्ममुख्यान् नाभ्यां नभः कुक्षिषु सप्तसिंधून् उरुक्रमस्योरसि चर्क्ष
मालां २४ हृद्यंग धर्मं स्तनयोर्मुरारेः ऋतं च सत्यं च मनस्यथेन्दुं श्रियं च वक्षस्यरविंदहस्तां कंठे च सामानि समस्तरे
फान् २५ इन्द्रप्रधानान् अमरान् भुजेषु तत्कर्णयोः ककुभो द्यौश्च मूर्ध्नि केशेषु मेघान् श्वसनं नासिकायाम् अक्ष्णोश्च सू
र्यं वदने च वह्निं २६ वाण्यां च छंदांसि रसे जलेशं भ्रुवोर्निषेधं च विधिं च पक्ष्मसु अहश्च रात्रिं च परस्य पुंसो मन्युं ललाटे
धर एव लोभं २७ स्पर्शे च कामं नृप रेतसांभः पृष्ठे त्वधर्मं क्रमणेषु यज्ञं छायासु मृत्युं हसिते च मायां तनूरुहेष्वोषधि
जातयश्च २८ नदीश्च नाडीषु शिला नखेषु बुद्धावजं देवगणान् ऋषींश्च प्राणेषु गात्रे स्थिरजंगमानि सर्वाणि भूता
नि ददर्श वीरः २९ सर्वात्मनीदं भुवनं निरीक्ष्य सर्वे सुराः कश्मलमापुरंग सुदर्शनं चक्रमसह्यतेजो धनुश्च शार्ङ्गं स्तनयित्नुघोषं

णेषु पादन्यासेषु यज्ञं छायासु मृत्युं अंतकं हसिते मायां तनूरुहेषु लोमसु ओषधिजातीः २८ नाडीषु नदीः नखेषु शिलाः बुद्धाव
जं ब्रह्माणं देवगणान् ऋषींश्च प्राणेषु इन्द्रियेषु गात्रे च चरात्मानि भूतानि सर्वाणि पुरस्य रविलक्षणान्यपश्यत् २९
इदं सर्वात्मनि हे कृत्स्न जगदाश्रयभूते भगवति इदं भुवनं निरीक्ष्य अंग हे राजन् सर्वे असुराः कश्मलं मोहमेतदिसाश्च
ये दुःखं वा प्रापुः सुदर्शनं च चक्रमित्यादीनां ईशं भगवंतं उपतस्थुः इति सुत्तरेणान्वयः चक्रे विशि नष्टि सु
दर्शनाभिधम असह्यतेजो यस्य धनुर्विशिनष्टि शार्ङ्गमित्यं स्तनयित्नोरिव घोषो यस्य तत् ३०

तदेवप्रपंचयति विंध्यावलिरिति वलेः पत्नी प्रसिद्धा सा जालकमालिनी जालकं मुक्ताभरणविशेषः तन्मालिनी तदाभ्यागत्याव नेजनी नां पादप्रक्षालना
यौनामपामडिः पूर्णं हैमकलशमानिन्ये आनीतवती १७ ततोयजमानो वलिः तस्य भगवतो वामनस्य प्रीमत्पादं हैमुदा प्रक्षाल्य तदप
क्षालनापः विश्वपावनीमूर्ध्नि वहन् १८ तदादिविस्थिता देवगणा गंधर्वा दयश्च निर्भयाः संतः सर्वे तस्य वलेर्दानरूपं कर्माभितः प्रशंस
नः आदरादसुरेन्द्रमस्तके वर्षं मुदायुक्ताः संतो ववृषुः १९ दानप्रकारमेवदर्शयति मनस्विनानेन वलिना कृतमितरैर्दुष्करं स्थितो
यं विहाय त्रिपदे पादत्रयाय त्रिविक्रमाय याजगत्त्रयमदात् २० इत्येवं सर्वं प्रतिग्रहणं तुसुस्तुत इदरनेतस्य वामनरूपं तद
द्भुतं यथातथाऽवर्द्धत वांछितं प्रतिग्रहीतुं इति वलिना दत्तं मुक्त्वा लोकत्रयमपि वांछितं प्रतिग्रहीतुमवर्द्धतेति भावः ॥
विंध्यावलिस्तदागत्य पत्नी जालकमालिनी आनिन्ये कलशं हैममवनेजन्यपां भृतं १७ यजमानः स्वयं तस्य श्रीमत्पादयु
गं मुदा अवनिज्यावहन्मूर्ध्नि तदपो विश्वपावनीः १८ तदाऽसुरेन्द्रं दिवि देवतागणा गंधर्वविद्याधरसिद्धचारणाः
तत्कर्म सर्वेपि गृणंत आर्जवं प्रसूनवर्षैर्ववृषुर्मुदान्विताः १९ नेदुर्मुहुर्दुंदुभयः सहस्रशो गंधर्वकिंपुरुष
किंनरा जगुः मनस्विनानेन कृतं सुदुष्करं विद्वानदाद्यत्त्रिपदे जगत्त्रयं २० तद्वामनं रूपमवर्द्धताद्भुतं हरेरनं
तस्य गुणत्रयात्मकं भूः खं दिशो द्यौर्विवराः पयोधयस्तिर्यङ्नृदेवा ऋषयो यदासत २१ काये वलिस्तस्य
महाविभूतेः सहर्त्विगाचार्यसदस्य एतत् ददर्श विश्वं त्रिगुणं गुणात्मके भूतेंद्रियार्थाशयजीवयुक्ते २२ रसामचष्टां
तदेधितं रूपं विशिनष्टि ······ गुणत्रयात्मके जगदात्मनि स्वस्मिन्स्वस्मात एव भूः खं इत्यादयो अस्मिन्नासन् स्थिताः तद
ऋत्विगादिसहितो वलिर्महाविभूतेस्तस्य भगवतः काये गुणत्रयपरिणामात्मके जगदाश्रयभूते भूतपंचकादियु
क्तमेतत्कृत्स्नं विश्वं ददर्श २२ तदेव प्रपंचयति रसामिति पादेन्तः स्थाभिः पादतलेरसातलमधोलोकमच
ष्टापश्यत तथा पादयोर्मही पुरुषस्य भगवतो जंघयोर्महीध्रान्पर्वतान् जानुनि पक्षिगणः विमूर्तेर्भगवत ऊ
वीर्मारुतं गणे वायुसंघमिन्द्रसेनो वलिः इन्द्रस्य सेनेव सेना यस्य स इन्द्रपुरे स्थितत्वाद यद्वेत्स्नुषंगः ऐसदिल्लमकर्षेवा
२३ ९२

वेदादयस्तदभिमानिदेवताः अन्ये च तत्लोकवासिनः योग एव समीरो वायुस्तेन दीपितेन ज्ञानाग्निना रंधितं दग्धं कर्मैव रयपापरूपं तदेव क
ल्मषं येषां ते तत्र नयान्विता मीमांसान्यायोपेताः वेदोपवेदरूपा निगमास्तत्र ऋगादयो वेदाः आयुर्वेदादय उपवेदाः अंगादीनि शिक्षा
दीनि पुराणानि ब्राह्मादीनि संहिताः पंचरात्रादयः तएते तत्तदभिमानिनो देवगणाः मरीच्यादयः अन्ये चाकर्मकं मौनयो
गप्रचुरं धाम सत्यलोकं गताः इत्यनेन विच्छिन्नभगवद्भक्तियोगानां केषांचिल्लिप्सया ये प्राक्तना तत्र योगप्रभावाच्चतुर्मु
खलोकप्राप्तिरित्यभिप्रेतेन लिंदत्रमस्तुत्यभिप्रायकं तस्या अप्रामाण्यकत्वादिति भावः २ अथ शुचिश्रवाः विपुलकीर्तिः
पद्मभवो ब्रह्मा स्वयं यस्य नाभिकमलादुत्पन्नस्तस्य विष्णोरंघ्रये प्रोन्नमिताय प्रकृष्टं मूर्ध्वं प्रसृताय अर्हणादिकम

46

वेदोपवेदा नियमा नयान्विताः तर्केतिहासांगपुराणसंहिताः ये चापरे योगसमीरदीपितज्ञानाग्निना रंधित
कर्मकल्मषाः ववंदिरे यत्स्मरणानुभावतः स्वायंभुवं धाम गता अकर्मकं २ अथांघ्रये प्रोन्नमिताय
विष्णोरुपाहरत्पद्मभवोर्हणादिकं समर्च्य भक्त्याभ्यगृणाच्छुचिश्रवा यन्नाभिपंकेरुहसंभवः स्वयं ३
धातुः कमंडलुजलं तदुरुक्रमस्य पादावनेजनपवित्रतया नरेन्द्र स्वर्धुन्यभून्नभसि सा पतती निमा
र्ष्टि लोकत्रयं भगवतो विशदेव कीर्तिः ४ ब्रह्मादयो लोकनाथाः स्वनाथाय समादृताः सानुगा
बलिमाजह्रुः संक्षिप्तात्मविभूतये ५ तोयैः समर्हणैः स्रग्भिर्दिव्यगंधानुलेपनैः धूपैर्दीपैः सु
रभिभिर्लाजाक्षतफलांकुरैः ६ स्तवनैर्जयशब्दैश्च तद्वीर्यमहिमांकितैः नृत्यवादित्रगीतैश्च शंखदुंदु
भिनिस्वनैः ७

मर्घ्यादिकं समर्पितवान् एवं सम्यगभ्यर्च्य भक्त्याभ्यगृणादस्तोषीत् ३ तदाह नरेन्द्र धातुः पद्मजस्य कमंडलुजलं तद्भगवत्पादयोः प्र
क्षालनार्थं निक्षिप्तं उरुक्रमस्य पादयोरवनेजनेन प्रक्षालनेन निमित्तेन पवित्रतया स्वर्धुनी नभस्यभूत् सा स्वर्धुनी भगवतः
कीर्तिरिव विशदा निर्मला नभसि ध्रुवमंडले पतती निम्नभागे अधः स्रवंती लोकत्रयं निमार्ष्टि पवित्रीकरोति ४ ततः संक्षिप्तोपसं
हृता आत्मविभूतिः स्वदेहविस्तारो येन तस्मै यथापूर्वं वामनरूपेण स्थिताय स्वनाथाय भगवते लोकानां नाथाः सा
नुगा ब्रह्मादयः बलिं पूजां तोयादिभिः समाजह्रुः कृतवंतः ५ तत्र समर्हणैः तोयैरर्घ्यजलैः सुरभिभिः स्रगादिभिर्वि
षणोत्कटाः अंकुरास्तैः ६ स्तवनैः स्तोत्रैः भगवद्वीर्यमहिमांकितैः ७

जलजं शंखं बिभ्रत् पांचजन्याभिधः पर्जन्यस्येव घोषो यस्य गदां बिभ्रत् कौमोदक्यभिधा तरस्विनी चलती असिं खड्गं बिभ्रत् वि
द्याधराभिधो वा विद्यायाः धरः तस्यैव नंदक इति नामांतरं च द्वाकाराणि मंडलानि यस्य तेन चर्मणा खेटाख्येन युक्तः तूणो
त्तमो तूणश्रेष्ठो बिभ्रत् अक्षय्यसायकाभिधो इदमन्वयार्थं नाम ३१ सुनंदः मुख्यः आदिर्येषां ते हरेः पार्षदाश्च लोकपालैः
सहिता ईशमुपतस्थुः ईशस्य समीपे स्वस्वस्थाने स्थितवंतः इत्यर्थः तदा हे राजन् उरुक्रमो भगवान् स्फुरद्भिः कीरीटादिभिः म
धुव्रतानां स्रक् पंक्तिर्यस्यां तया वनमालया चारु तौ च ... ले कृत ... यावत् रराज तत्र मीनाकारे कुंडले रत्नोत्तमः कौस्तु
भः कुंडले रत्नं तस्य पृथक् पदत्वे स्फुरंति किरीटादीनि यस्य सः श्रीवत्सादिभिर्वनमालया चारु तौ रराजे इत्यर्थः ३२ उरु

पर्जन्यघोषो जलजः पांचजन्यः कौमोदकी विष्णुगदा तरस्विनी विद्याधरोऽसिः शतचंद्रयुक्तस्तूणोत्तमावक्षय
सायकौ च ३१ सुनंदमुख्या उपतस्थुरीशं पार्षदप्रधानाः सह लोकपालाः स्फुरत्किरीटांगदमीनकुंडलः श्रीव
त्सरत्नोत्तममेखलांबरैः ३२ मधुव्रतस्रग्वनमालया वृतो रराज राजन्भगवानुरुक्रमः क्षितिं पदैकेन ब
लेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः ३३ पदं द्वितीयं क्रमतस्त्रिविष्टपं न वै तृतीयाय तदीयमण्व
पि त्रिविक्रमस्यांघ्रिरुपर्युपर्यथो महर्जनाभ्यां तपसः परं गतः ३४ इ श्री भा व म पु णे म धे वि म
च रे पो पः २० शु उ च सत्यं समीक्ष्याब्जभवो नखेन्दुभिर्हतस्वधामद्युतिरावृतोऽभ्यगात् मरीचिमुख्या ऋ
षयो बृहद्व्रताः सनंदनाद्या नरदेव योगिनः १ रामाय श्रीतेरा राम राम राम राम राम राम राम राम राम राम रामाय नमः

क्रमत्वमेवाह बलेः सर्वं धरिणीं क्षितिं एकेन पदा शरीरेण नभोंतरिक्षं बाहुभिर्दिशः विचक्रमे आक्रांतवान् ३३
एवमाक्रम्य द्वितीयं पदं त्रिविष्टपं क्रमतः हरेस्तृतीयपादाय तदीयं बलेः संबंधि ... अपि वसु मनागपि नासीत् ॥
तत्र हेतुस्त्रिविक्रमस्यांघ्रिस्त्रिविष्टपात् ... उपर्युपरि गच्छन् महर्जनाभ्यां तपसश्च परं सत्यलोकं गतः न्यराव२
३४ इ ब विं भा मो यः २० त्रिविक्रमस्यांघ्रिस्तपसः परं गत इत्युक्तं ततः किं वृत्तं तदाह सत्यमित्यादिना सत्यलो
के गतं गतवंतं तमंघ्रिं समीक्ष्याब्जभवो ब्रह्मा नखेन्दुभिर्हतस्वधाम्नो द्युतिर्यस्य तादृशः आदरयुक्तोऽभ्यगात् प्राम
रीच्यादयः ऋषयः हे नरदेव ब्रह्मनिष्ठाः सनंदनादयो योगिनश्च १ रामराम राम राम राम राम राम राम

सुखदुःखयोः हृपक्तये आनुकूल्याय प्रातिकूल्याय च भवति २

परमगुरुषपार्षदैर्हन्यमानान्स्वकीयान्दैत्यान् दृष्ट्वा बलिः शुक्रस्य शापमचिरात् दृष्टवासो स्मरन् तुक्तविधमनुस्मरन्नतीवक्रुद्धानपि वारया
मास १८ वारणप्रकारमेवाह द्वाभ्यां हे विप्रचित्तादयः मद्वचः श्रूयतां युष्माभिरिति शेषः किं तद्युद्धं न कुरुत ततो निवर्तध्वं नोस्माकमयं
कालोनुकूलो न भवति १९ हे दैत्याः यः कालरूपो भगवान्सर्वभूतानां प्रभुः यद्[redacted]
[redacted] पुमान् कालं वञ्चयः पौरुषैः स्वकीयबलपराक्रमादिभिरतिवर्तितुं न समर्थः २० यः कालरूपो भगवान्सर्वेमस्माकं भवाय
सीत्स एवाधुना तद्विपर्ययमस्माकं दुःखदो भवत्वादिवौकसां देवानां भवाय वर्तते २१ अतो जनो बलादिभिरुपायैः कालात्मकं ईश्वरं ना
तिक्रामति सचिवामन्त्रिणस्तत्कर्म भिक्षित भावः २२ कालप्रभावं पश्यतेत्याह भवद्भिरिति दैवेनोन्नतैर्भवद्भिरेते हरेर्भगवतस्तस्यानुचरा तएव न

हन्यमानान्स्वकान् दृष्ट्वा पुरुषानुचरैर्बलिः वारयामास संरब्धान्काव्यशापमनुस्मरन् १८ व रू च हे हे विप्रचित्ते हे राहो हे नेमे श्रूयतां वचः मा युध्यत निवर्तध्वं न नः कालोयमर्थकृत् १९ यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् २० यो नो भवाय प्रागासीदभवाय दिवौकसां स एव भगवानद्य वर्तते तद्विपर्ययं २१ बलेन सचिवैर्बुद्ध्या दुर्गैर्मन्त्रौषधादिभिः सामादिभिरुपायैश्च कालं नात्येति वै जनः २२ भवद्भिर्निर्जिता ह्येते बहुशोनुचरा हरेः दैवेनर्द्धैस्त एवाद्य युधि जित्वा नदन्ति नः २३ एतान्वयं विजेष्यामो यदि दैवं प्रसीदति तस्मात्कालं प्रतीक्षध्वं यो नोर्थत्वाय कल्पते २४ श्रु उ च पत्युर्निगदितं श्रुत्वा दैत्यदानव यूथपाः रसां निर्विविशू राजन्विष्णुपार्षदताडिताः २५ अथ तार्क्ष्यसुतो ज्ञात्वा विराट् प्रभुचिकीर्षितम् बबंध वारुणैः पाशैर्बलिं सौत्येहनि क्रतौ २६

वानुचराः प्रायशो निर्जिताः तएवाधुना नोस्मान्युद्धे जित्वानं
दन्ति सिंहनादान्कुर्वन्ति वाधात्तुनामनेकार्थत्वात् २३ यद्यदैवमस्माकमनुकूलं भवति तर्हि तान्वयं विजेष्यामस्तस्मा
कालं प्रतीक्षध्वं कं यः कालो नोस्माकमर्थलाभायानुकूल्याय भवति तं कालं प्रतीक्षध्वं २४ एवं पत्युर्बलेर्निगदितं श्रु
त्वा विष्णुपार्षदैः पीडिताः दैत्या हे राजन् रसां रसातलं निर्विविशुः २५ अथ विभोर्वामनस्य चिकीर्षितं ज्ञात्वा विराट्
विष्णोर्वाहनं राजन् इति तथा तार्क्ष्यसुतो गरुडः सुत्येहनि सोमाभिषवदिने वारुणैः पाशैर्बबंध विभोश्चिकीर्षितं ज्ञात्वेत्यस्यचा
यमर्थः अस्य सर्वस्वापहारेणाभिमानमत्यभिमानं संत्याज्य पदनीदेहस्वीकारेणाहंकारमपि त्याजयित्वा परमानुग्रहं कर्तुमिच्छति
न चानेन तुल्योऽन्यः कोपि सत्यसंधो वीरो वास्तीति तद्यशः ख्यापनाय किंचिद्याचितुमपीच्छतीति प्रभोरभिप्रायं ज्ञात्वा तं बबंधेति २६

47

रक्षाणामधिपतिर्जाम्बवान्मनोवेगः आगत्य भेरीशब्दैः सर्वां सुदिक्षु विजयस्रुचकं महोत्सवरूपं घोषं कारयामास ८ त्रिपदविषयायाः
जयायाञ्चाकपटयाञ्चानयाहृतामपहृतां सर्वां भूमिं दृष्ट्वा सर्वे दैत्या दीक्षितस्य स्वभर्तुरग्रे इति शेषः ऊचुः स्वभर्तुर्मे हि हृतां दृष्टेति वान्वयः ९
तेषां मुक्तिमाह नवा इति सुर्वेष्वियमिः अयं वामनो वलवं धुर्द्विजो न भवति किंतु मायाविनां श्रेष्ठोऽपि सुरेव द्विजरूपेणात्तिरोधायितस्व
रूपः सन्देवानां कार्यं कर्तुमिच्छति १० याचमानेन वटुरूपिणानेनाविस्तुनो वर्हिषि यज्ञे निमित्ते सप्तैः सर्कोदं डोदुरात्मविषयो
येन तस्य नोऽस्माकं भर्तुः सर्वं स्वमपहृतं ११ नेदमस्य हेतुर नुचितं कृत्यं किंतु वामनस्यैवेत्यभिप्रायेणाहुः सततं सत्यव्रत
स्य तत्रापि विशेषतो दीक्षितस्य दीक्षायां स्थितस्य ब्रह्मण्यस्य दयावतश्च भर्तुस्ते नानृतं भाषितुं शक्यम् १२
जांबवान्नृक्षराजस्तु भेरीशब्दैर्मनोजवः विजयं दिक्षु सर्वासु महोत्सवमघोषयत् ८ महीं सर्वां हृतां दृ
ष्ट्वा त्रिपदव्याजयाञ्चया ऊचुः स्वभर्तुरसुराः दीक्षितस्यात्यमर्षिताः ९ नवा अयं ब्रह्मबंधुर्विष्णुर्मायाविनां वरः द्विजरूपप्रतिच्छन्नो देवकार्यं चिकीर्षति १० अनेन याचमानेन शत्रुणा वटुरूपिणा स
र्वस्वं नो हृतं भर्तुर्न्यस्तदंडस्य वर्हिषि ११ सत्यव्रतस्य सततं दीक्षितस्य विशेषतः नानृतं भाषितुं शक्यं
ब्रह्मण्यस्य दयावतः १२ तस्मादस्य वधो धर्मो भर्तुः शुश्रूषणं हि नः इत्यायुधानि जगृहुर्वलेरनुचरा
सुराः १३ ते सर्वे वामनं हंतुं शूलपट्टिशपाणयः अनिच्छतो वले राजन्प्राद्रवञ्जातमन्यवः १४ ता
नभिद्रवतो दृष्ट्वा दितिजानीकपान्नृप प्रहस्यानुचरा विष्णोः प्रत्यषेधन्नुदायुधाः १५ नंदः सुनंदोऽथ जयो वि
जयः प्रबलो वलः कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्रिराट् १६ जयंतः श्रुतदेवश्च पुष्पदंतोऽथ सात्वतः सर्वे
नागायुतप्राणाश्चमूं ते जघ्नुरासुरीम् १७
तस्मादस्य वामनस्यैवानुचितकारित्वाद्वध एव न्याय्यस्तदेतदस्माकं भर्तुः परमधिकं शुश्रूषणं इतीत्थं वदंतो वलेर्मतमसाः दैत्याः आयुधानि ग
हीतवंतः १३ सर्वे ते ऽसुराः शूलादयः पाणौ येषां ते वलेराज्ञो निच्छतो जातउत्पन्नो मन्युर्येषां ते वामनं हंतुं प्राद्रवन् धावु
र्दुद्रुवुः १४ हे नृप तान्वामनस्याभिमुखमागच्छतः दृष्ट्वा नंदादयो विष्णोः पार्षदाः तत्तद्धृतानि आयुधानि येस्ते प्रहसाहेऽस्मान्स्वपि
स्वपराक्रमकर्तुमिच्छतीति परिहासं कृत्वेत्यर्थः प्रत्यषेधन्निवारयामासुः १५ सर्वे ते नागायुतप्राणाः इति वलस्यन्यूनतामि
व न्तोतात्पर्य्यमतिशायितवला इति भावः नंदादयः विष्णुपार्षदाः आसुरीं चमूं सेनां जघ्नुर्हतवंतः नागायुतप्राणाइति चमवि

वचएवाह दशभिः यदीति हेउत्तमश्लोक मे मयोक्तं वचो यदि यद्यपि व्यलीकमनृतं मन्यते तथापि हे सुरर्षभ तत्सत्यमेवाहं करोमि त्वदुक्तं प्रलंभनं न भवतु ममधीःश्रितं तौ यत्निजं पदं निधेहि २ सर्वतो रक्षणीयमात्मानं मह्यं समर्पयन्न बिभेषि किं इत्यत आह बिभेमीति निरयात् नारकेभ्यो नाहं तथा बिभेमि यथा साधुवाद दन्त वादादपकीर्तेर्विभ्रंशमुपाद्विजे तत्र पदच्युतिः स्था नभ्रंशः दुरत्ययात् दुरतिक्रमणीयात् असनात् दुःखादर्थकृच्छ्रात् भयात् ३ ननु मया निगृहीतस्य तवापकीर्तिरेव नेत्याह पुं सामिति योग्यतमं नार्पितं कारितं दंडमहं पुंसां श्लाघ्यतमं यद्यस्करमेव मन्ये हि यस्मात् दंडं माता पिता सुहृत् वा नार्पयति ४ किं च त्वमस्माकमनुगृहीतेवेत्याह नूनमिति त्वमस्माकं परोक्षो गुरुरस मत्क्षे हितकारी कथमेतज्ज्ञातं इत्यत आह यो भवानने कैः प्रार्थ्यश्रीप्रदात्प्रमत्तानां मदेन अंधानामस्माकं विभ्रंशं तन्मदापनोदकं चक्षुरिवादिशत् ५ किंच यस्मिन् त्वयि वैरानु

व रु॰ च यद्युत्तमश्लोक भवान्ममेरितं वचो व्यलीकं सुरवर्य मन्यते करोम्यृतं तन्न भवेत्प्रलंभनं पदं तृतीयं कु रु शीर्ष्णि मे निजं २ बिभेमि नाहं निरयात्पदच्युतो न पाशबंधाद्व्यसनाद्दुरत्ययात् नैवार्थकृच्छ्राद्भवतो विनिग्रहा दसाधुवादाद्भृशमुद्विजे यथा ३ पुंसां श्लाघ्यतमं मन्ये दंडमर्हत्तमार्पितं यन्न माता पिता भ्राता सुहृदश्चादिशंति हि ४ त्वं नूनमसुराणां नः परोक्षः परमो गुरुः यो नोऽनेकमदांधानां विभ्रंशं चक्षुरादिशत् ५ यस्मिन्वैरानुबंधेन रू ढेन विबुधेतराः बहवो लेभिरे सिद्धिं यामु हैकांतयोगिनः ६ तेनाहं निगृहीतोऽस्मि भवता भूरिकर्मणा बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे ७ पितामहो मे भवदीयसंमतः प्रह्लाद आविष्कृतसाधुवादः भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वं परमः स्वपित्रा ८

बंधेन बहवो दैत्याः सिद्धिं लेभिरे कांसिद्धिमेकांतयोगिनोऽनन्यप्रयोजनस्त्व भक्ति निष्ठा लभंते तेनैवंभूतेन भूरि कर्मणा चित्यविवि धविचित्रचेष्टितेन भवता निगृहीतो वारुणैः पाशैर्बद्धश्चाप्यहं नातिलज्जामि न दुःख्यामि च त्वत्कृतानि ग्रहबंधनयोर्नितरां रुपार्थरूपत्वात् उदारविंदेशरणागतः तथाहमपि देवास्त्वत्सामीप्यं नीतः त्वां प्रपद्य इत्याह चतुर्भिः मे पितामहः प्रल्हादः सद्गुणाश्रयः प्रारीरतदनुवंध्याद्बुद्धेयतां निश्चितस्य परमपु

प्राविष्कृतःसाधु वादः २ "कीर्तिर्यस्य स्वपित्रा भवतो विपक्षेण शत्रुणा हिरण्यकशिपुना विचित्रवैशसं नानाविधं दुःखं संप्रापितो पि त्वमेव परमः सर्वं विधबंधुनिरतिशय पुरुषार्थश्रयस्य तादृशः इत्यर्थः ८ राम॰

प्रभविष्णुना सर्वशक्तिना विष्णुना दैत्यानां पत्यौ बलौ निगृह्यमाणे बध्यमाने सति रोदस्योर्द्यावापृथिव्योः सर्वदिक्षु महान् हाहाकारः आ
सीत् २७ अथ भगवान्वामनः बलिं वारुणैः पाशैर्बद्धमित्युवाच कथंभूतं नष्टश्रीकं स्थिरचित्तं प्राप्तं विवेकिनमुदारं विपुलं यशो य
स्य तं २८ उक्तमेवाह यावदध्यायसमाप्ति पदानीति हे असुर भूमेः त्वया मे त्रीणि पदानि मह्यं दत्तानि दास्यामीति प्रतिश्रुतानि तत्र द्वाभ्यां
सर्वा भूर्लोकादिसहिता भूमिः क्रान्ता परिशिष्टं यत्पदं गृहीताः भुना तृतीयं पदं उपकल्पय देहि २९ यावदसौ सूर्यः किरणैस्तप
ति यावदिन्दुर्यो वा उडुभिर्नक्षत्रैः सह प्रकाशते तथा पर्जन्यो यावद्वर्षति तावत्त्वयैव हि तत्संबंधिनी भूमिः ३० सोयं कृत्स्नो भूर्लोकः
मयात्मनैकेनैव पदेन क्रान्तः स्वर्दिशश्च तनोः तन्वा क्रान्ताः तथा तेतव पश्यतः सत एव स्वः स्वकीयः स्वर्लोकः द्वितीयेन पदे

हाहाकारो महानासीद्रोदस्योः सर्वतो दिशं । निगृह्यमाणेऽसुरपतौ विष्णुना प्रभविष्णुना २७ तं बद्धं वारुणैः पाशैर्भगवा
न्वामनः । नष्टश्रियं स्थिरप्रज्ञमुदारयशसं नृप २८ भ वा वा पदानि त्रीणि दत्तानि भूमेर्मह्यं त्वयासु
र द्वाभ्यां क्रान्ता मही सर्वा तृतीयमुपकल्पय २९ यावत्तपत्यसौ गोभिर्यावदिन्दुः सहोडुभिः यावद्वर्षति पर्जन्यस्तावती
भूरियं तव ३० पदैकेन मया क्रान्तो भूर्लोकः खं दिशस्तनोः स्वर्लोकस्तु द्वितीयेन पश्यतस्ते स्वमात्मना ३१ प्रतिश्रु
तमदातुस्ते निरये वास इष्यते विश त्वं निरयं तस्माद्गुरुणा चानुमोदितः ३२ वृथा मनोरथस्तस्य दूरः स्वर्गः पत
त्यधः यो विप्राय प्रतिश्रुत्य न तदर्थं प्रयच्छति ३३ विप्रलब्धो ददामीति त्वयाहं चाढ्यमानिना तद्व्यलीकफलं भुङ्क्ष्व
निरयं कतिचित्समाः ३४ इ श्री भा व म पु ष्ट स्क ए विं ध्या : २१ श्रु उ च एवं विप्रकृतो राजन्बलिर्भ
गवतासुरः भिद्यमानोप्यभिन्नात्मा प्रत्याहाविक्लवं वचः १

नाक्रान्तः ३१ प्रतिश्रुतं तृतीयं पदमप्रददतस्तव नरक एव
निवास इष्यते तस्मात्प्रतिश्रुतादानाद्गुरुणा शुक्रेणानुमोदितः श्चप्तोदेत्यर्थः गुरुणा शप्तस्त्वर्थः नरकं प्रविश ३२ तदेव
मुक्तेपि निरयपरिहारार्थं स्वर्गेच्छुः शापपरिहारार्थं च मनोरथं कुर्वंतं प्रत्याह वृथेति यः पुमान् प्रतिश्रुत्य तदर्थिने प्रतिश्रुतं नार्पयते
न ददाति तस्य मनोरथः प्राप्यो यद्यपि स्वर्गश्च तस्य दूर एव स त्वधः पतत्येव त्वया चाढ्यमानिना मन्यते इति तादृशेना
धुना ददामीत्येवं प्रतिश्रुत्य बलाद्विप्रलब्धो वंचितः तस्मात् व्यलीकफलमनृतफलं नरकं कतिचित्समाः संवत्सरान्भुंक्ष्व
३४ इति श्रीभागवते महापुराणे अष्टमस्कन्धे टीकायां एकविंशः २१ एवं भगवतोपालब्धो बलिस्तत्सुवाचेत्याह मुनिः एवमिति हे राजन्बलिरसुरो भगवता विप्रकृतः वि
प्रलब्धः भिद्यमानः सत्यात् चाल्यमानोपि बलिरभिन्नात्मा अविकलितमनाः यस्मात् अविक्लवमदीनं गंभीरं वचो भगवंतं प्रत्याह १ रामः

भा०प्र० वी
६६

तदेवाह श्लाघ्यां त्वयेति ऐंद्रं पदं त्वयैवास्मै दत्तं कुतः यतस्त्वं । त्वयापि साधनेन विश्वजिता यागेनार्चितेन यद्दत्तं तदिदानीमपहृतं तच्च
शोभनमेव कृतं शोभनत्वमेव व्यनक्ति मन्य इति यद्यस्मात् श्रीरेवात्ममोहनं तस्मादयं विभ्रंसितः इति यत्सोयमस्य महाननुग्रहः
वत्त्वया कृतः इति मन्ये यथा वै श्रीमदात्त्वपरयापाद्मपत्तानरहितो विनश्येदिति भावः १६ किं च यया श्रिया विद्वानपि यतः संपन्नोपि
मुह्येत् तल्लक्ष्मी मत्त्यो कः पुमानात्मनो गतिं स्वरूपं यथावद्विचष्टे पश्यति कथं इति शेषः न कथंचिदपि पश्यतीत्यर्थः तस्मै महोपक
र्त्रे जगतामीश्वराय सर्वसाक्षिणे नारायणाय तुभ्यं नमः केवलं नमस्कर्तुं शक्नुमः न त्वेवं कुर्वेवं न कुर्विति विधातुं शक्नुम इति भावः
वि० ६ १७ प्रल्हादस्याभिप्रेतमाह तत्तु हिरण्यगर्भस्समुवाचेत्याह मुनिः तस्येति कृतांजलेः प्रल्हादस्य शृण्वतः सतो भगवान् हिरण्य

491 प्र० द० उ० त्वयैव दत्तं पदमैन्द्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रंसितो यच्छ्रिय आत्ममो
हनात् १६ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो यथा तस्मै नमस्ते जगदीश्वराय वै नारायणा
याखिललोकसाक्षिणे १७ श्रु० उ० च तस्यानुशृण्वतो राजन्प्रल्हादस्य कृतांजलेः हिरण्यगर्भो भगवानुवाच
49 मधुसूदनं १८ बद्धं वीक्ष्य पतिं साध्वी तत्पत्नी भयविह्वला प्रांजलिः प्रणतोपेन्द्रं बभाषेऽवाङ्मुखी नृप १९
विंध्यावलिः क्रीडार्थमात्मन इदं त्रिजगत्कृतं ते स्वाम्यं तु तत्र कुधियोपर ईश कुर्युः कर्तुः प्रभोस्तव किमस्यत आ
वहंति त्यक्तह्रियस्त्वदवरोपितकर्तृवादाः २० समरामश
गर्भो मधुसूदनमुवाच किंचिद्विवक्तुमुद्यत इत्यर्थः

१८ तदेवं विंध्यावलिरपि किंचिद्विज्ञापयितुं प्रवृत्ता तां च सन्मानयन्नु हिरण्यगर्भः स्वयं तूष्णीमवस्थितो तस्या एव वचः प्रथममवतार
यति वक्तुमिति स्पष्टोर्थः १९ तदेवाह क्रीडार्थमिति ते त्वया स्वस्य क्रीडार्थं इदं कृत्स्नं जगत्कृतं सृष्टं तत्र त्वत्क्रीडोपकरणभूते तत्र
सृष्टजगत्यपि केचित्कुबुद्धयः स्वाम्यं स्वत्वबुद्धिं कुर्युः स्वे स्वत्वबुद्धिं कुर्वंति अत एव त्यक्ता ह्रीर्लज्जा यैस्ते तरात्मना त्वया
ऽवरोपिताः आरोपिताः कर्तृवादाः वयं स्वतंत्रा इति वादा येषां ते वादमात्रेणापि स्वस्वामित्वरहिता इत्यर्थः एवं विधास्ते कर्तुः स्रष्टुः प्रभोः
पालकस्यास्य ततः संहर्तुश्च तव किमावहंति किं समर्पयंति न किंचित्त्वमस्ति चेत्समर्पयेयुस्तदभावात्किं समर्पयंतीति भावः को हानिं कु
र्वंति न तव कदाचिदपि हानिरिति वार्थः अयं भावः लोकत्रयं मयार्पितं त्वदीयपादपद्मे हं समर्प्य प्रतिश्रुतम् ... ते करोमीति देहा
दिषु स्वाम्याविष्कारेण ब्रुवन्नयं कुबुद्धिर्निर्लज्जश्च त्वमेव सर्वस्य स्वाम्यतो मंदबुद्धिमेनं विमुच्य पालयेति अयमेव प्रल्हादस्याप्यभिप्रायः
॥ २० ॥

६६

मरणशीलस्य तु सः आत्मादिभिर्देहादिभिः किं न कमपि न कोऽपि पुरुषार्थः किंतु केवलमायुषो व्यय एवेति निश्चितवानिति प्रायः प्र-
मथा पुनः पितामह इत्यस्यान्वयाप्तेः यः अंततो जहाति देहिनं तेनात्मना देहेन किं इत्यन्वयः रिक्थहारैर्दायादैः स्वजन इत्याख्या
व्यवहारो येषां तैर्दस्युतुल्यैः स्वजनैरित्यर्थः संसृतेर्हेतुभूतया भार्यया किं ९ सोऽस्मत्पितामहो महान्महद्गुणः अगाधोऽगाधबोधोऽपरिमित-
ज्ञानसंपन्नः सत्तमो भागवतश्रेष्ठः प्रल्हादः संसारिजनसंसर्गाद्भीतः सन्स्वपक्षं दैत्यकुलं क्षपयतीति तथा तस्यापि भवतः नास्ति कुतोऽपि
भयं यस्मात्तत्पादपद्मं ध्रुवं नित्यपुरुषार्थरूपं प्रपेदे शरणं जगाम १० तथाहमपि दैवात्प्रसभं बलात्त्याजिता श्रीर्यस्य तादृशः आत्म-
नः मम रिपोस्तवांतिकं समीपं नीतस्त्वत्पादपद्मं प्रपद्य इति शेषः श्रियं येन विच्छिन्नष्टि यया श्रियाऽपहृतज्ञानः पुमान्कृतांतस्य सं-

किमात्मनानेन जहाति योंऽततः किं रिक्थहारैः स्वजनाख्यदस्युभिः किं जायया संसृतिहेतुभूतया मर्त्यस्य गेहैः किमिहायुषो व्य-
यः ९ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः पादपद्मं ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्त-
मः १० अथाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः इदं कृतांतांतिकवर्तिजीवितं ययाध्रुवं स्तब्धमति-
र्न बुध्यते ११ श्रीशुक उवाच तस्येत्थं भाषमाणस्य प्रल्हादो भगवत्प्रियः आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः १२ त- तां२
मिंद्रसेनः स्वपितामहं श्रिया विराजमानं नलिनायतेक्षणं प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत ॥
१३ तस्मै बलिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत् ननाम मूर्ध्नाश्रुविलोललोचनः सव्रीडनीचीनमुखो बभू-
व ह १४ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं उपेत्य भूमौ शिरसा महामना ननाम मूर्ध्ना पुलकाश्रुविक्लवः ॥

संनिधानवर्त्यपीदं जीवितमध्रुवमस्थिरं न बुध्यते न मन्यते ११ तस्य बलेरित्थं भाषमाणस्य सतः हे कुरुश्रेष्ठ उदितो राकाप-
तिश्चंद्र इव प्रकाशमानो भगवत्प्रियः प्रल्हादस्तत्राजगाम १२ तमागतं स्वपितामहं प्र[illegible]ल्हादं इंद्रसेनो बलिः सम्यगैक्षत अप-
श्यत् कृष्णे भक्तं श्रिया कांत्या विराजमानं कमलवदायते ईक्षणे यस्य प्रांशुं निर्मलमंजनत्विषं श्यामलं प्रलंबौ जानुलंबौ बा-
हू यस्य तं सुभगं सुंदरं १३ तस्मै प्रल्हादाय पूर्ववदर्घ्यादिपूर्वकमर्हणं न चकार तत्र हेतुर्वारुणैः पाशैर्बद्धः किंतु केवलं मूर्ध्ना नम- टी२
स्कृतवान् ततोऽश्रु[illegible]भिर्विलोले लोचने यस्य सव्रीडं नीचीनमधः कृतं मुखं यस्य तादृशो बभूव १४ ततः स महामनाः प्र-
ल्हादः सतां भागवतानां पतिं सुनंदादिभिः पार्षदैः सेव्यमानं तत्रोपविष्टं वामनं निरीक्ष्य पुलकैरश्रुभिश्च विक्लवः सन्नुपेत्य
शिरसा भूमौ नमस्कृते वानुवा[illegible]चेति शेषः १५

भा.प्र.वी.
६७

कथं तर्हि धनवादिभ्यः संपदो दत्तवानसीत्यत आह मा नो गर्वः स्तंभो नम्रता विवेको वा तयोर्निमित्तानां जन्मादीनां पूर्वं ग्रंथपरिगणितानां समंततः
सर्वश्रेयः प्रतिकूलानां सज्ञावे पीतिशेषः मत्परस्तु पुनर्मुह्यादित्यर्थः हंत हे वत्सन् २७ अस्य चेदानीं मत्परत्वादन्यैर्दुःप्रापमपि
दास्यामीति वक्तुं तस्य मोहाभावमनुगृह्णातीति एष बलिर्दानवानां चाधिपतिः कीर्तिवर्द्धनश्च अजेयां दुर्जयां मम मायामजैषीज्जि
येदित्यर्थः २८ कीर्तिवर्द्धनत्वमेव प्रपंचयति क्षीणरिक्थं धनं यस्य सोपि स्थानाच्च्युतोप्याधिपत्यात् क्षिप्तोप्यधिक्षिप्तोपि ब
द्धोपि ज्ञातिभिः परित्यक्तोपि यातनां प्रापितोपि २९ गुरुणा भर्त्सितोपि शप्तोपि सुव्रतः दृढसंकल्पः सत्यं न तत्याज तथा
मया छलैरेव धर्म उक्तः तथाप्ययं सत्यवाक् धर्मं न त्यजति ३० अस्य मोक्षप्रदानं संकल्पयति एष [illegible] इति अमरैरपि

50

मानस्तंभनिमित्तानां जन्मादीनां समंततः सर्वश्रेयः प्रतीपानां हंत मुह्येन्न मत्परः २७ एष दानवदैत्यानामग्रणीः
कीर्तिवर्द्धनः अजैषीदजयां मायां सीदन्नपि न मुह्यति २८ क्षीणरिक्थश्च्युतः स्थानात्क्षिप्तो बद्धश्च शत्रुभिः ॥
ज्ञातिभिश्च परित्यक्तो यातनामनुयापितः २९ गुरुणा भर्त्सितः शप्तो जहौ सत्यं न सुव्रतः छलैरुक्तो मया धर्मो
नायं त्यजति सत्यवाक् ३० एष मे प्रापितः स्थानं दुःप्रापममरैरपि सावर्णेरंतरस्यायं भवितेंद्रो मदाश्र
यः ३१ तावत्सुतलमध्यास्तां विश्वकर्मविनिर्मितं यन्नाधयो व्याधयश्च क्लमस्तंद्रा पराभवः नोपसर्गा नि ९९
वसतां संभवंति ममेक्षया ३२ इंद्रसेन महाराज याहि भो भद्रमस्तु ते सुतलं स्वर्गिभिः प्रार्थ्यं ज्ञातिभिः परिवारितः

प्राप्तुमशक्यं स्थानं मल्लोकं प्रापितः प्रापयिष्यते इत्यर्थः देहावसाने मुक्तो भविष्यतीति भावः जीवद्दशायां त्वधिपत्यं प्रै[illegible]नुगृह्णा तर
ति सावर्णेर्मनोरंतरस्य संबंधी इंद्रो यं बलिरहमेवाश्रयो यस्य स भविता भविष्यति सावर्णिमन्वंतरे य इंद्रो भविष्यतीत्यर्थः ३१ आधु
निकं सुतल[illegible]लोकाधिपत्यमनुगृह्णाति तावदधुना विश्वकर्मणा विनिर्मितं सुतलं लोकमध्यास्तां तत्राधिपतिर्भूत्वाधिवसे[illegible] वि
त्यर्थः सुतलं विशिनष्टि यत्सुतले निवसतामाध्यादयो मत्कृतरक्षणहेतुना न संभवंति तत्राधयो मनःपीडा व्या
धयो दैहिकाः क्लमः ग्लानिः तंद्राऽनवधानता पराभवः शीतोष्णादिभिरभिभवः उपसर्गोऽन्योप्युपद्रवः एवं बलिमुक्त्वा
बलिमुवाच हे इंद्रसेन महाराज ज्ञातिभिः परिवृतस्त्वं सुतलं स्वर्गिभिरपि प्रार्थ्यं लोकं याहि गच्छ तत्र तव भद्रमेव मेऽनुग्र
हादस्तु ३३ रामरामश राम राम रामराम श्री रामायनमः

इममेवाभिप्रायमाविःकर्तुं संबोधयन्नस्य माहवृत्रा हेभूतभावनभूतस्रष्टः भूतेशाभूतांतरात्मन्नंतरात्मतया पालकेत्यर्थः देवानांजग
त्संहर्तॄणांरुद्रादीनामपि देवजगद्गुरो हृतंसर्वस्वंस्मात्मेनं वलिंमुंचायं निग्रहं प्रतिनार्हति २१ निग्रहानर्हत्वमेवाह कृत्स्ने
ति अनेनैव वलिनाकृत्स्नाभूमिर्यच कर्मणा संपादिताइन्द्रादिलोकाः तेचैतेतत्सर्वं स्वं तथाऽविक्लवयाऽदीनया बुध्यात्मादेहस्य
तेतुभ्यं दत्ताःअतोयमनिग्रहार्हइतिभावः २२ एतदेवकैमुत्यन्यायेनाह यदिति अशठधीरमर्त्यवधीर्यस्य तवपादयोःसलिलेविधाया
र्घ्यं जलंसमर्प्य दूर्वांकुरैरपि पूजांविधायोत्तमांगतिमुपिभजते प्राप्नोति येनुवलिरविक्लवमनाःस्थिरचित्तःसन् त्रिलोकीं
दाश्चात्त दत्तवानतः कथमयमार्तिं प्राप्नुयात्तस्मादेनं विमुंचेत्यर्थः २३ एवंविज्ञापितो भगवानिममनुग्रहीतुमेवेत्यम
प्रालक्षितमित्याह यावदध्यायसमाप्तिः हेब्रह्मन्नहंतावदमनुगृह्णीतुमिच्छामितस्यवित्तमर्थं विधुनोम्यपहरामि तावदनर्थहेतु

श्लो च भूतभावनभूतेशदेवदेवजगन्मय मुंचैनंहृतसर्वस्वंनायमर्हति निग्रहं २१ कृत्स्नानेनचदत्ताभूर्लोकाःकर्म
र्जिताश्चये निवेदितंचसर्वस्वमात्माऽविक्लवयाधिया २२ यत्पादयोरशठधीःसलिलंप्रदायदूर्वांकुरैरपिविधाय सतींसपर्यां
अप्युत्तमांगतिमसौभजते त्रिलोकीं दाश्चानविक्लवमनाःकथमार्तिमृच्छेत् २३ भ वा ब्रह्मन्यमनुगृह्णामि तद्विशो वि
धुनोम्यहं यन्मदःपुरुषःस्तब्धोलोकंमांचावमन्यते २४ यदाकदाचिज्जीवात्मा संसरन्निजकर्मभिः नानायोनि
ष्वनीशोयंपौरुषींगतिमाव्रजेत् २५ जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः यद्यस्य नभवेत्स्तंभस्तत्रायं मदनुग्रहः २६

तु

र्थापहार एव प्रथमो मदनुग्रह इत्यर्थः अर्थस्यानर्थहेतुत्वमाह यन्मदः यस्यसंबंधि धनस्य मदोयस्य तादृशः अतएव स्तब्धो विवेक
रहितः अनम्रो वा पुरुषोलोकंमदंतरात्मकं जगन्मांतदंतर्यामिनं चावमन्यते तिरस्करोतीत्यर्थः २४ एवमवमानेनान्येऽप्यक नी२
र्मभिरिहलोकेनानायोनिषु संसरन् तिर्यक्स्थावरादिषु जन्मप्राप्नुवन्ननीशः निजकर्माधीनः तन्निस्तारं कर्तुमसम
र्थोयंजीवात्मा यदाकदाचित् यादृच्छिकसुकृतविशेषात्पौरुषींगतिं पुरुषजन्मप्राप्नुयात् २५ तत्रापिजन्मादिभि
र्यस्यपुरुषस्यस्तंभोमदः अनम्रता वानभवेत्तत्र तद्विषयेऽयंस्तंभाभाव एवमदनुग्रहो ज्ञेयः तत्रजन्मसत्कुलेकर्म
भगवत्परिचर्यादि वयोयौवनादि विद्याश्रौतस्मार्तादिःबुद्धिर्विवेकात्मिका धनंवित्तम् २६ रामायरामाय
श्रीमतेरामानुजायनमः रामाय रामरामरामराम रामराम रामराम रामरामराम रामराम ५ ५ ५ रा

तवानुग्रहं च त्वमेव लक्ष्मीरुद्रा अपि न लेभिरे ६ परे इन्द्रादयो न लेभिर इति किमु [illegible] वक्तव्यं एवं तत्प्रसादस्य दौ
र्लभ्यं क्वचिद्विषयविशेषे सौलभ्यं चोक्तं कुत एतद्विपरीतमित्यत आह यद्यस्मादसुराणां क्रूरस्वभावानामपि
नोस्माकं दुर्गपालः दुःखत्राता भवति अथ परत्वमाह विश्वाभिवंद्यैः सकलजगत्पूज्यै ब्रह्मादिभिरप्यभि
वंद्यावंघ्री यस्य सः त्वं असुराणां नो दुर्गपालोसीत्यनेन नास्मद्गुणदर्शनेनास्मासु तव प्रसादः प्रवृत्तः किंतु
केवलं कृपयैवेति सूचितं ६ तदेव स्फुटयन्नाह यदिति हे शरणद श्रेयःसाधनप्रदेत्यनेन स्वाहितमपि व
अ६ यं नार्थं [illegible] इति सूचितं ब्रह्मादयो यस्य तव पादपद्मयोर्यो मकरंदः तस्य सेवया विभूतिमैश्वर्यं स्वस्वाधि
व२ कारमश्नुते अनेन परत्वं स्पष्टीकृतं एवंभूतस्य तव दाक्षिण्यदृष्टिपदवीमनतिक्रमणीयतां हेतु कृपादृष्टिवि
षयतां कस्माद्धेतोर्वयं कुसृतयः कुमतयः खलयोनय उग्रजातयश्च प्रणीताः प्रापिताः केवलं कृपयैवेतिभावः

प्र ८ वा नेमं विरिंचो लभते प्रसादं न श्रीर्न शर्वः किमुतापरे ते यन्नोऽसुराणामसि दुर्गपालो विश्वाभिवंद्यैरभिवंदितां दि२
घ्रिः ६ यत्पादपद्ममकरंदनिषेवणेन ब्रह्मादयः शरणदाश्नुवते विभूतीः कस्माद्वयं कुसृतयः खलयोनयस्ते दा
क्षिण्यदृष्टिपदवीं भवतः प्रणीताः ७ चित्रं तवेहितमहोऽमितयोगमायालीलाविसृष्टभुवनस्य विशारदस्य
सर्वात्मनः समदृशोविषमस्स्वभावो भक्तप्रियो यदसि कल्पतरुस्वभावः ८ रामरामराम रामरामायनमः

51

पूर्वं विरंचादयोपीत्थं प्रसादं न लेभिरे इत्यनेन तत्सेवया विना तत्प्रसादविषयत्वमुक्तमत्र तु तत्सेवया तद्विषयत्वमित्यतो न वि
रोधः ७ एवं तर्हि प्राकृतवत्क्वचिदनुग्रहः क्वचिन्निग्रह इति विषमस्वभाव एवेति किं मां प्रभुं स्तौषि इत्यत आह चित्रमिति तवेहितं चे
ष्टितं निग्रहानुग्रहादिरूपं महो विचित्रं न तु कर्मवश्यप्राकृतेहितसजातीयमित्यर्थः वैचित्र्ये हेतुं वदन्न कर्मवश्य
तां व्यंजयति अमितेति अपरिमितशक्तियुक्तसंकल्पमात्रेण निमित्तेनोपासकसृष्टभुवनस्येत्यर्थः विशारद
स्य सर्वज्ञस्य उपयुक्तसार्वज्ञादिकल्याणगुणगणयुक्तस्य कृत्स्नचिदचिदंतरात्मनः अत एव समदृशः वैषम्यनैर्घृण्यादिरहितस्ये
वं तव भक्तप्रियो भवसीति यत्स्वमपि सम एव स्वभावः ननु विषमः तत्र दृष्टांतं वदन्विशिनष्टि कल्पतरोः स्वभाव इव स्वभा
वो यस्य स त्वमिति न हि कल्पतरोराश्रिताभीष्टप्रदानेन वैषम्यापादनं युक्तमिति भावः ८

तत्र वसंतं त्वां लोकेशा इन्द्रादयः नाभिभविष्यंति किमुतान्ये अपरे नाभिभविष्यंतीति ये च तत्र त्वदाज्ञामतिलंघिनो दैत्यास्तान् मम चक्रं सूद
यिष्यति हनिष्यति ३४ सर्वतोऽहं पश्चाद्भवे भवंतं त्वां सानुगं सोपकरणमहं रक्षिष्ये किंच हे वीर तत्र सुतले सदा संनिहितं त्वद्द्वारि वसंतं मां
मां भवान् द्रक्ष्यति ३५ किंच दैत्यानां संगाद्धेतोस्तव य आसुरो भावः स तत्र मत्प्रभावं दृष्ट्वा सद्यः कुंठः प्रतिहतो विनंक्ष्यति मदनु
भावाद्भवानासुरं भावं त्यक्ष्यतीत्यर्थः ३६ इ ष भा पुः २२ एवमनुगृहीतो बलिर्भगवंतमाहेत्याह मुनिः इतीत्यमु
क्तवंतं पुराणपुरुषं भगवंतं गद्गदया गिराब्रवीत् कथंभूतः भक्त्योत्फुल्ल उत्कंठः हर्षबाष्पबिंदुभिराकुले ईक्षणे यस्य सः अ
खिलानां साधूनां ... संमतः महाननुभावः उक्तो विधो यस्य सः १ तदेवाह अहो इति अहो त्वत्प्रणामस्य प्रभाव इत्या

न त्वामभिभविष्यंति लोकेशाः किमुतापरे त्वच्छासनातिगान् दैत्यांश्चक्रं मे सूदयिष्यति ३४ रक्षिष्ये सर्वतो
ऽहं त्वां सानुगं सपरिच्छदं सदा संनिहितं वीर तत्र मां द्रक्ष्यते भवान् ३५ तत्र दानवदैत्यानां संगात्ते भाव आसुरः दृष्ट्वा
मदनुभावं वै सद्यः कुंठो विनंक्ष्यति ३६ इ श्री भा म पु ए म धे विं ध्या : २२ श्रु उ व इत्युक्त
वंतं पुरुषं पुरातनं महानुभावोऽखिलसाधुसंमतः बद्धांजलिर्बाष्पकलाकुलेक्षणो भक्त्युत्कलो गद्गदया गिराब्रवीत्
१ ब रू च अहो प्रणामाय कृतः समुद्यमः प्रपन्नभक्तार्थविधौ समाहितः यल्लोकपालैस्त्वदनुग्रहोऽमरैरल
ब्धपूर्वोऽपसदेऽसुरेऽर्पितः २ श्रु उ व इत्युक्त्वा हरिमानम्य ब्रह्माणं सभवं ततः विवेश सुतलं प्रीतो बलिर्मुक्तः सहासुरैः
३ एवमिंद्राय भगवान्प्रत्यानीय त्रिविष्टपं पूरयित्वादितेः कामानशासत्सकलं जगत् ४ लब्धप्रसादं निर्मुक्तं पौत्रं वं
शधरं बलिं निशाम्य भक्तिप्रवणः प्रह्लाद इदमब्रवीत् ५ ६ प्रणामाय प्रणामार्थं कृतः समुद्यम एव प्रपन्नानां भ

क्तानां योऽर्थोऽभिमतस्तस्य विधौ संपादने समाहितोऽप्रमत्तः स्थितः कुतः यत् येनो धर्मेण लोकपालैरमरैः सत्त्वप्रधानैरप्यल
ब्धपूर्वस्त्वदनुग्रहोऽपसदे नीचेऽसुरेऽर्पितः २ इत्थं हरिमुक्त्वा प्रणम्य ततो ब्रह्माणं रुद्रं चानम्य मुक्तः पाशेभ्य इति
शेषः प्रीतो बलिरनुगैः सह सुतलं लोकं विवेश प्रविवेशेत्यर्थः ३ ततः स्वं बलेर्जितं त्रिविष्टपं भगवानिन्द्राय प्र
मीयत्र त्यों ... प्रददौ एवमदितेः काममिष्टं पूरयित्वा सकलं जगदशासदुपेन्द्रः सन् पालयामास ४ ततो लब्धो भगवत्प्रसा
देन तं पाशेभ्यो निर्मुक्तं पौत्रं वंशवर्द्धनं बलिं निशाम्य दृष्ट्वा प्रह्लादः भक्तितत्परो वक्ष्यमाणमुवाच ५ तदेवाह त्रिभिः अहो त
वेद दुर्लभानुग्रहस्यापि सोऽलभ्यं परत्वं चातितरसाधारणमिति विस्मयपूर्वकं विज्ञापयति नेति इदं मत्सदृशीषु यम

पद्यप्येवं नास्त्येव वैषम्यं तथापि हे भूमन् यद्वदतस्तवानुशासनं करिष्याम्येव यतो तस्तवाज्ञानुपालनमिति यदेतत्पुंसां परमं श्रेयः १७
इतीत्थं हरेराज्ञां प्रतिनंद्य भगवानुशना: शुक्रः बलेर्यज्ञस्य छिद्रं समाधत्त समादधे: १८ इत्यमुपवर्णितं भगव
तो वामनस्य चरित्रमुपसंहरति एवमिति हे राजन् यत्स्वरं रपहृतं तत्त्रिदिवमित्थं बलेः सकाशाद्याचित्वा वामनरूपो हरिर्भ्रा
त्रे महेन्द्राय ददौ १९ तदा प्रजापतिर्ब्रह्मा चतुर्मुखः देवैर्ऋषिभिः पितृभिर्मनुभिर्मनुसुतैर्दक्षादिभिश्च सह कश्यपस्यादि
तेश्च प्रीत्यै सर्वभूतानां भवाय योगक्षेमार्थं च लोकानां तत्पालकानां च पतिं वामनमकरोत् २० २१ वेदानां कल्पस

तथापि वदतो भूमन् करिष्याम्यनुशासनं एतच्छ्रेयः परं पुंसां यत्तवाज्ञानुपालनं १७ श्रु ३ च अभिनंद्य हरेराज्ञामु
शना भगवानिति यज्ञच्छिद्रं समाधत्त बलेर्विप्रर्षिभिः सह १८ एवं बलेर्महीं राजन् भिक्षित्वा वामनो हरिः ददौ भ्रा
त्रे महेन्द्राय त्रिदिवं यत्परैर्हृतं १९ मनुः प्रजापतिर्ब्रह्मा देवर्षिपितृभूमिपैः दक्षभृग्वंगिरोमुख्यैः कुमारेण भवे
न च २० कश्यपस्यादितेः प्रीत्यै सर्वभूतभवाय च लोकानां लोकपालानामकरोद्वामनं पतिं २१ वेदानां सर्वदे
वानां धर्मस्य यशसः श्रियः मंगलानां व्रतानां च कल्पं स्वर्गापवर्गयोः २२ उपेन्द्रं कल्पयांचक्रे पतिं सर्वविभूतये तदा सर्वा
णि भूतानि भृशं मुमुदिरे नृप २३ ततस्त्विंद्रः पुरस्कृत्य देवयानेन वामनं लोकपालैर्दिवं निन्ये ब्रह्मणा चानुमोदितः २४
प्राप्य त्रिभुवनं चेन्द्र उपेन्द्रभुजपालितः श्रिया परमया जुष्टो मुमुदे गतसाध्वसः २५ ब्रह्मा शर्वः कुमारश्च भृग्वा
द्या मुनयो नृप पितरः सर्वभूतानि सिद्धा वैमानिकाश्च ये २६ सुमहत्कर्म तद्विष्णोर्गायंतः परमाद्भुतं धिष्ण्यानि स्वा
नि ते जग्मुरदितिं च शशंसिरे २७ सर्वमेतन्मयाख्यातं भवतः कुरुनंदन उरुक्रमस्य चरितं श्रोतॄणामघमोचनं २८

मर्थं पालनमिति शेषः उपेन्द्रं सर्वभूतानां विभूतये कल्पयांचक्रे करोत् २२ तदा सर्वाणि भूतानि नितरां मुमुदिरे मुदं हर्षं इति धा
तुः २३ ततो ब्रह्मणानुमोदित इन्द्रो लोकपालैः सह वामनं भगवंतं देवयानेन दिवं प्रति निन्ये प्रापयामास २४ २५
ततो हि नृप सर्वे ब्रह्मादयो वैमानिकाभिमानाः कृताश्चानद्विष्णोर्वामनस्य सुमहदनितरसाधारणमतएव परमा
द्भुतं कर्म चरित्रं गायंतः स्वस्थानानि जग्मुः अदितिं च शशंसिरे तुष्टुवुश्च २६ २७ हे कुरुनंदन श्रोतॄणां अघाव
लां दुरितहरं सर्वमस्मद्बुद्धिगोचरं तदुरुक्रमस्य चरितं भवतो मयाख्यातमित्यभिप्रेते न तूरुक्रममहिम्नः परिछिन्न
त्वमित्यर्थः २८ यमायनमः राम

एवंविज्ञापितस्तंभगवानुवाच वत्सेति हे प्रल्हाद तव भद्रमस्तु सुतलाख्यं विलस्थानं प्रयाहि गच्छ
मोदमानः ज्ञातीनां हर्षं प्रापय ९ तत्र सुतले नित्यं सदा अवस्थितं सन्निहितं गदापाणिं यस्य तं मां द्रष्टासि तत्र स्वपौत्रेण वलिनासह
वर्त्मबंधः नित्यं मद्दर्शनेन यो महानाल्हादस्तेन ध्वस्तं कर्मरूपं बंधनं यस्य सः इति हेतुर्यस्य तादृशो द्रक्ष्यसि नित्यं द्रष्टासीति
विधां भगवत आज्ञां शिरसा बाढमित्याधायाभ्युपेत्य हे राजन्नमलप्रज्ञा महात्मपरमात्मयाथात्म्यविषया भविष्यसीति १० एवं
नावद्धांजलिः सन् ११ सर्वादिपुरुषं प्रदक्षिणीकृत्य प्रणतः कृतप्रणामः सर्वेषामसुराणां चमूनां सेनायाः यस्य स प्रल्हादो वलि
तेन भगवतानुज्ञातो महाविलं सुतलं विवेश १२ अथ तत्प्रवेशानंतरं हे राजन्भगवान्नारायणः समीपे सभायां अधिपतिर्भूत्वा
ऋत्विजामासीनमुपविष्टं उशनसं शुक्रमुवाच १३ तदेवाह हे ब्रह्मन् वितन्वतो यजमानस्य शिष्यस्य वलेः यत्तस्य छिद्रं कर्मसु वैष ब्रह्मवादिनां

म वा वा वत्सप्रल्हाद भद्रं ते प्रयाहि सुतलालयं मोदमानः स्वपौत्रेण ज्ञातीनां सुखमावह ९ नित्यं द्रष्टासि मां
तत्र गदापाणिमवस्थितं मद्दर्शनमहाल्हादध्वस्तकर्मनिबंधनः १० श्रु उ च आज्ञां भगवतो राजन्प्रल्हादो वलि
नासह बाढमित्यमलप्रज्ञो मूर्ध्न्याधाय कृतांजलिः ११ परिक्रम्यादिपुरुषं सर्वासुरचमूपतिः प्रणतस्तदनुज्ञातः
प्रविवेश महाविलं १२ अथाहोशनसं राजन् हरिर्नारायणोंतिके आसीनमृत्विजां मध्ये सदसि ब्रह्मवादिनां १३ ब्र
न् वा ब्रह्मन्संतनु शिष्यस्य कर्मछिद्रं वितन्वतः यत्तत्कर्मसु वैषम्यं ब्रह्मदृष्टं समं भवेत् १४ श्रु उ च कुतस्तत्कर्मवै
षम्यं यस्य कर्मेश्वरो भवान् यज्ञेशो यज्ञपुरुषः सर्वभावेन पूजितः १५ मंत्रतस्तंत्रतश्छिद्रं देशकालार्हवस्तुतः सर्वं करोति नि
श्छिद्रं नामसंकीर्तनं तव १६

मं वैगुण्यरूपं तद्ब्रह्मदृष्टं वेदवोधितं समं वैषम्यरहितमविगुणं यथा भवति तथा तनुकुरु १४
इत्युक्तः शुक्रस्तावत्प्रकृतकर्मणि वैगुण्यमेव नास्तीति विज्ञापयति कुत इति द्वाभ्यां तस्य वलेः कर्मणि वैगुण्यं कुतः
र्थः वैषम्याभावे हेतुमाह यस्य येन वलिना कर्तॄदिपष्ठी सर्वभावेन करणेन सर्वकर्मणामीश्वरः यज्ञेशः यज्ञपुरुषश्च
भवान्यतः पूजितो तेन वैषम्यमित्यर्थः कर्मेश्वर इति सर्वकर्मप्रवर्तकत्वमुक्तम् यज्ञेश्वर इति यज्ञफलप्रदत्वं
परपुरुषइति यज्ञशरीरकत्वं तद्व्रीकृतं चैतोनरुक्त १५ किंबहुना त्वन्नामकीर्तनमेव तद्द
वहमित्याह मंत्रादिभ्यो यच्छिद्रं मंत्राक्षराणां वैषम्यमित्यर्थः तत्सर्वं तव नामसंकीर्तनमेव निश्छिद्रं करोति १६ रामराम रामराम

इतीति विष्णुरातेन परीक्षितेत्युक्तः पृष्टो भगवान् बादरायणिः शुको विष्णोश्चरितं उवाच किं तद्यन्मत्स्यरूपेण कृतं ४ तदेवाहयाव
त्समाप्ति यदर्थमदधाद्रूपं इति विशेषतः पृष्टं मत्स्यावतारप्रयोजनं वक्ष्यंस्तावत्सर्वावतारसाधारणं प्रयोजनमाह गो इति ग
वां विप्राणां सुराणां साधूनां छंदसां वेदानां तदुदितधर्ममर्यादानां च रक्षामिच्छन् धर्मार्थादिपुरुषार्थचतुष्टयप्रदानार्थं
तनूर्मत्स्यादिमूर्तीरीश्वरो धत्ते बिभर्ति ५ यद्यप्येवं कृतं लोकजुगुप्सितं तमःप्रकृति दुर्मर्षमिति सावद्यत्वं तत्परिहरति उच्चेति
उच्चेष्वपकृष्टेषु च देवमनुष्यतिर्यगादिभूतेषु चरन् तत्सजातीयजन्मकर्मादिकं कुर्वन्नपि ईश्वर उच्चावचत्वं कर्मायत्तदे
वमनुष्यादिचारतम्येन भजते यथा वायुः सर्वत्र व्याप्नुवन्नपि न व्याप्यगतधर्मैः स्पृश्यते तद्वत् तत्र हेतुं वदन्विशिनष्टि धियईश्व
रो गुणैर्निर्गुणत्वात्सत्वादिप्राकृतगुणरहितत्वाद्धि नोच्चावचत्वं भजत इति न [illegible] त दर्शित एव धियो वादि विदेवे मुवापुनः सत्वं

सू॰ ३ च इत्युक्तो विष्णुरातेन भगवान् बादरायणिः उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं ४ श्रीशुक उवा
गोविप्रसुरसाधूनां छंदसामपि चेश्वरः रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थस्य चैव हि ५ उच्चावचे
53 षु भूतेषु चरन्वायुरिवेश्वरः नोच्चावचत्वं भजते निर्गुणत्वाद्धियो गुणैः ६ आसीदतीत
कल्पांते ब्राह्मो नैमित्तिको लयः समुद्रोपप्लुतास्तत्र लोका भूरादयो नृप ७ रामाय नमः

प्रकृतिजैर्मुक्तं यदेभिः स्वाश्रिभिर्गुणैरित्युक्तरीत्या कर्ममूलकसत्वादिगुणत्रयसंबंधनिमित्तदेवमनुष्याद्युच्चाव
चत्वं सर्वजीवसाधारणं भगवतस्तु गवादिरक्षार्थं स्वेच्छोपात्तोप्राकृतदेवमनुष्यादिसजातीयदिव्यतनोः स्व
स्वभावमजहतः कर्मायत्तदेहसंबंधनत्प्रयुक्तावद्यत्वं नास्तीत्यर्थः यथाधिप इति छेदः धीयादेन प्रकृतिलिंग्यते तदु
२५ णैः सत्वादिभिर्हेतुभूतैरुच्चावचत्वं भजते कुतः निर्गुणत्वात्सत्वादिप्राकृतगुणरहितत्वात् निर्गुणत्वादित्यनेन जीववत्स
त्वादिगुणपारवश्यं निषिद्धं न तु गुणाश्रयत्वमपि तथा सति प्रधानक्षेत्रज्ञपतिर्गुणेश इति श्रुतेः ईश्वर एव विरोधापत्तेः
६ एवं सामान्यतोवतारप्रयोजनं तद्यथात्म्यं चाभिधाय विशेषतो मत्स्यावतारप्रयोजनमवतारकालं चाह आसीदिति
त्रिभिः अतीतस्यातिक्रांतस्य कल्पस्यांते अवसाने ब्राह्मो नाम नैमित्तिको लय आसीत् ब्रह्मणो निद्राख्याभावो ब्राह्मः तेन निमित्ते
न जातो नैमित्तिकः तत्र तदा प्रलयकाले भूरादयः त्रयो लोकाः समुद्रे उपप्लुता निमग्ना आसन् ७

तदेवं संज्ञयितुं तन्महिम्नो नवच्छिन्नत्वमाह पारमिति यो मर्त्यः पुमानुरुक्रमस्य महिम्नः पारमवधिं गणनो भवति समर्थः पार्थिवान्यस्मा
निरजांसि विममे गणयेत् यथा पार्थिवानां रजसां गणना कर्तुमशक्या तथोरुक्रमस्य गुणानामपीत्यर्थः पार्थिवानि रजांसि वा बुद्धि
मान्महता कालेन गणयेत्तन्न तु रुक्रमस्य गुणानिति वार्थः तथा च श्रूयते विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसीति त
३० प्रकृतावतारचरित्रश्रवणादिफलमाह यः कश्चिदेतदद्भुतकर्मणो देवानां ब्रह्मादीनामपि देवस्य वामनस्यावतारानुचरितं स एव न
परां गतिमुपारूपां याति प्राप्नोति ३१ यत्र यत्र देवमनुष्यपित्रादिसंबंधिनि क्रियमाणे कर्मणीदमवतारानुचरितं कीर्त्यते तेषां संबंधिकर्मसु

पारं महिम्न उरुविक्रमतो गृणानो यः पार्थिवान्यपि कविर्विममे रजांसि यो जायमान उत जात उपैति मर्त्य इत्याह मंत्रदृगृषिः पुरुषस्य
स्य ३० य इदं देवदेवस्य हरेरद्भुतकर्मणः अवतारानुचरितं शृण्वन्याति परां गतिं ३१ क्रियमाणे कर्मणीदं दैवे पित्र्येऽथ मानुषे यत्र
यत्रानुकीर्त्यते तत्तेषां सुकृतं विदुः ३२ इति श्रीभागवते महापुराणे अष्टमस्कंधे त्रयोविंशोऽध्यायः २३ राजोवाच भगवन् श्रोतुमिच्छामि हरेरद्भुतकर्मणः
णः अवतारकथामाद्यां मायामत्स्यविडंबनं १ यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं तमः प्रकृतिदुर्मर्षं कर्मग्रस्त
इवेश्वरः २ एतन्नो भगवन् सर्वं यथावद्वक्तुमर्हसि उत्तमश्लोकचरितं सर्वलोकसुखावहम् ३ रामाय नमः

कृतेषु सुकृतिगुणं यथा भवति तथा कृतं विदुस्तज्ज्ञा इति शेषः श्रोतस्मार्तकर्मकाङ्गुण्यापादकं एतच्चरित्रमित्यर्थः ३२ इति श्रीभा
गः २३ तदेवं कृतवामनावतारचरित्रोऽवतारप्रसंगान्मात्स्यमप्यवतारं शुश्रूषुः परीक्षिद्राजा भगवंतं निमित्रिभिः हे भ
गवन्मुने अद्भुतकर्मणो हरेराद्यामवतारकथां श्रोतुमिच्छामि कथंभूतां मायामत्स्यविडंबनाम अद्भुतमत्स्यसजातीयचेष्टा
नुकारो यस्यां प्रतिपाद्यस्तां कथां या आद्यत्वं तदवतारप्राधान्यप्रयुक्तमित्येवं गंतव्यं १ स्वयमीश्वरोऽपि कर्मग्रस्तः क
कर्मवश्यइव जीववत्तमः स्वभावदुर्मर्षं क्रोध्यत एव लोके जुगुप्सितं निंदितं मात्स्यं रूपं यदर्थं यस्मै प्रयोजनायाधात् धृतवान्
२ हे राजन् हे भगवन्मुने एतत्प्रयोजनं सर्वं मत्स्यावतारचरित्रं यथावद्वक्तुमर्हसि श्रोतव्यत्ववक्तव्ययोर्हेतुं वदन्नारि
त्रे विशिनष्टि सर्वेषां लोकानां सुखं एव तावद्दत्तां चमत्कारमुखं हे नीति तथा तत् ३ इत्थमापृष्टमत्स्यावतारचरित्रो भग
वान् बादरायणिर्यथावद्दर्शयामास इत्याह सूतः ॥ रामायनमः रामराम

ततस्तस्याः शफर्या दीनतरमुक्तं वाक्यमाकर्ण्य स महीपतिः सत्यव्रतः दयालुरेनां शफरीं कलशाप्सु कमंडलुजले निधाय स्वा
श्रमं प्रति निन्ये प्रापयामास १६ ततः सा शफरी तत्र कमंडलावेकरात्रेण वर्द्धमाना सती कमंडलोरात्मना पूर्णत्वादलब्धस्थाल
न अवकाशो यया सा च महीपतिं सत्यव्रतं प्रतीदं वक्ष्यमाणमुवाच १७ तदेवाहनेति अस्मिन्कमंडलावहं संकटं यथा भवति
तथा वस्तुं वासं कर्तुं नोत्सहे ततः सुविपुलमोकः स्थानं कल्पय त्वं अहं सुखेन निवसामि ताहशमोकः कल्पयेत्यर्थः १८ एवमुक्तः
सत्यव्रतः कमंडलोरेनां शफरीमादाय औदंचनोदके विपुलकटाहोदके अधात्निहितवान् तत्रौदंचनोदके क्षिप्ता सा शफरी मु
हूर्तेन कालेन हस्तत्रयमवर्द्धत १९ सा वर्द्धमाना पुनरप्याह हे राजन्मे मम सुखं वस्तुं एतदुदंचनं नालं पर्याप्तं ततो मह्यं पृथु

तस्या दीनतरं वाक्यमाश्रुत्य स महीपतिः कलशाप्सु निधायैनां दयालुर्निन्य आश्रमं १६ सा तु तत्रैकरात्रेण वर्द्धमाना
कमंडलौ अलब्ध्वात्मावकाशं वा इदमाह महीपतिं १७ नाहं कमंडलावस्मिन्कृच्छ्रं वस्तुमिहोत्सहे कल्पयौकः सुविपु
लं यत्राहं निवसे सुखं १८ स एनां तत आदाय न्यधादौदंचनोदके तत्र क्षिप्ता मुहूर्त्तेन हस्तत्रयमवर्द्धत १९
54 न म एतदलं राजन्सुखं वस्तुमुदंचनं पृथु देहि पदं मह्यं यत्त्वाहं शरणं गता २० तत आदाय सा राज्ञा क्षिप्ता राजन्
सरोवरे तदावृत्यात्मना सोऽयं महामीनोन्ववर्द्धत २१ मी. ठ. च. नैतन्मे स्वस्तये राजन्नुदकं सलिलौकसः विधेहि र
क्षायोगेन हृदमामविदासिनि २२ श्रु. उ. चे. इत्युक्तः सोनयन्मत्स्यं तत्र तत्राविदासिनि जलाशयेऽसंमितं तं समुद्रे
प्राक्षिपज्झषं २३ क्षिप्यमाणस्तमाहेदमिह मां मकरादयः अदन्त्यतिबला वीर मां नेहोत्स्रष्टुमर्हसि २४

विपुलं पदं स्थानं देहि कल्पय यतः त्वामहं शरणं गता २० इत्युक्तेन सत्यव्रतेन तत उदंचनादादाय सरोवरे क्षिप्ता सती हे राज
न् तत्सरोवरमावृत्य कृत्स्नमभिव्याप्य महामीनरूपेणान्ववर्द्धत २१ तथा वर्द्धमान उवाच हे राजन्सलिलमेवौकः स्था
नं यस्य तस्य मम स्वस्तये सुखाय सुखं वस्तुमेतत्सारसं जलं नालं सलिलौकसः सरसः संबंध्येतदुदकं मम स्वस्तये न भवती
ति वान्वयः अतो योगेनोपायेन अविदासिन्यनुपक्षये जले महाहृदे रक्षां विधेहीति २२ इत्युक्तः सत्यव्रतः तं मत्स्यमुत्त
रोत्तरविपुले तत्तज्जलाशये नयत्पुनस्तत्तज्जलाशयेन असंमितं मत्स्यं समुद्रे प्राक्षिपत् २३ समुद्रे च क्षिप्यमाणो झषः तं स
त्यव्रतमिदमाह हे वीर इह समुद्रे मकरादयोऽतिबला जलचरा मामदंति अत्स्यंति अतो मामिह समुद्रे त्वं त्यक्तुं नार्हसीति २४

कालेनदिनावसानरूपकालेननिमित्तेनागतनिद्रस्य संप्राप्तनिद्रस्यात एव शिशयिषोर्धातुर्ब्रह्मणो मुखान्निःसृतान् गलितान्वेदानं
तिके समीपवर्ती हयग्रीवाख्यो दानवेन्द्रोऽपहृतवान् अंतिके निःसृतानिति वा संबंधः ८ तत्तद्दानवश्रेष्ठस्य हयग्रीवस्य चेष्टितं
ज्ञात्वेश्वरो भगवान् शाफरीरूपं दधार मात्स्यरूपेणावतीर्ण इत्यर्थः ९ एवं सामान्यतो विशेषतश्चावतारप्रयोजनमभिधायाथ
व्रतस्य प्रकारं सकुमितिहासं प्रस्तौति तत्रेति तस्मिन्नेवातीते कल्पे कश्चित्सत्यव्रताख्यो राजर्षिर्महान् क्रोधाद्यात्मगुणयुक्तः
नारायणः परः प्राप्यो यस्य तादृशो बभूव सच सलिलमेवाशनं यस्य तादृशस्तपोऽतप्यच्चचार १० सत्यव्रतं विशिनष्टि
योऽतीतकल्पे सत्यव्रताख्यो राजर्षिः स एवास्मिन्महाकल्पे विवस्वतस्तनयः श्राद्धदेव इति प्रसिद्धः मनुत्वे मनोरधिकारत्वे हरिणा

कालेनागतनिद्रस्य धातुः शिशयिषोर्बली मुखतो निःसृतान्वेदान् हयग्रीवोऽन्तिकेऽहरत् ८ ज्ञात्वा तद्दानवेन्द्रस्य हयग्री
वस्य चेष्टितं दधार शाफरीरूपं भगवान्हरिरीश्वरः ९ तत्र राजऋषिः कश्चिन्नाम्ना सत्यव्रतो महान् नारायणपरोऽतप्य
त्तपः स सलिलाशनः १० योऽसावस्मिन्महाकल्पे तनयः स विवस्वतः श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः ११ एक
दा कृतमालायां कुर्वतो जलतर्पणं तस्यांजल्युदके काचिच्छफर्येकाभ्यपद्यत १२ सत्यव्रतोंऽजलिगतां सह तोयेन भा
रत उत्ससर्ज नदीतोये शाफरीं द्रविडेश्वरः १३ तमाह सातिकरुणं महाकारुणिकं नृपं यादोभ्यो ज्ञातिघातिभ्यो दीनां
मां दीनवत्सल कथं विसृजसे राजन्भीतामस्मिन्सरिज्जले १४ तमात्मनोऽनुग्रहार्थं प्रीत्या मत्स्यवपुर्धरं अजानन्रक्षणार्थाय शफर्याः स
मनो दधे १५

भगवताऽर्पितः निहितः मनुः कारित इत्यर्थः ११ एकदा कृतमालायां नद्यां जलतर्पणं कुर्वतस्तस्य सत्यव्रतस्यांजल्युदके का
चिदेकाऽसहाया शफरी अभ्यपद्यत आगता दृष्टप्राप्तवती स्त्रीत्वमविवक्षितं इत्युक्तः सोऽनयन्मत्स्यं समुद्रे प्राक्षिपत्तं च क्षिप्य
माणस्तमाहेत्यादिषु पुंस्त्वनिर्देशात् अस्य बहुलमुपलभ्यमानत्वात् १२ तन्नो हे भारत द्रविडदेशाधिपः सत्यव्रतः तां शा
फरीमंजलिगतां तोये नांजलिस्थेन सह नदीतोये उत्ससर्ज १३ तं सकरुणं तं महाकारुणिकं नृपं सत्यव्रतं सा शफरी करुणं
यथाभवति तथोवाच तदेवाह यादोभ्य इति हे राजन् ज्ञातीन् स्वान् घातयन्तीति तथा तेभ्यः ज्ञातयश्च ते घातिनश्च तेभ्य इति वा
यादोभ्यो जलचरेभ्यो भीतामत एव दीनां मां हे दीनवत्सल कथमस्मिन् सरिज्जले बहुजलचराक्रान्ते विसृजसे त्यजसि १४ इत्येवमुक्तः
स राजा आत्मनः स्वस्यानुग्रहार्थं प्रीत्या मत्स्यमूर्तिं बिभ्राणं साक्षाद्भगवंतमजानन् शाफरीरक्षणार्थे मनो दधे १५

नेति हे अरविंदाक्ष तव पादोपसर्पणं श्रीपादारविंदभजनं पृथगात्मनाम् असतामल्पकस्य तत्रात्माभिमानिनां सतां इतरेषां पादोपसर्पणमिव
नमस्याभावार्थैर्भवेत् अपैव्यर्थे हेतुवदविघ्नं नच्छि सर्वेषां सुहृदः प्रियस्यांतरात्मनश्च एतद्विपरीतत्वादितरेषां पादोपसर्पणंम
पेतिभावः यस्माद्यदिदमद्भुतं मात्स्यं वपुर्नोऽस्माकं भजतामदीदृशः दर्शितवान् ३० इतीत्थं भाषमाणं सत्यव्रतं प्रति मत्स्यवपु
र्जगदीश्वरो भगवांश्चिकीर्षितमब्रवीत् कथंभूतः प्रलयार्णवे विहर्तुकामः विहारप्रयोजनं दर्शयन् विघ्नं नच्छि एकांतजनप्रि
टी॰१ यः भक्तजनप्रियः प्रभुश्च भक्तजनानां प्रीतिं कर्तुमर्णवे इति भावः ३१ एवं पृष्टावतारप्रयोजनविशेषो मत्स्यमूर्तिर्भ
गवांस्तत्प्रयोजनविशेषमाह सप्तमइति नवभि [illegible] हे ऽरिंदम अद्यतनादस्मादारभ्य सप्तमेऽहनि इदं भूर्भुवादिकं त्रैलो

न तेऽरविंदाक्ष पदोपसर्पणं मृषा भवेत् सर्वसुहृत्प्रियात्मनः यथेतरेषां पृथगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः
३० श्रीशुक उवाच इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये विहर्तुकामः प्रलयार्णवेऽब्रवीच्चिकीर्षु
रेकांतजनप्रियः प्रियं ३१ श्रीभगवानुवाच सप्तमेऽद्यतनादूर्ध्वमहन्येतदरिंदम निमंक्ष्यत्यप्ययांभोधौ त्रैलोक्यं भू
र्भुवादिकं ३२ त्रिलोक्यां लीयमानायां संवर्ताम्भसि वै तदा उपस्थास्यति नौः काचिद्विशाला त्वां मयेरिता
३३ त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः ३४ आरुह्य बृहतीं
नावं विचरिष्यस्यविक्लवः एकार्णवे निरालोके ऋषीणामेव वर्चसा ३५ दोधूयमानां तां नावं समीरेण ब
लीयसा उपस्थितस्य मे शृंगे निबध्नीहि महाहिना ३६ अहं त्वामृषिभिः साकं सहनावमुदन्वति वि
कर्षन् विचरिष्यामि यावद्ब्राह्मी निशा प्रभो ३७

अप्ययांभोधौ प्रलयोदधौ निमंक्ष्यति मग्नं भविष्यति
३२ संवर्ताम्भसि प्रलयोदके त्रिलोक्यां लीयमानायां सत्यां तदा क्वचिन्मयैव प्रेरिता विपुला नौका त्वामुपस्थास्यति
श्री॰२ त्वत्समीपं यास्यतीत्यर्थः ३३ तदा त्वं सर्वा ओषधीः बीजानि च नानाविधानि आरोप्येति शेषः सप्तर्षिभिः सहितः सर्वैः सत्त्वैरु
पबृंहितः मिलितः ३४ विपुलां नावमारुह्य विक्लवः दैन्यरहितः विचरिष्यति निरालोके सूर्याद्यालोकरहिते एकार्णवे ऋ
षीणां वर्चसैवोपलक्षिता ३५ प्रचंडेन समीरेण प्रलयवायुना दोधूयमानां नितरां कंपयंतीं नावमुपस्थितस्य संनिहितस्य मम
शृंगे वासुकिना सर्पेण उपस्थितेन इति शेषः तेन साधनेन निबध्नीहि ३६ तदाहमुदन्वति प्रलयार्णवे ऋषिभिः सहितो नावं विक
र्षन् यावद्ब्रह्मणश्चतुर्मुखस्य या ब्राह्मी रात्रिस्तावद्विचरिष्यामि ३७

टी॰५ मि॰१

इत्येवं वल्गुभारतीं सुंदरवाचं वदता तेन मत्स्यरूपिणा भगवता विमोहितः सत्यव्रतस्तं मत्स्यमाह कोभवानित्यादिना इति
ब्रुवाणमित्यतः प्राक्तनेन ग्रंथेन अस्मान्मत्स्यरूपेण मोहयन् भवान्क इति प्रश्नः २५ कश्चिन्मत्स्यविशेष एवाहमिति चेन्ने
त्याह नेति एवंविधप्रभाववान्कश्चिदपि जलचरोस्माभिर्न दृष्टः नापि श्रुतश्च एवंवीर्य इत्युक्तं वीर्यं दर्शयन् विशिनष्टि य
इति यः भवान् अन्हा कालेन योजनशतमभिव्याप्तवान् २६ अतस्त्वं न केवलं मत्स्यः किं त्वमरो देवः तत्रापि न ब्र
ह्मादिष्वमरेषु कश्चिदपि तु साक्षादव्ययः निर्विकारो भगवान्हरिर्नारायणस्त्वं नूनं निश्चितमेतदित्यर्थः तर्हि नारायण
स्य मम नैवंविध आकारः किंतु चतुर्भुजाद्याकार इत्यत आह अनुग्रहायेति भूतानामनुग्रहाय देवमनुष्यादिभूतान्मनुग्र
हीतुं जलौकसां मत्स्यानां रूपं धत्से मात्स्यं रूपं बिभर्षीत्यर्थः २७ कोसौ नारायण इत्यपेक्षायां तल्लक्षयन्नमस्करोति नमइ
ति हे पुरुषोत्तम हे जगदुत्पत्तिस्थितिलयकारणभूत हे विभो भक्तानां प्रपन्नानां चास्माकं मुख्यः नायकोंतरात्मा गतिश्च

एवं विमोहितस्तेन वदता वल्गुभारतीं तमाह को भवानस्मान्मत्स्यरूपेण मोहयन् २५ नैवंवीर्यो जलचरो दृष्टोस्माभिः श्रुतोपि वा
यो भवान्योजनशतमन्हाभिव्यानशे सरः २६ नूनं त्वं भगवान्साक्षाद्धरिर्नारायणोव्ययः अनुग्रहाय भूतानां धत्से रूपं जलौक
सां २७ नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मगतिर्विभो २८ सर्वे लीलावतारास्ते भू
तानां भूतिहेतवः ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतम्

आत्मोपायभूतः स तत्र पर्येति स उत्तमः पुरुषः यतो वा इमानि भूतानि जायंते स कारणं कारणाधिपः कस्मात्र निरिषन्नंतः प्रविष्टः शास्ता जनानां
सर्वात्मा अमृतस्यैव सेतुः नित्यं विभुं सर्वगतं सुसूक्ष्मं इत्यादि वेदांतवेद्योखिलजगदुदयलील आत्मेश्वरः सर्वांतरः सिद्धोपायभूतः
पुरुषोत्तमो यः स नारायणः स एवाधुना मत्स्यरूपेणावतीर्णः इति भावः एवंभूताय ते तुभ्यं नमः भक्तानां प्रपन्नानां इति सुपक्व
तभक्तियोगनिष्ठानां इत्युक्तं २८ अनितरसाधारणप्रभावेन त्वं नारायण एवेति निश्चितो मितथ्यावतारा अपि सर्वे लोकहिता
र्था एवेति एवमेव किं त्वेतदवतारप्रयोजनं विशेषतो ज्ञातुमिच्छामीत्याह सर्व इति तव सर्वे लीलयोपात्ता अवताराः ली का५
लापदेनावताराणाम कर्ममूलत्वमुक्तं भूतानां देवादीनां भूतिर्विभवस्तद्धेतव इति सामान्यतोवतारप्रयोजनं जानाम्येवेति
भावः किंतु यदर्थं यत्प्रयोजनविशेषायादः एतन्मात्स्यं रूपं भवता धृतं तत्प्रयोजनं ज्ञातुमिच्छामि २९ अनीश्वर
भजनवत्सद्भजनं न मुधेति दर्शयिष्यंस्तु मात्स्यं प्रदर्शितं भवतेति जानामीत्यभिप्रायेणाह रामाय नमः

एवं राजानं सत्यव्रतमात्माप्यहरिमत्स्यरूपस्तत्रैवांतर्हितवान् ततः सत्यव्रतो यं कालं हृषीकेशो मत्स्यमूर्तिरादिष्टवान् सप्तमेघ ततनादूर्ध्वं
सप्तमे तद्दिने मेति निर्दिष्टवांस्तं देवकालं प्रतीक्षितवान् ३९ राजर्षिः सत्यव्रतः दर्भान् प्रागग्रानास्तीर्य तेषु प्रागुदङ्मुखः ईशा
न्याभिमुखः निषसाद उपविष्टवान् कथंभूतः मत्स्यरूपिणो हरेर्भगवतः पादौ चिंतयन् ४० ततस्तत्रैव सत्यव्रते चिंतयति वर्ष
द्भिर्महामेघैर्वर्द्धमानः समुद्रः उद्वेलः मर्यादातिगः सर्वतो महीं प्लावयन् समदृश्यत सत्यव्रतेनेति शेषः ४१ ततः सत्यव्रतः भगवतो
मत्स्यरूपिणः आदेशं ध्यायन् संनिहितां नावं दृष्टवान् ततो ओषधीवीरुधः बीजानि चादाय विप्रेन्द्रैः सप्तर्षिभिः सह तां नावमा
रुरोह ४२ ततस्तं सत्यव्रतं मुनयः सप्तर्षय ऊचुः हे राजन् केशवं ध्यायस्व स केशवः नोऽस्मान् अस्मात्संकटाद्रक्षिष्यति शं सुखं विधा
स्यति करिष्यतीति ४३ एवमुक्तेन राज्ञा सत्यव्रतेनानुध्यातो भगवान् प्रादुर्बभूव कथंभूतः एकशृंगधर नीति तथा हैमः स्वर्ण

इत्यमादिश्य राजानं हरिरंतरधीयत सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत् ३९ आस्तीर्य दर्भान् प्राक्कूला
न् राजर्षिः प्रागुदङ्मुखः। निषसाद हरेः पादौ चिंतयन् मत्स्यरूपिणः ४० ततः समुद्र उद्वेलः सर्वतः प्लावय
न् महीं वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत ४१ ध्यायन् भगवदादेशं ददृशे नावमागतां तामारुरोह वि
प्रेंद्रैरादायौषधिवीरुधः ४२ तमूचुर्मुनयः प्रीता राजन् ध्यायस्व केशवं स वै नः संकटादस्मादविता शं वि
धास्यति ४३ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे एकशृंगधरो मत्स्यो हैमो नियुतयोजनः ४४ निबध्य नावं तच्छृं
गे यथोक्तो हरिणा पुरा वरत्रेणाहिना तुष्टस्तुष्टाव

मः नियुतयोजनः लक्षयोजनपरिमितकायः ४४ ततो हरिणा पूर्वं यथोक्तः तथैव वरत्रेण डोरकरूपेणाहिना महासर्पेण वासु
किना नावं तस्य मत्स्यरूपिणो भगवतः शृंगे निबध्य स्खलितां कृत्वेत्यर्थः संतुष्टचित्तो मधुसूदनं हरिं तुष्टाव स्तुतिं च १८
कारेत्यर्थः ४५ स्तोत्रमेवाह अनाद्यविद्येत्यादिना इत्युक्तेवं त इत्यतः प्राक्तनेन ग्रंथेन वेदस्य स्तुतत्वेन मे संप्रश्नैर्वि
पं४ व्रते हृदि स्थिते भगवते व प्रश्नाः पूर्वं संचोदितः सत्यव्रतः तावत्तत्त्वजिज्ञासुरनादिदेहात्मभ्रांतिस्वतंत्रात्मभ्रांतिरूपात्मा
नमूलकर्मवासनाभिः संसरतां जीवानां ईश्वरस्य च सोऽहं यद्दृच्छासुकृते तथाविलोः कटाक्षः इत्युक्तरीत्यैव संप्रश्न
मोपकर्त भगवत्कृपया एव सदाचार्यं सेवं योनान्यस्य स्ववोधयितुं तत्कृपयैव परमगुरोस्तव प्रीत्यैव संसारनिर्वृत्तिर्भवतीत्या
ह अनाद्यविद्योपहतात्मसंविद इति अनाद्यविद्यया निरूढेनाज्ञानेन उपहृता तिरोहिता आत्मसंविदात्मपरमात्मया

॥२॥३॥३॥ परब्रह्मेति शब्दितं परब्रह्मशब्दाभिहितम् । दीयं महिमानं चवेत्स्यसि महिम्नः ब्रह्मशब्दवाच्यत्वं तस्य ब्रह्मशब्दस्य प्रवृत्तिनिमित्तमन्य
त्वेन निरतिशयबृहत्त्वं हि ब्रह्मशब्दार्थः कथंभूतं मयानुगृहीतं मयोपदिष्टमित्यर्थः संप्रश्नैस्त्वत्कृतैर्हृदि विवृतं अत्र केचिद्व्याचक्षते अत्रोक्तः प्रलयः किं
महाप्रलयः उत दैनंदिनो वेति तत्र तावद्बहुललोकलय इति योसावस्मिन्महाकल्प इति चोक्तो महाप्रलय इति नावभासं नेति ब्रूमः महाप्रलये
पृथिव्यादीनामवशेषासंभवात् यावद्ब्राह्मी निशेत्याद्युक्तविरोधाच्चान्तो दैनंदिन इति युक्तं न चैतदपि संगच्छते सांवर्तकैरनाक्रम्यादि
भिर्विनाऽकस्मादेव सप्तमेऽहनि त्रैलोक्यं निमङ्क्ष्यतीति मत्स्योक्तेरनुपपत्तेः यच्चोक्तं प्रथमस्कन्धे रूपं स जगृहे मात्स्यं चाक्षुषान्तरसं
प्लवे नाव्यारोप्येति सप्तमो मनुर्वैवस्वत इत्यपि दुर्घटं स्यात् एवं तावदोषधीः सर्वा इत्यादिनिर्दिष्टोऽपि संगच्छते नहि तदा ओषध्या
ग दीनां सत्त्वानां चावशेषः संभवति तस्मादन्यथास्मिन्नेव वैवस्वतमन्वन्तरे मार्कण्डेयाय दर्शितवांस्तदपेक्षयैव च महाकल्पेऽस्मिन्नि नर्ष
निविशेषणं गच्छते तथा समुद्र उद्वेलः सर्वतः समदृश्यतेति तस्यैव तथा प्रदर्शनं इत्येवमादिरिति अत्रेदं वक्तव्यं यदि वै राजजनन हरे
ह्यराज्ञानोपदेशार्थमाविर्भूतो भगवान्वेदार्थं सत्यव्रताय कस्मात्प्रलयदर्शनं तर्हि सीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लय इत्या
दैः कालेनागतनिद्रस्य धातुः शिशयिषोर्मुखान्निःसृतान्वेदानिशादेश्यावतारकाले प्रदर्शनं परस्यावतारप्रयोजनस्योपक्रमे यस्या

मदीयं महिमानं च परब्रह्मेति शब्दितम् । वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि ३८

ती२ सांतत्यापत्तेः तत्र कालेनागतनिद्रस्य धातुः शिशयिषोरिति स्वरसतः स्वव्यक्तं दैनंदिनमेव लयावगमात् सत्यव्रतस्यैव प्रलयप्रदर्शने हयग्री
वासुरेण वेदापहरणस्य कथनानुपपत्तेश्च तत्र राजर्षिः कश्चिदित्यादिनातीतकल्पे सत्यव्रतस्य सतः पुनस्तस्मिन्कल्पे यो
सावस्मिन्महाकल्पे इत्यादिना वैवस्वतमनुत्वकथनानुपपत्तेश्च नहि चाक्षुषमन्वन्तरे सत्यव्रतस्य तस्मिन्नेव मन्वन्तरे वैवस्वत
मन्वन्तरावस्थानकथनमुपपन्नं नहि सत्यव्रतस्य कस्मात्प्रलयप्रदर्शनमात्रेण धातुः शिशयिषोर्मुखतो वेदानां निःसरणं तदपह
विप्रश्च संभवति तस्मादतीतदैनंदिनकल्पावसानिक एव प्रलयो वर्णितः न च मत्स्योक्तिविरोधः सांवर्तकानां ओषध्यादीनां शाव
तेऽनुपातानामप्यर्थतो विवक्षितत्वात् कल्पादिशब्दानां किं तु वर्धमानो महामेघैर्वर्षद्भिः समदृश्यतेत्यु
कैवन च प्रथमस्कन्धवचनस्य दोषः दैनंदिनकल्पविशेषणं तस्माज्जेमहिमध्यानान्नाम्नो वध्यादीनामारोपसंभवाच्चाक्षुषा
तरं प्राक्तनचाक्षुषमन्वन्तरयुक्तो वर्तमानो दैनंदिनकल्पो लक्ष्यते तस्माल्लाक्षणिकोऽयं संप्लवः अतीतकल्पावसानिकस्तस्मिन्
व्यारोप्येत्यर्थः न चौषध्यादीनामवशेषासंभवः तत्र कल्पे विशेषेण तत्रावशेषोपपत्तेश्चेति ३८

वा२ वा२

भा॰ स्क॰ टी॰
७४

यत्सेवयाग्नेर्मनोमलं विजह्यादित्यनेन मुक्तिविरोधिपापकर्मनिवर्त्तकत्वकथनेन तत्सेवैव मोक्षप्रदत्वमुक्तं तदेक सुखेनापि वदन्देवतान्त
राणामसुक्तिदत्वं च वदंस्तमेव शरणं व्रजति नेति पुंसः भगवत्सेवाविधुरस्य ये देवाः सर्वे समेताः अपि स्वयं निरपेक्षाः संतो
गुरवोपि संतः यस्य भगवतस्तव प्रसादस्यायुतभागः अयुतसंख्यानां भागानां मध्ये यएको भागस्तस्य लेशं कर्तुं न प्रभवंति मो
क्षप्रदानासमर्था इत्यर्थः तं मुक्तिदं ईश्वरं सर्वान्तरात्मानं त्वां शरणं प्रपद्ये मुक्ततु पापत्वेनाध्यवस्यामि ४९ देवतान्तराणां तत्प्रसा
दायुतभागलेशकरणासमर्थत्वे कर्मवश्यत्वं तन्मूलकास्वैरत्वादिकमेव हेतुरित्यभिप्रायेणोक्तो लोकस्य वृत्तादिसर्वपर्यंतं यस्याज्ञा
ननिवर्त्तनोपयुक्तं सार्वज्ञादिगुणयुक्तं त्वामेव गुरुं वृणोमीत्याह सचक्षुरिति अंधस्य चक्षुरिन्द्रियरहितस्य पुंसो यथा सचक्षुः
पुमानग्रणीः पुरतो नेता कृतः तथा अविदुषः स्वात्मरक्षणोपयुक्तज्ञानेनापि विरहितस्य जनस्य जन्ममरणादिभाजो बलप्र
मतिजीववर्गस्य त्वमर्कदृक् अर्कप्रकाशवत्स्वत एव दृग्ज्ञानं यस्य अर्कएव दृग्यस्येति वा चक्षुषः सूर्योऽजायत धाम्ने दीन चक्षु

न यत्प्रसादायुतभागलेशमन्ये च देवा गुरवो जनाः स्वयं कर्तुं समेताः प्रभवन्ति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये ४९ सचक्षुरंधस्य
यथाग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्वगतिं बुभुत्सतां ५० जनो जनस्या
दिशतेऽसतीं मतिं यया प्रपद्येत दुरत्ययं तमः त्वं त्वव्ययं ज्ञानममोघमञ्जसा प्रपद्यते येन जनो निजं पदम् ५१ तमः

दि१ धीचं [illegible] इत्यादिश्रुतेः अनेन सर्वज्ञत्वमुक्तं सर्वदृशां समीक्षणः प्रकाशकस्यापि प्रकाशकत्वशक्तिप्रदः तमेव भांतम
नुभाति सर्वं इदं विभातीति श्रुतेः अनेन ज्ञानप्रदत्वमुक्तं एवंभूतस्त्वं स्वगतिं समीचीनत्वपुरुषार्थं बुभुत्सतां बोधमिच्छ
तस्य भासा सर्वं२ तामस्माकं गुरुर्वृतः कर्तव्यतावेष्टुमिच्छद्भिर्गुरुत्वेन वृत इत्यर्थः ५० युक्तं चैतदितरेषां गुरूणामन्यानामनर्थहेतुत्वात्त्वत्तस्तु धु२
निरतिशयपुरुषार्थहेतुत्वादित्याह जन इति जननमरणादिभाक्संसारी जीवः गुरुत्वाभिमानवान् जनस्य संसारिणो
जीवस्यासतीं गतिमर्थकामाद्युपायमादिशते आज्ञापयति बोधयतीत्यर्थः तदादिष्टगतेरसतीत्वं दर्शयन्विशिनष्टि य
या संसारिणोपदिष्टया यया [illegible] दुरत्ययमनतिक्रमणीयं तमः स्वपरस्वरूपतिरोधायकं संसृतिरूपं प्रपद्यते प्राप्नोति त्वं
त्वव्ययमक्षयफलप्रदं केवलानंदैकहेतुममोघफलाविनाभावि ज्ञानं स्वपरयाथात्म्यगोचरं ज्ञानमादिशसि इत्यनुषंगः
तुशब्देन निरस्ताखिलदोषत्वसमस्तकल्याणगुणत्वादिजगद्वैलक्षण्यमभिप्रेतम् ५१

मे२ भूतं२ कं३ से१

ना१

यात्मज्ञानयेषां तेऽतएव तन्मूले नाद्यविद्योपहतात्मज्ञाननिमित्तेन संसारपरिश्रमेण तापत्रयेणातुराः दुःखिताः जना
८२ इतिशेषः इहसंसारे यत्कृपया पादपद्मं कष्टकृतमूलयात्वत्स्वरूपयेत्यर्थः उपस्तुताः सदाचार्यद्वारासंश्रिताः सन्तो
यं प्राप्नुयुः सभगवानेव विमुक्तिदः मुक्त्युपायभूतः यं प्राप्नुयुरित्यनेन प्राप्यत्वमुक्तं नोऽस्माकं परमोगुरुश्चाभवत्
परमः नितरां प्राप्यः गुरुस्तत्त्वप्रश्नप्रेरणयाहितोपदेष्टा तेन ज्ञाननिवर्तनेन चोपायभूतश्चासीदित्यर्थः ४५
जनः अनाद्यविद्ययोपहतात्मसंवित्तन्मूलकदेहसुखार्थं प्रवृत्तिपुनर्भगवत्सेवा ... जीववर्गः अबुधः देहात्माद्य योपािप
भिमानवान् निजकर्मबंधनः पुण्यपापात्मकानादिकर्मबंधः सुखेच्छया शब्दादि वैषयिकसुखसंपादनेच्छयाऽसुखं
दुःखं यथा तथा कर्मसमीहते चेष्टते करोतीति यावत्पुनर्यस्य तत्सेवया तानस्वन्मतिं देहादात्माभिमानस्वतंत्रात्मा१

वा१

ससव्रत अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः यदृच्छयेहोपसृताय मापुर्युर्विमुक्तिदो नः
परमोगुरुर्महान् ४६ जनोऽबुधोयंनिजकर्मबंधनः सुखेच्छया कर्मसमीहते सुखं यत्सेवयातांविधुनोत्य
सन्मतिंग्रंथिंसभिंद्याद्धृदयंसनोगुरुः ४७ यत्सेवया ... ... दनं पुमान्विजह्यान्मलमात्मनस्तमः भजेतवर्णं
निजमेवसोऽव्ययोभूयादीशः परमोगुरुर्नः ४८

टि१

भिमानादिरूपामसतीं मतिंविधुनोनिरस्यतिसगुरुः हितोपदेष्टाऽस्मान्निवर्तकश्चभवान्नोऽस्माकं ग्रंथिमसन्मतिरूपांभिंद्या
दपनुद्यात् ४७ नकेवलंभगवत्सेवाऽसन्मतिमेवनिरस्यपि तु तन्मूलंभूतं कर्मपुण्यपापात्मकमात्मस्वरूपतिरोधायकमपीति
वदन् तेस्व हितोपदेष्टा ज्ञाननिवर्तनार्थं प्रार्थयते यदिति पुमान्यस्यतत्सेवया आत्मनस्तमस्तिरोधायकं मलं पुण्यापुण्य
कर्मात्मकं पापंजह्यात्त्यजेत् तत्र दृष्टान्तः रुद्ररोदनं रजतपिंडः सुवर्णपिंडोवा यद्वद्रोदीनदुःस्पर्श इत्वं यदश्ववह्निपत्तद्धत्तहिरण्य
मभवदिति श्रौतप्रसिद्धेः सतु यथाग्नेः सेवया ... ... नादिनामलं जह्यान्निजवर्णस्वासाधारणं वर्णंभजेत् चतद्वदि
ति रुद्ररोदनमलस्यापि निसंपर्कोपायानयनोक्तत्वदृष्टान्तकथनेनात्मनोमलस्यापि भगवत्सेवेतरानयनोपा
त्वमभिप्रेतं सईश्वरोनोऽस्माकं गुरुर्भूयाद्भवतुः सएवगुरुरर्चनीयो न गुरुणामच्छाचार्यं मो विजानीयादिति तदात्मकत्व
स्मरणान्न अतिरिक्तो न कश्चिद्गुरुरस्तीतिभावः ४८

इतीत्थं प्रार्थयमानं नृपतिं उद्दिश्य भगवानादिपुरुषो मत्स्यरूपी महांभोधौ सलिलयार्णवे विहरंस्तत्त्वं तत्त्वप्रतिपादकं पुराणमब्रवी
दित्यर्थः ५४ तदेवाह पुराणेति दिव्यां देवस्य स्वस्य संबंधिनीं प्रतिपादिकां देवेन स्वेनैव प्रणीतां सांख्यं प्रकृतिपुरुषविवेकज्ञानात्म
स्वरूपयाथात्म्यज्ञानं योगो भगवद्भक्तियोगः क्रियानित्यनैमित्तिकादिक्रियायोगः तएते प्रतिपाद्यत्वेनास्यां संतीति
तथा तां पुराणसंहितां मत्स्यपुराणरूपां सहितां तथात्मनो गुह्यं रहस्यं चाशेषं कार्त्स्न्येन सत्यव्रतस्याब्रवीदित्य
नुषंगः ५५ तदेतद्भगवतोपदिष्टमात्मनः सत्यगालनः तत्त्वयाथात्म्यसनातनं ब्रह्म तत्र याथात्म्यं च ऋषिभिः
सह सत्यव्रतो निःसंशयं यथा तथा अशृणोत् ५६ ततो हरिरतीतः पूर्वो यः प्रलयः तस्यापाये अवसाने उत्थिताय ब्रह्म
णादिति शेषः वेधसे चतुर्मुखायैव तासुरं हयग्रीवं गोपहृतान् ममुं हत्वा अस्मादाहरद्धरिः ५७ ततः मनुः सत्यव्रतो राजा ज्ञानविज्ञा

श्रीशुक उवाच। इत्युक्तवंतं नृपतिं भगवानादिपुरुषः मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् ५४ पुराण
संहितां दिव्यां सांख्ययोगक्रियावतीं सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५५ अश्रौषीदृषिभिः साकमात्मतत्त्वमसंश
यं नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ५६ अतीतप्रलयापाय उत्थिताय स वेधसे हत्वासुरं हयग्रीवं वेदान्प्रत्याहर
द्धरिः ५७ स तु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः विष्णोः प्रसादात्कल्पेऽस्मिन्नासीद्वैवस्वतो मनुः ५८ सत्यव्रतस्य राजर्षेर्मा
यामत्स्यस्य शार्ङ्गिणः संवादं महदाख्यानं श्रुत्वा मुच्येत किल्बिषात् ५९ अवतारं हरेर्योऽयं कीर्तयेदन्वहं नरः संकल्पास्त
स्य सिध्यंति स याति परमां गतिं ॥ ६० ऽऽ ऽऽ ऽऽ ऽऽ ऽऽ छ ऽऽ छ ऽऽ छ ऽऽ छ राम कृष्णः ऽऽ कृष्णः ऽऽ कृष्णः ऽऽ छ

नाभ्यां संयुतः आगमोत्थविवेकात् युक्तज्ञानाभ्यां संयुतः विष्णोः प्रसादात् त्रयमहादेवास्मिन्कल्पे वैवस्वतो मनुरभूत् ५८ एवमुपवर्णितमत्स्या
वतारचरित्रोपनिषत्साख्यानश्रवणफलमाह सत्यव्रतस्येति मायामत्स्यस्याद्भुत मत्स्यरूपिणः स्वसंकल्पोपात्तमत्स्यरूपिणो वा शार्ङ्गिणः
हरेः सत्यव्रतस्य राजर्षेः मनोः संवादमाख्यानं श्रुत्वा पुमान् किल्बिषात् स्वर्गापवर्गप्रतिबंधिनः पापान्मुक्तो भवेत् ५९ योनरो हरेर
मुमवतारं नित्यमन्वहमहरहः कीर्तयेत् तस्य नरस्य सर्वे संकल्पाः मनोरथाः सिध्यंति जीवद्दशायामिति भावः देहावसाने तु स नरः परमांग
तेः

58

तदादिव ज्ञानस्य निरतिशयपुरुषार्थहेतुं वदन् विशिनष्टि अंजसेत्यादिना येन त्वदादिष्टेन ज्ञानेन जनोंजसा सुखेनैव
निजं वैश्यं स्थानं प्रपद्यते निजमित्यनेन यथाभूतशब्देन भगवतो निरस्तनिखिलदोषत्वेन समस्तकल्याणगुणात्म
कत्वेन पुंजमाद्विलक्षणत्वमभिप्रेतं तथा तत्पदस्य निरस्तनिखिलदुःखविमिश्रत्वातिशयत्वादिदोषत्वेन निरतिश
नं४ यकेवलादादिमत्वेन चैव लक्षणत्वमभिप्रेतमंजसेत्यनेन उपदिष्टयागत्यातत्फलभूता यकामादेरपि दुः
खप्राप्यत्वमभिप्रेतं च ५१ ननु जनविलक्षणो निरतिशयपुरुषार्थप्रदश्चेदहमेव सर्वैरपि किंन स
माश्रीयत इत्यत आह त्वमिति सर्वलोकस्यानालोचितविशेषाशेषलोकस्य त्वं सुहृत् हितैषी प्रियः प्रीतिविषयश्चा
केविधस्त्वं तथापि हृदयकमले एव वसंतं उक्तविधं सर्वो लोको न जानाति अज्ञाने हेतुं वदन् लोकं विशिनष्टि

त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः तथापि लोको न भवंतमंध
धीर्जानाति संतं हृदि बद्धकामः ५२ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधना
य छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन् हृदय्यान्विवृणु स्वमोकः ५३ राम:

अंधधीर्हृदि बद्धकाम इति अन्धधीर्देहतदनुबंधिनश्चायोग्यार्थे कामादिपुरुषार्थदृष्टिर्न तु देहविलक्षणा
त्मपरमात्मयाथात्म्यधी रत एव बद्धकामः प्राकृतादिविषयेलिप्सुः ५२ यथोक्तविधे भगवते प्रपद्य
ज्ञानोपदेशार्थं प्रार्थयते तं त्वामिति तमुक्तविधं देववरं देवतानां परमं च देवं तं इति अस्तुक्तरीत्या नि
रुपाधिकदैवतं अतएव वरेण्यं वरणीयं ईशं चर्त्वामहं प्रतिबोधनाय स्वात्मपरमात्मयाथात्म्यज्ञानाय
तदुपदेशार्थमितिभावः प्रपद्ये शरणं व्रजामि अतो हे भगवन् अर्थदीपैः परमपुरुषार्थभूतपरमात्मस्वरू
पप्रकाशकैर्वचोभिर्हृदय्यान् हृदयगतान् ग्रंथीन् ग्रंथिवदनिर्मोच्यान् देहात्माभिमानादीन् छिंधि अपाकुरुस्वं
स्वमोकः स्वेषु दत्तोकः स्थानं आविष्कुरु प्रकाशय ५३ २

भा०अ०टी०
७६१

मत्स्यावतारचरित्रकथनान्ते सुखप्रतिपत्तये तदवतारप्रयोजनानि कथयन्नमस्करोति मुनिः प्रलयेति यः प्रलय
पयसि प्रलयार्णव जले विहरन्निति शेषः सुप्ताः प्रबुद्धाशक्तिः सृष्टिशक्तिर्यस्य तस्य निद्रावशप्राप्तत्वादिति भावः
अत एव धातुः ब्रह्मणो मुखेभ्य अपनीतं निःसृतं श्रुतिगणं हयग्रीवेणापहृतं दितिजमसुरं हत्वा प्रत्यु
पादत्त प्रत्याहृत्य धात्रे ददाविति शेषः तथा सत्यव्रतानां सत्यव्रतस्य ब्रह्मीणं च छत्रिणो गच्छतीति वह्निं
गस्तः मृगापत्याये वहुवचनं ब्रह्मतत्त्वायाथात्म्यप्रतिपादकं पुराणमकथयत्तमखिलहेतुं सर्वकारणभू
तं जिह्ममीनं कपटमीनं हरिमहं नतोस्मि इति कर्त्तरि क्तः नमस्कृतवानस्मीत्यर्थः ६१ रामायनमः

प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपादत्त
हत्वा दितिजमकथयद्यो ब्रह्म सत्यव्रतानां तमहमखिलहेतुं जिह्म
मीनं नतोस्मि ६१ इ श्री भा व म पु णे द सा स्त्र्यां हि या छ स्कं
म व र रि ना च र्वि ध्या : २४

59

इति श्रीवत्स्यान्वयपयःपारावारराकासुधाकरस्य सर्वविद्यानिधेः श्रीशैलगुरोः सुतेन तच्चरणकमलप
रिचर्याप्रसन्नतत्सूक्तिसमधिगतश्रीमद्भागवतार्थहृदयेन श्रीवैसवदासेन श्रीवीरराघवविदुषा विलिखि
तायां श्रीमद्भागवतचंद्रचंद्रिकायां श्रीमद्भागवतव्याख्यायामष्टमस्कंधे तु चतुर्विंशोध्यायः २४ समा
प्तोयमष्टमस्कंधः ८ ११
छ छ छ

१०६

अस्मत्कृ[illegible]

इतीत्थं प्रार्थ्यमानं नृपतिं उद्दिश्य भगवानादिपुरुषो मत्स्यरूपी महांभोधौ प्रलयार्णवे विहरं तत्त्वं तत्प्रतिपादकं पुराणमब्रवीदित्यर्थः
५४ तदेवाह पुराणेति दिव्यां देवस्य स्वस्य संबंधिनीं प्रतिपादितां देवेन स्वेनैव प्रणीतां सांख्यं प्रकृतिविलक्षणात्मस्वरूपयाथा
त्म्यज्ञानं योगो भगवद्भक्तियोगः क्रियानित्यनैमित्तिकादिक्रियायोगः तएते प्रतिपाद्यत्वेनास्यां संतीति तथा तां पुराणसं
हितां मत्स्यपुराणरूपां संहितां तथात्मनो गुह्यं रहस्यं चाशेषः कार्त्स्न्येन सत्यव्रतस्याब्रवीदित्यनुषंगः ५५ तदेतद्भगवतो
पदिष्टमात्मनः प्रत्यगात्मनः तत्त्वं याथात्म्यं सनातनं ब्रह्म तथायाथात्म्यं च ऋषिभिः सह सत्यव्रतो निःसंशयं यथातथा
शुश्राव ५६ ततो हरिरतीतः पूर्वो यः प्रलयः तस्यापाये वसाने उत्थिताय शयनादिति शेषः वेधसे चतुर्मु
खायवेदान् हयग्रीवेणापहृतान् तमसुरं हत्वा प्रत्याहरद्ददौ ५७ ततः सतु स एव सत्यव्रतो राजा ज्ञानविज्ञानाभ्यां

श्रीशु उ च इत्युक्तवंतं नृपतिं भगवानादिपूरुषः मत्स्यरूपी महांभोधौ विहरंस्तत्त्वमब्रवीत् ५४ पुरा
णसंहितां दिव्यां सांख्ययोगक्रियावतीं सत्यव्रतस्य राजर्षेरात्मगुह्यमशेषतः ५५ अश्रौषीदृषिभिः साक
मात्मतत्त्वमसंशयं नाव्यासीनो भगवता प्रोक्तं ब्रह्म सनातनं ५६ अतीतप्रलयापाय उत्थिताय स वे
60 धसे हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः ५७ सतु सत्यव्रतो राजा ज्ञानविज्ञानसंयुतः विष्णोः
प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः ५८ सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः संवादं महदा
ख्यानं श्रुत्वा मुच्येत किल्बिषात् ५९ अवतारं हरेर्योमुं कीर्तयेदन्वहं नरः संकल्पास्तस्य सिध्यंति स याति परं

संयुतः आगमोत्थविवेकाद्युत्थज्ञानाभ्यां संयुक्तः विष्णोः प्रसादादनुग्रहाद्वास्मिन्कल्पे वैवस्वतो मनुरभूत् ५८ एवमुप
वर्णितं मत्स्यावतारचरितं श्रीमुनिस्तदाख्यानश्रवणफलमाह सत्यव्रतस्येति मायामत्स्यस्याद्भुतमत्स्यरूपिणः स्वसंकल्पोपात्त
मत्स्यरूपिणो वा शार्ङ्गिणः हरेः सत्यव्रतस्य राजर्षेः मनोः संवादमाख्यानं श्रुत्वा पुमान् किल्बिषात्स्वर्गापवर्गश्रे
योविरोधिनः पापान्मुक्तो भवेत् ५९ योनरो हरेरमुमवतारं तच्चरित्रमन्वहमहरहः कीर्तयेत्तस्य नरस्य स
र्वे संकल्पाः मनोरथाः सिध्यंति जीवदशायामिति भावः देहावसाने तु स नरः परमां गतिं मुक्तिं यातीत्यर्थः ६०

तदादिष्टज्ञानस्य निरतिशयपुरुषार्थहेतुं वदन्विशिनष्टि अंजसेत्यादिना येन त्वदादिष्टेन ज्ञानेन जनोऽंजसा सुखेनैव निजं वैलक्षण्यं स्यानं प्रप
द्येत निजमित्यनेन यथाभूतशब्देन भगवतो निरस्तानिखिलदोषत्वेन समस्तकल्याणगुणात्मकत्वेन चेतनाद्वैलक्षण्यत्वमभिप्रेतं तथा तत्पदस्य निरस्तनि
खिलदुःखमिश्रत्वातिशयसुखत्वादिदोषत्वेन निरतिशयकेवलानंदात्मत्वेन च वैलक्षण्यमभिप्रेतम् अंजसेत्यनेन उपदिष्टयागत्यातत्फलभूतापवर्गका
मादेरपि दुःखप्राप्यत्वमभिप्रेतं च ५१ ननु जनविलक्षणो निरतिशयपुरुषार्थप्रदश्चेदहमेव सर्वैरपि किं न समाश्रीयते इत्यत्राह त्वमि
ति सर्वलोकस्यानालोचितविशेषाशेषलोकस्य त्वं सुहृत् प्रियः प्रीतिविषयश्चासावीश्वरो नियन्ता प्रविश्य नियंता आत्माधारकः
गुरुर्हितोपदेष्टा ज्ञानप्रकाशकोऽभीष्टसिद्धिकरश्चाथापि यद्यप्युक्तविधस्त्वं तथापि हृदयकमल एव वसंतं भवंतं उक्तविधं सर्वो लोको न

67 त्वं सर्वलोकस्य सुहृत्प्रियेश्वरो ह्यात्मा गुरुर्ज्ञानमभीष्टसिद्धिः तथापि लोको न भवंतमंधधी
र्जानाति संतं हृदि बद्धकामः ५२ तं त्वामहं देववरं वरेण्यं प्रपद्य ईशं प्रतिबोधनाय
छिंध्यर्थदीपैर्भगवन् वचोभिर्ग्रंथीन्हृदय्यान्विवृणु स्वमोकः ५३ रामायनमः

जानाति अज्ञाने हेतुं वदन् लोकं विशिनष्टि अंधधीर्हृदि बद्धकाम इति अन्यधीर्देहतदनुबंधितद्भोग्यपार्थकामादि
पुरुषार्थदृष्टिर्न तु देहविलक्षणात्मपरमात्मयाथात्म्यधीरत एव लब्धुकामः शब्दादिविषयलिप्सुः ५२ यथो
क्तविधं भगवंतं प्रपद्य ज्ञानोपदेशार्थं प्रार्थये त्वं त्वामिति नमुक्तविधं देववरं तं देवतानां परमं च देवतं इति श्रु
त्युक्तरीत्या निःसमाभ्यधिकदैवतं अत एव वरेण्यं वरणीयं ईशं च त्वामहं प्रतिबोधनाय स्वात्मपरमात्मयाथात्म्य
ज्ञानाय तदुपदेशार्थमिति भावः प्रपद्ये शरणं व्रजामि अतो हे भगवन्नर्थदीपैः परमपुरुषार्थभूतपरमा
त्मस्वरूपप्रकाशकैर्वचोभिर्हृदय्यान्हृदयंगतान् ग्रंथीन् ग्रंथिवदनिर्मोच्यान् देहात्माभिमानादीन् छिंधि
अपाकुरु स्वं स्वकीयं ओकः स्वरूपं स्थानं वा विवृणु प्रकाशय ५३ रामायनमः रामायनमः रामः